नं० ५२७०

नाम- कात्यायनसूत्रव्याख्याने ८ अध्याय

कर्ता - याज्ञिकदेव० प्रजापतिदेवसुत०

पत्र संख्या- ८८ पत्राणि सं०- १९२१

विषय०- सूत्रपद्धति०

कात्यायनसूत्रव्याख्यानाष्टमाध्यायः

५१७०

5170

F. = 88

२३००

देव भा अ८
३

श्रीगणेशाय नमः आतिथ्यं ३ अन इति शेषः आतिथ्यमिति व
क्ष्यमाणस्य कर्मणः संज्ञा संव्यवहारार्थी प्रायणीयातिथ्योयसन्त्रि स्येवमादौ।
तत्र हविरुपदिशति निर्वपति। वैष्णवं नवकपालं यत्स्मेन्वारब्धस्तूर्णं। तत्राति
थ्यकर्मण्यध्वर्युः यजमानेन्वारब्धः यजमानस्त्रियाह्न तान्वारंभणतूर्णं सत्वरं नवक
पालं वैष्णवं विष्णुदेवतं पुरोडाशं निर्वपति। सोमस्थापनानंतरमर्थलक्षणं उद
कपानमत्राघण्यंतराण्[illegible] त्वेव निर्वपतीति तूर्णमित्यस्यार्थः पर्युत्पमाणं

द्वा६

वियजमानोन्वारभते यात्रयत्नीति श्रु नवैष्णवमित्युक्तं स्यन्त्र्यन्वारब्धु इत्युक्तं
तथासावेसंत्वरमाणा इव गृह्णीयात्र याहा पचितो भवतीति श्रु तेरतूर्णमित्युक्
तं। अथयदातिथ्येन यजंते विष्णुमेव देवतां यजंत इति श्रुतेर्वैष्णवमित्यु
क्तं। विष्णवे त्वेति मंत्रवर्णाच्च नवकपालः पुरोडाशो भवतीति श्रु तेनवकपालमि
त्युक्तं। नवकपालानि चैवमुपधेयानि। चत्वार्युपधाय पंचानामवशिष्टानां त्री
णि दक्षिणतः उत्तरतो द्वे इति पक्षांतरमप्याह एकं विमुक्ते वा। अथवा शकटे यु
क्तयोर्द्वयोरनडुहोर्मध्ये एकस्मिन्दक्षिणे विमुक्ते अन्यस्मिन्सव्ये ऽविमुक्ते एव निर्व
पति अस्मिन्पक्षे एकस्याः शम्यायां निष्काशितायामध्वर्युः शालां प्रविश्यपत्र १

सोपवेशनादि अपणस्य पश्चाद् आसादनान्तं हविर्निर्वापं कृत्वा हविष्कृता वाग्वि-
सर्गान्तं कृत्वा तदनन्तरं द्वितीयपशुप्रोक्षणादि सोमप्रवेशनान्तं करोति। उभय-
थाश्रुतत्वात्। तदाहुः पूर्वो निरुप्य गृह्णीयादिति प्रकृत्य तदाहुः अन्यतर एव विमुक्तः
स्यादन्यतरो विमुक्तो यत् गृह्णीयादिति श्रुतेः। तत्तु तथा न कुर्याद् द्विमुक्त एव प्रपायत् गृ-
ह्णीयादिति च। अतो विहितप्रतिषिद्धत्वाद् द्विकल्पः। निर्वपेदग्नेस्तनूरिति पं-
चकृत्वः प्रतिमन्त्रं अग्नेस्तनूरसीत्येवमादिभिः पंचभिर्मन्त्रैः प्रतिमन्त्रं पंचकृत्वो
निर्वपति गृह्णाति। सकृद् गृह्णात्यग्नेस्तनूरसीति प्रकृत्याथ यत्पंचकृत्वो गृह्णातीति
श्रुतत्वात्। पूर्वं निर्वपति ग्रहणं कर्मोत्पत्त्यर्थं द्वितीयं निर्वापार्थं। अत्रायं क्रमः
चतुरासनाप्र सोमप्रवेशनां प्रणीताप्रणयनं आहवनीयदक्षिणाग्न्योः परिस्तर-
णं। पात्रासादनं। ततः स्फ्येयद्विनयात्रीकरणं। ततः सूर्याग्निहोत्रहवण्योरादा-
नादि पत्न्यन्वारब्धे ग्रहणं कुर्यात् इति। इह मितानां विचार्यते। किं मानि ध्यायां
सावित्रस्थाने हविर्भिः विकल्पः ते रेव मंत्रैर्ग्रहणं उत्तानि हविर्भिः समुच्चय। तैर्ग्रहणमिति।
किं तावत्प्राप्तं सर्वत्र गुणे वपक्ष गृह्णाति सावित्रनिर्हविः श्रुतिविरोधाभ्यं सवि-
त्राद्धसंबन्धाद्देवस्य त्वेत्येष मं[illegible]त्रः सवितृत्वाख्याता तेन स्पसावित्र्य उपलक्षित

स्यमंत्रस्यात्र हविर्ग्रहणे निवृत्तिः स्यात्। उक्तः। अत एव विरोधाद्वा सर्वग्रहणस्याग्नेस्त
नूरसि विरूढवेत्येति ग्रहणे प्रत्यक्षश्रुतश्चोदकप्राप्तमानुमानिकं बाधते। अ
पि चात्र देवस्य त्वेति लाजाहोमे विरूढवेत्येनेन समानार्थे उक्तार्थत्वात्प्रयुज्यमानो
विरुध्यते। अतः सावित्रस्य निवृत्तिः। कवचैर्वेष्टितेन मंत्रैर्ग्रहणमिति। अत एव
वैजवापेन सन्निहितां न सावित्रमाहेति। अस्मिन्पक्षे स वा अन्ये नैवेति श्रुतिरे
वं व्याख्येया। येन यजुषा देवस्य त्वेत्यादिनान्यानि हवींषि गृह्यंते न तो यजुषान्ये
नैवा वेष्टितेन यजुषाग्नेस्तनूरसीत्यादिकेनाग्रहीयादित्यर्थः। अपरे त्व
न्यथा व्याचक्षते। अस्मिन्पक्षे नेमं त्रैलाशब्दमात्रस्यैव निवृत्तिर्न सर्वस्य मंत्र
स्य। तावन्मात्रस्यैव विस्मृवेत्येनेन समानार्थत्वेन विरुध्यमानत्वात् तु सक
लस्य सावित्रस्य निवृत्तिः कुतो न भवति स वा अन्ये नैवेत्यादिकस्य श्रुत्या समु
च्चयविधानात्। अस्या अयमर्थः। येन यजुषा देवस्य त्वेत्यनेनान्यानि हवींषि
गृह्णातीति तस्मादन्येन च यजुषा अग्नेस्तनूरसीत्यादिना गृह्णीयात्। येन चान्या
नि हवींषि गृह्णाति देवस्य त्वेत्यादिनानेन चतुर्गृह्णीयात्। स वा अन्ये नै
वेत्ययमेव शब्दस्यार्थः। इतरथा अवधारणे सति विरोधः स्यादवधारणसमु

त्रयोः। अतः सावित्रस्याष्कस्यैव समुच्चयविधानात् तद्गतस्य त्वाशाहुमात्र
स्याविरोधान्निवृत्तिरिति सिद्धं। अतः प्रथमेष्वन्विष्टमुष्टिष्वसावित्रप्रयो
गो जुहुयात् हुस्ववानवत्तुर्थपंचमयोः तथा चाहापस्तंबः पंचसु सावित्रं
जुहुयं वानुप्रजति नोत्तरयोरित्येके। त्रिस्रवो नव[illegible]कपालः पुरोडाशो भवति
विस्मुवदेवानक्रु हुं संस्कारसह विष्णुतावाचं विसृज्योत्तरमनुद्राहं विमुच्यावा
रुणमसीत्यादि काण्ठकवा वरुणस्यत्वं भसजन्यसीति शम्यां प्रहरहयति
प्रमुक्त इति योक्त्रपाशंप्रमुच्य अप्रविश्य पत्नीमन्वारंभयित्वा निर्वपति वि
स्नवनवकपालमनेनलिनर्रिति पंचस्त्वः सावित्रादिभिस्तुभ्येनोत्तरं विमुंचा
ति वरुणोसीति सोमनमाद्दन इत्यादि। प्रोक्षणादिनु ऽमेडातासंतिष्ठत इति च ॥
मानवेच   अग्नेरग्राग्नेयमुद उत्तुखमनोवस्थापयति वरुणस्नोते भ्यत्वे
त्कपलम्नोति वरुणस्पत्वं भसजन्यसी। ति दक्षिणो शम्यामुत्कर्षति विहतो
वरुणपाश इति योक्त्रपाशं विष्यति प्रत्यस्तो वरुणस्य पाश इति प्रत्यस्यति नमो
वरुणस्य पाश्यायेति नमस्करोति। अतिथ्यायेध्माबर्हिः सन्नत्पतियथायपु
वंधेसि हूमा निर्वपणात्सत्यन्वारभे घृस्मान्निर्वपे सावित्रादिभिरग्ने त्व

नूरसीति प्रभृतिभिः पंचभिः सोनिर्वपति विस्रवेन वकपालं सिद्धमाह विःसृ ह्य
नाहू विष्णुताचा चंविस ज्योतरमन डुहं विमुंचतितम ध्वर्यवेदहोत्मनश्च दीक्षित
संचरेणाति दृसेत्वादिनाहरिणां प्रमिमतश्च मंत्र समुच्चयपक्षः। तथाहि देवस्य
सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये त्वा नूरसिविस्रवे त्वा जुष्टं गृ
ह्णामीति प्रथमं। एवं द्वितीयं देवस्य सवितुरित्युपक्रम्य सोमस्य तनूरसि। ए
वमेव तृतीयं देवस्य सवितुरित्युपक्रम्यातिथेरातिथ्यमिति। चतुर्थं श्येनाय त्वे
त्येवा पंचम मग्नये त्वे त्येवा। अथ सोमांतत्वं त्वभृता सु दीक्षणीयादिष्टिष्विषु
चोदके नप्राप्तेषु समस्तेष्वंगेषु प्राप्तेष्वाह अग्न्यन्वाधानव्रतोपायनादि
एष भो जनदानप्रप्रवरणानि दीक्षणीयाप्रभृति प्राग्दवसानीयायाः सोमकृ
त्वात् सोमे दीक्षणीयाप्रभृति दीक्षणीयात आरभ्य उदवसानीयायाः प्रा
क् सोमांतत्वं त्वभृता स्विष्टिषु पशुषु चाग्न्यन्वाधानादीनि प्रवरणांता
नि कर्माणि न भवंति कुतः कृतत्वात् सोमिके रेवि तेषामर्थस्य साधितत्वा
त तद्यथा येषां तावदग्निधारणार्थमग्न्यन्वाधानं तेषां सोऽर्थेनैव वि
हृतानामग्नीनां धनत्वादीक्षणीयादिषु तैनैव धारणेन संनप्रसंगासि

दूकार्यं चान्वयुनर्हरणं कर्तव्यं ननु चाक्रतुसमाप्तेः पुनः पुनर्धारयित
व्य एवाग्निः सर्वं तथापि नान्यन्वाधानं कार्यं । द्वि विद्यन्त स्याग्नेराधेयः स
मिंधनन्व्यापारो धारणार्थस्तद्रूपं हि नत्स्य कृतो पुनः पुनः कृतो । तस्मादत्रा
पि धार्यमाणस्य धारणाय पुनर्नेकर्तव्यं येषां मते देवतापरिग्रहार्थो ते
षां दीक्षणीयया देवतानां परिगृहीतत्वात्प्रायणीयादिषु नं निवर्तते । दीक्ष
णीयायां तु दीक्षणीया देवतापरिग्रहार्थं भवति । अस्मिन्पक्षे तदानीं दीक्ष
णीयाया अनिष्पन्नत्वे न तत्कार्यस्य देवतापरिग्रहरूपस्य कृतत्वाभावात् ।
दीक्षणीयाप्रभृतीतिन्तु भूयस्त्वादृतिः कथं पुनर्दीक्षणीयाया देवतापरिग्र
हार्थत्वं । अथ प्रणीयाग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपतीति प्र
कृत्याग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं
च यज्ञं परिगृह्य दीक्षा इति तस्मादाग्नावैष्णवएकादशकपाल इत्यादिना
ग्नावैष्णवस्य देवतापरिग्रहार्थता गम्यते । यद्यपि दीक्षासोमस्येति वचनात्प्र
धानार्था दीक्षणीया प्रधानदेवताएव परिगृह्णाति तथापि विश्वेदेवग्रहे
सर्वदेवतासमवायात्तत्परिग्रहं करोतीति दीक्षणीया प्रसंगादंगकर्मदेवता अ

।पि गृह्णाति। व्रतोपायनमपि कर्माङ्गभूतस्य सत्यवदनादिनियमस्याङ्गीकरणं त
द्दीक्षणीयायां गृहीतस्य विसृष्टत्वात् सोमार्थत्वेनापि सत्यवदनब्रह्मचर्यादिनि
यमस्याङ्गीकृतत्वात्तन्निवर्तते। तदपि दीक्षणीयायां भवत्येव। उद्दानप्रेषादूर्ध्वं दी
क्षितत्वे संजाते सत्यवदनादिनियमस्य प्रवृत्तेः तस्मादपि दीक्षितमाहुः स संवृत्ति
।दण्डान्ते हि दीक्षितो भवति। अत एव व्रतग्रहणप्रतिषेधो दीक्षणीयायां गृहीतस्य
विसर्गोऽपि ततः प्राग्न कर्तव्यः। आरण्यभोजनमपि प्रायणीयादिषु चोदकप्राप्त
मपि व्रतस्यार्थत्वात् आधानार्थस्य भक्षस्य तस्य पयोव्रतस्य वर्जनीयत्वात् सोमि
कपयोव्रतादिनावृत्तिसिद्धेर्निवर्तते। तथाचोक्तं जैमिनिना। अन्यविधानादा
रण्यभोजनं न स्यादुभयं हि वृत्त्यर्थमिति। अतः वसावा आरण्यमेवाश्नीयादू
क्षारण्यौषधीनामश्नीयादित्य परस्मत्स्यहं सायमरण्याशनं प्राप्नोति तदनेन नि
षिध्यते। अन्वाहार्यदानमपि प्रकृतावानत्यर्थं। सा चानतिः सोमिकेनैव दक्षि
णादानेन कृतेति दीक्षणीयादिषु निवर्तते। ब्रह्मवरणं चाप्रवृत्त्यर्थं। सा च सोमि
केनैव वरणेन सिद्धेति दीक्षणीयादिषु न तदपि निवर्तते। उदवसानीयायां तु सर्वं
अग्न्यन्वाधानादिकं भवति अग्न्यन्तरत्वादग्न्यन्वाधानं। उन्मुक्तदीक्षत्वादिष्टि

त्वाच्च व्रतोपायनं। दानं च विहितत्वात्तस्य हिरण्येन दक्षिणेति। आनन्त्यंतरविधा
नाच्च व्रतस्य वरणं अतः प्रागुदवसानीयाया इत्युक्तं। पत्नीसंनहनं च सयोक्त्रायाः
[blot]। पूर्वेद्युर्हि विकल्पेन पत्न्या योक्त्रेण दीक्षणमुक्तं। तत्र यदि योक्त्रेण पत्न्या दीक्षा
कृता तदा पत्नी सयोक्त्रा भवति। तदा चेदमुच्यते। सयोक्त्रायाः पत्न्याः पत्नीसंनह
नं च न भवति। चकारेणाकृतत्वादित्येतदनुकृष्यते। यदि प्रकृतो संनहनं वासोधा
रणार्थं। तथापि सन्नद्धयैव कर्माणि स्येवमर्थे संनहनं न दृष्टार्थं। अन्यार्थे नापि
संनहनेन संनद्धेवेति न द्वयसंनहनं यजमानभागश्च भक्षप्रतिषेधात्। यज
मानभागश्च हृतस्यार्थः हुतिश्च प्रयोजनतादिना सिद्धा इति कृत्वा दीक्षणीयादिषु स
व निर्वृत्तिः। उक्तो भक्षप्रतिषेधात् तत्प्रतिषेधश्च न तत्कार्ये द्रव्यांतरस्यपय आदेर्वि
धानात्। इति पूर्वपक्षः। सिद्धांतमाह नकर्मगुणत्वात्। दीक्षणीयादिषु य
जमानभागस्य निवृत्तिर्न भवति। कुतः कर्मगुणत्वात्। कर्मांगत्वाद्यजमानभाग
स्य यदि हृतस्यार्थो यजमान ▬ भागभक्षः स्यात्तदा निवर्तेत। स तु हविःशेषप्रति
पत्त्यर्थः। भागं प्राश्नीतीति भागस्य द्वितीयानिर्देशात्। अतः कर्मगुणत्वात्तदकर
णे च शेषप्रतिपत्तिलोपे न कर्मणो वैगुण्यापत्तेर्यजमानभागो न निवर्तेते उपस

दे॰व॰भा॰ अ॰
५
ग

र्जनीरधिश्रयणंति मदंती श्रप्यनवत । उत्पवसर्जन्यधिश्रयणानंतरमेवाध्वर्यु
र्गत्वजन्मदंतीरधिश्रयति । श्रप्यनवदिति । गार्हपत्येदीक्षितस्य मदंती ।: दक्षि
णेनेत्युपन्यासः इति । ग्रासमय्य, उत्पवसर्जन्यधिश्रयणं मदंत्यधिश्रयणस्यावसर
विधानार्थं पुनरिहोच्यते । मदंतीरिति पत्नीयजमानयोः कर्तोश्च हस्तौ कार्यार्था   ६९
नामपां संज्ञा संव्यवहारार्थं मदंतीरुपस्पृश्येत्येवमादौ । एवं मदंतीनामधिश्र
यणं विधाय पत्नीसंप्रयोजनमाह   आमुष्टिविसर्गादुदककार्यं तत्र । अवांत
रदीक्षान्तमुद्दिश्य आमुष्टिविसर्गान्मुष्टिविसर्गपर्यंतं पत्नीयजमानयोर्यः कश्च
नउदकार्थः उदकेनार्थः ऋत्वर्थो वा पुरुषार्थो वा हस्ते वा अहस्ते वा तत्सर्वोपित
त्ताभ्यो मदंतीभ्यः कर्तव्यः । अतः प्रणीताप्रणयनोत्सर्जन्याचमनोदकोप
स्पर्शनशौचादिकं यत्किंचिदुदककार्यं तत्सर्वं ताभिर्मदंतीभिरुष्णाभिरद्भिः कर्तव्यं
। अत्र वक्तव्यस्त्वेव विशेषः । गार्हपत्येन सानां दीक्षितस्यार्थो दक्षिणाग्नेनोपन्यास इति
। अत्राप्येनमतो मदंतीभिरुपचरंतीति श्रूयते । तत्रावांतरदीक्षायाः कर्ता यज
मानोधिकृतः स एनं शाट्येनोच्यते । एनं यजमानं अतो वांतरदीक्षायाक्रुद्धं मदं
तीभिरुष्णाभिरद्भिरुपचरंति परिचारकाः । उष्णेनोदकार्थमाचमनपानादिकं ।   ५

कारयंतीत्यर्थः। कथं पुनर्गम्यते। तस्मा आपो मद्दंत्स्य इति। मद्दंत्या याः इत्यस्मात्ता

वान्निर्दिश्यादापो मद्दंत्स्य इति गम्यते। न पोवा अग्निरत्स्यापो मद्दंत्स्य इत्येतस्मान्नुवा

कय शेषाद् तस्मा मद्दं त्स्य इत्स्य वसीयते नन ष्ठप यत्पापिमहीह र्थः। श्ल पन पोरिस्य यम

नेकार्थौ धातुः तथाप्यत्रता प्रकृतएव गल्पनेद श्यः। मद्दंत्स्यापेन ग्लायंत्स्य

इत्यर्थः। आतिथ्यायामेव विशेषांतरमाह काश्मर्यमयाः परिधयः। काश्मर्यः

श्रीपर्णी। तन्मया आतिथ्यायां परिधयो भवंति। काश्मर्यमयाः परिधय इति

श्रुतेः आश्ववालप्रस्तरः। अश्ववालसदृशा अश्ववालाः काशाः तन्मयः प्रस्त

र अश्ववालः। स आतिथ्यायां भवति। आश्ववालः प्रस्तर इति श्रुतेः ऐक्षव्यौ विधृती [विधृती]

[यवद्दि ऐक्षव्यौ] कातृणाम् लावैभ्रने अत्र भवतः। यद्यप्यत्राश्ववाल इत्यश्वस्ववालाः प्रतीयंते ऐक्ष

व्यौ विधृती इत्यत्र इक्षवयवमंते प्रतीयेते। तथाप्यत्र शाखांतरीयाद्वचनाच्छेषा

त्काशमयः प्रस्तरः काशाम लमयौ च विधृत्योग त्यैतेइति मीमांसायां प्रथमाध्या

येततीयपादे साधितं। अत्राहुर्माधवाचार्याः। बर्हिः प्रस्तरयोरंतराले तिर्यक्प्रसा

र्यमाणे द्वे भौविधृती ते अत्र इक्षुपत्ररूपे स्यातामिति धूर्तस्वामिनोऽपि। ऐक्षव्यौ

इक्षुपर्णे इत्याहुः स्वभाष्ये बर्हिः प्रस्तर नर्हिरत्र प्राकृतमेव कौशं भवति। एतस्मात्

देवभा अ०
६

मपि चतुष्टयमध्ये गणनायां पुनरुक्तं । एतद्देवाग्नीषोमीयोपसत्स्वपि चतुष्ट
यं । यदेतत्स्मारणमुक्तं तत्पूर्वपक्षमभ्युपगम्य आदिचतुष्टयं बर्हिरन्तं । एतद्देवाग्नीषोमी
ये उपसत्सु च भवति । यदातिथ्यायामासादितं प्रोक्षणादिना संस्कृतमुपसत्सु
च तदेवेत्यर्थः । आक्षिप्तिनियमो यां यदातिथ्यायां बर्हिस्तदुपसत्सु तदग्नी
षोमीयस्येति वचनात् । अत्रेदं संदिह्यते । किमिदमाक्षिप्य विधानं उत निरि
ष्टकोपदेशः । अथवा धर्मातिदेशः । अथ बर्हिः सामान्यविधिरिति । तत्राद
द्यः पक्षः । आतिथ्यायां योऽविहितं यद्बर्हिस्तदपदिष्टं स्यात् ... अग्नी
षोमीयेऽपि विधीयेत तदानीमातिथ्यायां विधानमनर्थकं स्यात् । न हि तृतीयः । यदि
चातिथ्याया ... मुपयुक्तमुपसदादिषु विधीयेत तदा विनियुक्तविनियोगरू
पो विरोधः स्यात् । तस्मादातिथ्याबर्हिषो ये धर्मा आश्वबालादयस्ते धर्मा उपस
दादिषु भवन्तीत्यतिदेशपरमेतद्वाक्यमिति तृतीयः पक्षः । सोऽपि नोपसदादीनां बा
र्हिःशब्दस्य धर्मातिदेशपरत्वे लक्षणाप्रसङ्गेन । अतः स्यात् बर्हिष आतिथ्योपसदग्नी
षोमीयेष्वेकत्वं प्रतिमातिर्नः साधारण्यमत्र विधेयं आतिथ्यार्थं यद्बर्हिरुपा
दीयते तन्न केवलमातिथ्यार्थं किं तूपसदर्थमग्नीषोमीयार्थं चोपादेयमि

६=३

अ२

६

तिवाक्यस्यार्थः। अन्ये तु आक्योत्तरकालं वा श्रुवा लदं यो धर्मः पठ्यमानाः साधार
ण्यं प्रतिपद्यन्ते सत्यथातिथ्याप्रकरणे। कुतः बर्हिषः साधारणत्वात्। तस्मादातिथ्यो
पसदग्नीषोमीयास्त्रयोप्यस्य बर्हिषस्तद्धर्माणां च प्रयोजकाः। न त्वपूर्वत्वा
दुपसदां बर्हिषोऽभावः तस्मिन्सति कथं धर्मोपदेशो निरिष्टको पदेश आश्रि
घाविधिर्बर्हिः साधारण्येन एव सर्वेषां तत्स्वरूपप्राप्त्यपेक्षत्वात्। तेनवा क्वमे वै
न घदातिथ्यायां बर्हिरित्यनुपपन्नमिति। उच्यते। पूर्वाघारोन्नविघतो तस्माद
न्मन्तरमेवाघारमघारयतियद्ध्व एवेति। नहि श्रांग प्रधानार्थो तस्मादुपस
दंगतयाप्यस्य भावे पितदंगभूतपूर्वाघारांगतयाप्येतस्यैव बर्हिरिति। एवं साधार
ण्येन सिद्धेन संस्काराः प्रोक्षणादयः किं प्रतिकर्मावर्तनीया उतातिथ्याकाल [illegible] कृ
ताएवोपसत्स्वग्नीषोमीये च प्रसक्तन इति संदेहे मध्ये यानाभावान्न संप्रयोगो नापि तं
त्रमातिथ्याकाले न विशेषग्रहणादिति प्राप्ते उच्यते। सत्यां न तंत्रता प्रसंगस्तु
भवति। यद्यपि आतिथ्याप्रयोगमध्ये न प्रयुक्ताः संस्काराः क्रियन्ते न तथापि तेषां
बर्हिर्धुरत्वात्तस्य च सर्वार्थत्वादन्यप्रयुक्तैरपि संस्कारैः संस्कृतस्य यावत्स्वप्रयोज
नमनपवर्गान्न भूयः संस्कारैः कार्यं। अथवा तंत्रम ध्ययानाभावेपि बर्हिर्धु

देव भा॰ अ॰ ८

णं पेतस्यां कारणे जयद्यर्थं बर्हिर्हरणं तं तदर्थं विज्ञायमाना बर्हिषः साधारण

त्वात्तेपि सन्नह्य देवकर्मार्थत्वमवगन्तव्यमिति नान्तरी॰ यकमाति पथा कालेनु

ष्ठानात् उपसदा देश इदानीम प्रास्त्वा नानाचेतावना आतिथ्या म प्रवर्ग्य अ

पवृड्ध्यंते बर्हिषोन पदकत्वात् तदर्थं त्वाख्वेतेषां त ॰ स्मान्त भेदे नकर्मार्था इ

ति न्यायतः प्राप्तो नित्य त थापि अग्नीषोमीये पुनर्वचनसामर्थ्याद् बर्हिषः सम

र्पणं पुरस्ताद्धृथ्यासादनं बर्हिरसी त्येन प्रोक्षणं म लाव से कृत्स्न मवस्थेवान याच

वचनं प्रोक्षणीरध्वर्युरादत्ते सदध्मेवाग्रे प्रोक्ष त्यर्थवोदमथास्मे बर्हिः प्रयच्छ

तीत्य पुरस्ताद्धृथ्या सादयति तं प्रोक्षोपनिनीयाग्नि स्नाह्ठः स्य ग्रंथिमाश्ववालः प्रस्त

रउयसन्न ह्यु भवति तं गृह्णाति गृहीत्वा प्रस्तरमेव कृत्स्नं बर्हिः सृणातीति आसा

द्याग्निमंथनमाहोमात् कर्तितिहवी प्यासाद्य अग्न्यावग्निरिति होमान्तमग्निमं

थनं कुर्यात् । आसाद्य हवींषि अग्निं मंथतीति श्रुतत्वात् । एतस्याग्निमंथनं श्रु

ता॰ विहितं तस्याचार्यणचातुर्मास्येषु वैश्वदेवपर्वण्युपनिबद्धत्वा पुनरिहा

ति दिष्टाः अत एव हि देवयज्ञाकल्पा हा ना हि होमान्त मिहानुछेयं सोधिमंथनं ठ

ज्ञाकलमादनंतरं स्यादिति होमान्तानां सर्वेषां धर्माणामन्त्रेवयश्रुतत्वात् इदानीं तेन

८

वति। इदमाविष्यमिष्टाङ्गं भवति। न हि दृष्टाङ्गं भवतीति श्रुतत्वात्। अत्र च पूर्वे
येऽत्र याज्याङ्गं न ते तु प्राग्निरूपितं ज्ञापितं भवतीत्यत्रो अत्रेडान्तां गरातिविधा
नो अन्त्योत्रानुयाजाभावात् सर्वेऽपि तु कृत्सु चतुर्गृहीतान्येवाज्यानि। नोत्सुको
दूहनं न समित्परिशेषणं। चतुर्थे प्रयाजे सर्वस्योपभृत्स्थस्य समानयनमिति विशे
षः ध्रौवं व्रतप्रदानेन गृह्णीयात् पत्नयङ्गिनि पवित्रमग्निपत्न्यन्ते कृते ध्रौवमाज्यं व्रत
प्रदाने व्रतप्रदानार्थं भोजनेन गृह्णाति आपः सं येत्वा परिपतनयज्यस्य नेन मन्त्रेण
अथातो गृह्णात्येवापनयेत्वेति श्रुतेः हविष्कृत्त्वात्याः सकवेणातन्नून प्रेशाब्दा
येति शाब्दं न तु जिष्ठायेति। त्वात्याः सकाशात्स्रुवेण हविराज्यं गृह्णीयाद् व्रतप्रदा
नपात्रे एव। तन्नून प्रेष्टि प्रथमं। शाब्दं नहि द्वितीयं। शाखान्तरे त्रीण्याज्यग्रहणा
निसमाम्नातानि सन्ति। त्रयश्चैते मन्त्राः तेन प्रतिमन्त्रं ग्रहणं सत्रितं गृह्णामी
ति सर्वत्र साकांक्षत्वात् गृह्णामीति मम वयवं सर्वत्र सर्वेऽपि मन्त्रेष्वनुषजेत् उत्तर
योरपि मन्त्रयोः पवेदित्यर्थः। कुतः साकांक्षत्वात्। सकांक्षो ह्युत्तरो मन्त्रो। अनयेन
संबध्यमानो निराकांक्षो भवतः। पठितश्चायमवयवः पूर्वमन्त्रे सन्तु त्वयोगित्वादुत्त
रयोरप्यनुषज्यते पूर्वशेषो वोत्तरो। वाशब्दः पक्षव्यावृत्तौ। उत्तरो न तन्नून प्रेश कृतं इत्ये

देवभा अ० ८
८

तो पूर्वस्याप्तये त्वेन्यस्यैव मंत्रस्य शेषो भवतो न पृथङ्मंत्रो। कुतः। एकवा
क्यत्वात्। एकमेवायं वायुदेवत्यो मंत्रः॥ सर्वेत्वप्नप्तये परिपठन्तये त नून
मे शब्दः यथा शब्दे नेदुं जिघ्रा येसं नैर्वायुरेवाभिधीयते सर्वत्र यो वा अयं पवत
इत्यादिवाक्यशेषात्। अतो मध्ये यदृह्ल्या मीति पदं पठितं तत्सर्वैर्वायोर्गुणाव
चनैः संबध्यते। अत एकमेवेदं वाक्यं। तच्च ध्रौवग्रहणे विनियुक्तं। हिंस्या त्स्याम
हणं तस्मीमेव मंत्रस्याम्नातान्वेतद्ध्रुवग्रहणे त्रयं वे न के न कर्तव्यमि
त्यपेक्षायामाह प्रतिपुरुषं वा ग्रहणमाज्यानि गृह्णानाईति श्रुतेः। प्रतिपुरु
षं वेन द्वौ वा ध्राज्यग्रहणत्रयं भवति सर्वैर्ब्रह्मादिभिः पुरुषैर्वरणक्रमेण क
र्तव्यमित्यर्थः। सर्वैः कुतः आज्यानि गृह्णानाईति श्रुतेः। आज्यानीति गृह्णा
नाईति चाज्येषु ग्रहणकर्तृषु च बहुत्वश्रवणात्। अथैन आज्यान्येव गृह्णा
नाईति माध्यंदिनीयायामपि उक्तं यत्र बहुत्वश्रवणात्। अतो ब्रह्मादिभिः
सर्वैर्वरणक्रमेणापत्यइतिमंत्रेण ध्रौवस्यान्नपात्रे ग्रहणं कर्तव्यं। तस्मी
मेव रक्षा स्याहिंस्यवे णेति। यजमानोपि गृह्णातीति हरिस्वाम्यभिप्रायः
। अथैन आज्यान्येव गृह्णाना इत्यत्र एते ऋत्विग्यजमाना इति यतो व्याख्या ८

8

तवान्। अथातो गृह्णात्येवेत्यत्र हरिस्वामिनः ध्रौवमाज्यं व्रतप्रदाभयात्रेप्र
थमं। ततो द्विराज्यस्थाल्याः स्रुवेण प्रतिपुरुषं गृह्णीयुरित्येतच्छाखान्तरादिति।
तानूनप्त्रं गृह्णाति कांस्ये चमसे वेति मानवसूत्रे। तानूनप्त्रमेतत्ताएनदाज्यं तानून
प्त्रसंज्ञकं भवति दक्षिणस्यां वेदिश्रोणौ निधायावमृशन्त्यृत्विजो यजमान
श्चानाधृष्टमसीति। तत्तानूनप्त्रमाज्यं दक्षिणस्यां वेदिश्रोणौ निधायर्त्विजो य
जमानश्च युगपत्सहैवावमृशन्ति अनाधृष्टमसीति मन्त्रेण ते समवमृशन्त्यना
धृष्टमसीति श्रुतत्वात्ताएनदाज्ये सर्वे र्त्विग्यजमानाः संभूयावमृशन्तीति ह
रिस्वामिनः तथा च मानवे [illegible] त्विजो यजमानश्च युगपत्समवमृश्यानाधृष्ट
मसीति जपन्तीति अद्रोहस्तेभ्यो न स तानूनप्त्रिणो द्रोग्धव्यमिति श्रुतेः। येः
सह तानूनप्त्रमाज्यं स्पृष्टं ते स तानूनप्त्रिणः। तेभ्यः स तानूनप्त्रेभ्यो ऽद्रोहः
कु ४ अनपकारः कर्तव्यः। कुतः न स तानूनप्त्रिणे द्रोग्धमिति श्रुतेः। ये नोह सममभ्य
वेयान्नास्मै [illegible] न स तानूनप्त्रिणे द्रोग्धमिति श्रवणात्तस
मानसाधारणं तानूनप्त्रस्य [illegible] सतानूनप्त्री। येनो हेति येन [illegible] वि जाया
यजमानेन वा सह तानूनप्त्रं समभ्यवेयात्ताएकपात्रे वा नयेत्। नास्मै द्रुह्येतात्प्र

८५=१

देव॰भा॰अ॰ ९

सिद्धं येन ब्रह्मसत्तानूनप्त्रिणो ह्रोग्ध्यस्मि तिहरिस्वामिनः १ यसंम्य निदधा
स्यपिधाय मन्त्रयेत। अभिमर्शनानंतरमध्वर्युः संततनूनप्त्रं तन्नमाज्यं पत्न्यं ग्यवं
पयित्वा अमन्त्रयेन पात्रेणापिधाय निदधाति सुगुप्ते देशे स्थापयति। अस्य ता
नूनप्त्रविनियोगमाह अपराह्णे व्रताभिश्रं दीक्षिताय प्रयच्छति। एतत्तानूनप्त्रं व्र
तमिश्रं कृत्वा तस्योपरि व्रतदुग्धं निनीयापराह्णे दीक्षिताय प्रयच्छति समर्पय
ति। व्रतनक्षत्रकाल एवानेदानीमित्येतदर्थमपराह्णे इत्युक्तं। व्रतस्य पुरुषार्थ
त्वात्तत्करणे यदा असामर्थ्यं भवति तदापि तानूनप्त्रं दीयत एव क्रत्वर्थपुरु
षसंस्कारकत्वात्। तद्दानेच क्रतो वैगुण्याय त्वे॰ तानूनप्त्रस्य व्रतमिश्रस्य
यजमानप्रदानार्थत्वादग्नावधिश्रितस्याज्यस्य ब्राह्मणयोः क्षत्रियवैश्य
योर्न क्षिप्रतिषेधात्तयोः सोमे तानूनप्त्राभाव इति संप्रदायकारः। यद्यु दक्षि
णाच तादीक्षेत यजमानायैव व्रतमभ्युक्षिच्य प्रयच्छेद्युरिति श्रौते दीक्षिता
यप्रयच्छतीत्युक्तं। बहुषु गृह्यपतयेषु। सत्रेषु बहुषु दीक्षितेषु सत्सु गृहपत
य एव व्रतमिश्रं तानूनप्त्रं प्रयच्छति नान्येभ्यः। तस्माद्यदि वहवो दीक्षेरन्गृह
पतय एव व्रतमभ्युक्षिच्य प्रयच्छेयुरिति श्रुतत्वात्। अस्य तानूनप्त्रस्य मध्ये व्र

९

वदे

तेमभ्यक्षि चाग्न्यनन्तर्द्धिं विनीयेत्यर्थः अथयात्तदेवाजुष्टास्तनूः प्रियाणि
धामानि साङ्ग ॐ समवदद्विरे तदिंद्वेयन्यदग्धतेन्यादिवाक्यशेषात्। नानूनमस्य
दीक्षितसंस्कारार्थत्वं प्रतीयते। तेननाशङ्कोषादीक्षाकालाद्भूतिमाध्वर्युर्वेवहृत्वा
पुनर्ध्रौवमुत्पाद्य पूर्वमिन्द्रेतपात्रेग्रहणाभिमर्शनादिनासंस्कृत्यादेयं। अन्यथासं
स्कारलोपाद्वैगुण्यं स्यादिति अग्नेव्रतपाइत्याहवनीयेसमिधमाधायमदंती
रूपस्पृश्य गाढतरं मुष्टिमेखलं कुरुते। अग्नेव्रतपाइत्यनेन मंत्रेण दीक्षित आह
वनीये समिधमाधाय मदंतीरूपस्पृश्य मुष्टिमेखलं गाढतरं अतिशयेन गा
ढं कुरुते। मुष्टि च मेखला च मुष्टिमेखले। समामि धमग्न्यादध्यान्यग्नेव्रतपाइति प्र
कृत्य संतरणमंगुलीरचने संतरां मेखलामिति श्रुतत्वात्। संतरणं संगतं तरां गाढतर
मित्यर्थः। अवान्तरदीक्षेयं। अतो यजमान एव करोति यत्नी च गार्हपत्येतत्कुर्या
। पत्नी च तत्कर्म गार्हपत्ये समिधमाधाय त्वमहंतीरूपस्पृश्य मुष्टिमेखलं गाढतरं
कुरुते। अनेन यजमानवत्सर्वेषां पत्नीयत्नी यजमानानामवान्तरदीक्षा भवति। क्र
मेणानानागार्हपत्यपक्षे स्वस्वगार्हपत्ये पत्न्यः समिदाधानं कुर्वंति। एकगार्हपत्य
पक्षेतु तस्मिन्नेव मदंतीरूपस्पृश्य यजमानपत्न्यः सोममाप्यायंत्यंशुरंशुष्टे

[illegible]रिति। यजमानसंबंधिनीर्मदंतीरुपस्पृश्य यजमानषष्ठा ब्रह्मोद्गातृहोत्र
ध्वर्य्वाग्नीध्राः पंचर्त्विजो ऽꣳशुरꣳशुष्टे देव सोमेत्यनेन मंत्रेण सोमममाप्याययं
ति। यजमानः षष्ठो येषां ते यजमानषष्ठाः। ते चैष[illegible]त्वाप्याययंतीति श्रुतेः। के
पुनस्ते षट्। ये केचिदिति प्राप्ते षड्ढो[illegible]नवकृत्वरेवैनं भूत्वाप्याययंतीति वा
क्यशेषात्तो हेतुः संस्तुतो बहुसंन आग्नीध्रो ग्नीध्रोध्वर्युर्वेषांदुद्गाताशर ह्व्रला
हे मंतो होताइत्येते पंचर्त्विजः। शाखांतरात्स्थषष्ठो यजमानो भवति। अथ मदं
तीरुपस्पृश्य राजानमाप्याययंतीति श्रुतेः। यावंतः सोममाप्याययंति ते सर्वे
प्रथमं मदंतीः स्पृष्ट्वा ततः सोममाप्याययंतीत्यर्थः। तथा। आप्याययंत्यꣳ
शुरꣳशुष्टे इत्यादिश्रुतत्वात्। विस्रंसस्य राजानं सहिरण्यैः पाणिभिराप्याययंती
त्यापस्तंबः। अतो मदंतीरुपस्पृश्य अनामिकायां हिरण्यं बध्वा नं कर्त्तव्यं। ततो
विस्रंसस्य सोमं सोमाप्यायनमिति। एवमेवान्येष्वपि सत्रेष्वपि पाठनमस्ति। अनेक
यजमानकत्वे करणाप्यायते। परार्थत्वात्। आप्यायनं चात्रालंभनमात्रं न सोम
प्रक्षेपः। नियतपरिमाणत्वात्। अग्निषु दादिषु चास्य मंत्रस्य विपरिणामः। अꣳ
शुरꣳशुष्टे देव सोमाप्यायतामग्नये एकधनविदे॥ आ[illegible]प्यमग्निः प्याय

म
10
दे
ठ

त्वमग्नये प्यायस्वेति॥ इंद्रस्तुतिर्यथा॥ क॰ तराव॥ सूर्यस्तुतिः॥ सूर्यायैकधनविदे॥ आ तुभ्यं सूर्यः प्यायतामा त्वं सूर्याय
प्यायस्वेति॥ वैश्वदेवस्तुतिः॥ विश्वेभ्यो देवेभ्य एकधनविद्भ्यः॥ आ तुभ्यं विश्वे देवाः प्यायतां ॥१

तामा त्वं विश्वेभ्यो देवेभ्यः प्यायस्वेति॥ सुत्यानेकत्वे सुत्ये अशीय सुत्या अशीये
त्येवमूहः॥ इति शांखायनभाष्ये। न्यग्रोधश्चेत्तस्याथाप्यायनमात्रं तूहंमी। तस्मा
निंद्रार्थत्वेन मंत्रस्याम्नासेः। अथवा पलचमसस्य यजमानचमसाप्यायागसा
धनत्वात्सोपींद्रार्थो भवति सोमवत्। अंशुरंशुष्टे देव सोम न्यग्रोधाद्वाप्या
यतां। आ युवाभ्यामिंद्रः प्यायतामा युवामिंद्राय यथायेथां। आप्यायः। तमस्मा
त्। स्वस्ति वां देवा सोमन्यग्रोधौ सुत्यामित्यूहो भवत्यस्मिन्पक्षो युक्तो यं पक्षः। आ
उपमालभ्यो पस्पृशेदपः सोममालिप्समानः। आ उपमालभ्याद्यस्यालंभानं
तरं सोममालिप्स्यमानः सोमस्यालंभं चिकीर्षुरपउपस्पृशेत्। उदकं स्पृशेत्।
शाखांतरात् तथाविपर्यस्य विपर्यासं कृत्वा। तथा। न्यग्रोधपउपस्पृशेदित्यर्थः
विपर्यासश्चेद्वा सोममालभ्याथ मालिप्स्यमानो पउपस्पृशेदित्यर्थः। शाखांत
रात्। मानवो ह्यत्रोद्धेभ्यो घिरा आनमुपचरेयुः। प्रक्षालयेरन्पाणीन् रा ज्ञो वा
ध्यानीति प्रत्येत्य प्रत्यरेनि हृव नतुत्ता नहरेत्दक्षिणेन नानावेष्टारायइति। आ
हवनीयं दक्षिणेनस्या पर्यंतीति आहवनीयाद्दक्षिणस्यां दिशि सोमोरिता। आ
हवनीयं पूर्वेण परीत्य सोमसमीपे गत्वा सोमाप्यायनं कृत्वा। ततः प्रत्येत्य प्रतिज्ञा

ष्टप्रयोगाज्जैनैव मार्गेण प्रत्यागत्य सर्वैन्वास्तरणेद्दयः षड्पि उत्तानहस्ताद
क्षिणोत्तानावा प्रस्तरे निह्नुवते प्रस्तरस्योपरि पाणी कुर्वते। उभावपि पाणी कु
र्वते। उभावपि पाणी उत्तानौ। दक्षिणो वा उत्तानः सव्यो नीच एव वा। अयं प्रस्तरे नि
ह्नुवते तेनिह्नुह्नत णाश्वलायन इति स्मृतत्वात्। अथेणाहवनीयं परीत्य राजानमाप्याय
यंतीति शांखायनः। तत्र स्रुच्यापि प्रस्तरे निह्नवः कर्त्तुं शक्यते तन्मा भूदिति प्रत्येके
स्फतं व्यूहनपरिध्यंजने कृत्वैवैके। एके शाखिनो व्यूहनपरिध्यंजने कृत्वा तानूनप्त्र
ग्रहणादेव मंत्रं कुर्वंति। अन्ये तु निह्नवानंतरं व्यूहनपरिध्यंजने कुर्वंति। तानूनप्त्रा
देरवसरविधानार्थो व्यूहनपरिध्यंजनयोरनुवादः। आतिथ्याद्याइडांतत्वेपि
व्यूहनपरिध्यंजनादीनि संस्कारकर्माणि प्रवर्त्तंते। एव संस्कारत्वादिति। प्रतिपत्ति
कर्माण्यपि प्रणीताविमोकराक्षसभागादीनि प्रवर्त्तंत एव। समन्त्रं पूर्वप्रस्तरमत्त्वा
परिधींश्चादायाहवनीयं त्यजंत्याया ३ इति। प्रस्तरं समन्त्रं प्रास्य मुहूर्त्तं संज्ञानायामित्य
नेन मन्त्रेण निवदाह यजुष्यादिषु मन्त्रेणैव देवा प्रत्यापरिधींश्च वकाराद्बुध्नतो चावदा
यत्रमीमेव सबान्परिधीन्निदधाति च हस्तेन गृहीत्वा अग्नीन्मदं त्यापा ३ इत्या
पा ३ इत्यग्नीधं प्रत्याह ब्रवीति। हे अग्नीत् आयो मदं ती ना पेन ग्लायंति त स्याव

सन्नुतनेति प्राश्नाति पूतः। अनुवादानं प्राश्नां ताभि पूजितयोरस्यनेनस-
त्रेणा। अन्नानन्नृतादिति प्राश्नार्थ इति धूर्तस्वामिनः। अथाह समुद्धृत्यप्रस्त-
रमग्नीन्मरुद्भ्यो या इदितिः निश्चतत्वात्। अत्रायं क्रमः। निरूढ्वानांतरं भाग
परिहारः। अग्निसंमार्गप्रेषः। संमार्गः। व्यूहनं विस्मोरुजि जिमिति। जुहूमभु-
क्ष्यपरिध्यंजनान सकृवाकप्रैषः। कर्कमते तु सोऽपि भवति ततः प्रस्तराद्दाना
होति मरुतीस्यग्नीन्मरुंतीत्याग्नीध्रः प्रत्याहामरुंतीस्यग्नीदाहोर्विश्रुतत्वा-
त। आयो मरुंति ग्लायंतीति प्रतिवचनार्थः। ततो मरुतां हविषुनी रिस्याहवनीयं
प्रतिहरणं ताभिरेहीति ब्रुवन्न ध्याहवनीय हुत्वाम्य स्याग्नीध्रे प्रयच्छ-
ति निधानाय ताभिरेहि ताभिर्मरुंतीभिः सह त्वमिह मंत्र समीपे आगच्छ त्वेवमग्ना-
वत्क ५ धं प्रति क्रयं यन्त्वधु यु: प्रस्तरादिकं मध्याहवनीयं हुत्वा आहवनीयस्योपरि-
ष्टात्समीपे नेवाग्निमति नीयाग्नीधाती ताभिरूह्माभिर्मरुंतीभिर रहूरस्युश्या-
ग्नीध्रे प्रस्तरादित्रिकं प्रयच्छति समर्पयति किमर्थं निधानाय। स्रुगुत्सादेशस्था-
पनार्थं। ततो ग्नी हे वं प्रेषितः प्रस्तरादित्रिकं स्रुचोऽनेस्थापयति यत्नेन। अ-
ग्नी योमीयपर्यंतंतस्य प्रयोजनत्वात्। ताभिरेहीत्यपर्युपर्यग्निमति हरति सप

प्लानुप्रहरत्येतेनत्वघ्नकूर्ह्लान्यहानिप्रचरेत्तिष्ठन्नवत्स्यथयत्तुपर्युपर्यग्नि
मतीहरतितदेवास्यानुप्रहृतभाजनंभवतितमग्नावधिप्रयच्छतितमग्नावन्ति
दधातीतिश्रुतत्वात् आथर्वणसूत्रे। आग्नीध्रस्ताः कुशैर्द्दानयतिताउप
स्पृश्यसोममाप्यायंतीति। ताः मदंतीरित्यभिरित्यादेरयमर्थः। ताभिर्मदं
तीभिः सहताः गृहीत्वात्वमागच्छेत्येवमध्वर्युराग्नीध्रं प्रेष्यन्नु पर्युप र्यग्निमति
हरति। अग्नेरुपरिसमीपमार्गेणैव प्रस्तरमग्निमतिगमयति। एतेनहीति। शा
खांतरे यद्दातिप्यायां बर्हिरन्तदुपसदांतद्दग्नीषोमीयस्ये। ति बर्हिः साधारणे र
नप्रस्तरसाधारणमनुवदतितदेवास्यानुप्रहृतभाजनंभवतीत्यर्थात्तरेणानुप्र
हरणमनुगृह्णन्तंगयद्दानायीनांप्रतिपत्तिरंता पछिन्नोपिभवत्येवेतिदर्शय
ति। तंप्रस्तरमग्नावधिप्रयच्छतितं प्रस्तरमग्नावन्तिदधात्युपसदर्थे सुब्रह्मण्यां
च प्रेष्यतिसुब्रह्मण्येसुब्रह्मण्यामाह्वयेति। ततः सुब्रह्मण्येसुब्रह्मण्यामाह्व
येत्येवंसुब्रह्मण्यांप्रेष्यत्यध्वर्युः। चकारादहनि द्याशेषसमाप्तिं चकेरोति। तस्या
नुक्तसमुच्चयार्थत्वात्। ततश्चवत्सुष्याद्व्यात्माल्लंभोदकाल्लंभौ संस्रवहोमः
। धुरिनिधानं। वेघाल्लंभाभावः। कर्कमतेद्क्षिणाग्नौ केवलापिपत्नेपाहुतिः १२

12

आथर्वणसूत्रे। आग्नीध्रस्ताः कुशैरुद्दानयंतिताउपस्पृश्यसोममाप्याययामितिताइतिमदंतीरित्यर्थः
१

तदर्थं चाहवनीयं परिस्तीर्य दक्षिणाग्नेः परिस्तरणमिस्यादौ कार्यः। वेदवि
मोकः॥ यक्षेयोऽन्त्यस्वचा बर्हिर्होमाभावः। प्रणीताविमोकः॥ शक्षसभागः भा
गावेक्षणं। भागप्राशनमिति। ततः सुब्रह्मण्याप्रैषः। आगंतुकत्वात् प्राक्तनं च
विकृताविनिन्यायात्। भौ। चरणं च सुब्रह्मण्याह्वानं शालायाः दक्षिणद्वारस्था
२५ स्थायाः पुरस्तात् दंतौ विदिहे त्रोपत्नी यजमानयोरन्वारब्धे भवतीति छंदोगसूत्रे
प्रवर्ग्योपसदावतः। अतः सुब्रह्मण्याह्वानादूर्ध्वं प्रवर्ग्योपसदौ भवतः। पूर्वं प्र
वर्ग्यः ततः उपसदिति। प्रवर्ग्यमुपरिष्टाद्वक्ष्यति। उपसदिति वक्ष्यमाणया इष्टेः
संज्ञा उपसदेव वाऽ प्रवर्ग्यो न प्रथमयज्ञ इति वक्ष्यमाणत्वात् प्रथमयज्ञो प्र
वर्ग्यः। प्रथमयज्ञशब्देन प्रथमाहार उच्यते। तेनायमर्थः अप्रवर्ग्ये प्रथमा
या२२५ हारे उपसदेवेति। यान्यत्रापि प्रवर्ग्यः। ग्ना वावेयज्ञस्योपसदः शिरः प्रवर्ग्यस्त
स्माद्यदि प्रवर्ग्यवान् भवति प्रवर्ग्येण प्रचर्याथोपसद्भिः प्रचरंतीति श्रुतत्वात्।
तस्माद्यदि प्रवर्ग्यवान् प्रवर्ग्यार्हः क्रतुः स्यात्। द्वितीयादिप्रयोगे वैकाश्यस्य
भवति ततः प्रवर्ग्येण प्रचर्याथानंतरमुपसद्भिश्चरंति यदि तु प्रवर्ग्यार्हः क्रतुः
स्यात् प्रथमाहारो वा अनवकाश्यस्यवा ततः पाठक्रमादेवानिध्यानंतरमुप

म्भिः प्रवृंजतीति तत्र श्रूयते। किमर्थं पुनरिदमुच्यते। प्रवर्ग्येण प्रचर्याथोपस
द्भिः प्रचरन्तीति तुल्यत्वेऽर्थे तावन्न भवति। तस्मादुपसद्भिर्यजन इत्यस्योत्त
रवाक्यत्वात्। नापि क्रमार्थोपदेशनं ज्ञातिथ्येन प्रचरत्यथ प्रवर्ग्येण चरि
ष्यन्त्युपसद्भिरिति क्रमस्य सिद्धत्वात्। एवं तर्ह्यनारभ्याधीतस्य प्रवर्ग्यस्य
ज्योतिष्टोमप्रकरणेऽयं पुनः पाठः कथं नाम प्रकरणेन ज्योतिष्टोमाङ्गं भविज्ञा
येतेति। ननु च सप्तदेवतातिथ्येनेत्यनेन च वचनेनानन्त्र चतुष्ठानेऽसिद्धे क्रमा
ज्ज्योतिष्टोमाङ्गं भविष्यतीत्यनर्थः पुनः पाठ नानेन तदेवं अ सति ह्यस्मिन्पुनःपा
ठे सहस्रदक्षिणादिषु विकृतिषु विशेषविहितः सन्प्रवर्ग्यः पुरोपसदः क्रियते
न ज्योतिष्टोमे। तस्मात्केवलज्योतिष्टोमप्रकरणे पुनः पाठादुपपन्नः प्र
कृतेरयं गमागः प्रवर्ग्योपसदावतत्रीति मन्त्रस्याप्येतदेव प्रयोजनं। उपसदा
वरिष्यन्त्यारिष्यन्तीत्यनेनैवावसरविधानसिद्धेः प्रथमाहारश्च विकल्पेनाग्नि
होमस्य भवति। विकल्पेनातिरात्रस्यापि। तत्राग्निहोमस्य प्रथमाहारपक्षे तत्र
त्र प्रवर्ग्यस्य विकल्पः। नेत्तिरीयादीनामग्निहोमे प्रवृत्तानां पुनर्विधानम
स्ति। तद्यदि तावद्द्वितीयादिप्रयोगविषयं कल्प्यते तेन तः प्रतिषेधाभावात्पूर्व

वचने। नेव सिद्धेर्विध्यानानर्थक्यं भवति। तस्मादाद्यप्रयोगविषयमेवै
तत् प्रतिषिद्धं प्रतिप्रसवार्थं। तेनाग्निष्टोमप्रथमप्रयोगे विकल्प्याः स च
प्रवर्ग्यश्छिन्नः वचनांतरवशात्। तथाहि श्रूयते कामं तु योऽनूचानः स्यात्तस्य
प्रवृंज्यादिति। तेनाग्निष्टोमप्रथमप्रयोगेऽनूचानस्य नित्यं प्रयोगः। अन्ये
षां नित्यमप्रयोगः। अतिरात्रप्रथमाहारे तु सर्वेषां प्रयोग एव प्रतिप्र
सवाभावात्। विहितश्चातिरात्रस्यापि पाक्षिकः प्रथमाहारः शाखांतरे
। तस्मात्प्रथमं यजमानोऽतिरात्रेण यजेतेति। तथा चोक्तं शांखायनेन। अ
प्रवर्ग्यः प्रथमयज्ञो विकल्प्यः श्रोत्रियस्येति। केचित्तु ज्योतिष्टोमस्यैवा
तिरात्रसंस्थस्य प्रथमाहारे प्रतिषेधोऽग्निष्टोमविधिरित्येवमेव व्यवस्थि
तविकल्पमाहुः। अत्राहापस्तंबः प्रवर्ग्येण प्रवर्ग्योपसद्भावरत्वेन
तु विपरीतेन प्रथमयज्ञे प्रवृंज्यात्प्रवृंज्याद्वा प्रवृंज्यादु ब्राह्मणस्य ब्रह्मवर्च
सकामस्येत्येके योऽनूचानः श्रोत्रियस्तस्य प्रवृंज्यादिति बह्वृच ब्राह्मणमि
ति। प्रथमयज्ञे तिरात्रे प्रतिषेधः। अग्निष्टोमे नित्यः। अग्निष्टोमे प्रहणा
क्तीनिश्कृतेः दुर्ब्राह्मणो यस्य वेदश्च वेदी च वउ सन्नाच त्रिपौरुषं। सवैदु ब्रा

णोऽइति। अनूचानोऽधीत स्नात इति धूर्त्तस्वामिनः प्रणीताद्युपसन्न प्र
णीतादि प्रणीताप्रणयनादिउपसद्भिर्भवति। अग्न्यन्वाधान ब्रह्म
वरणव्रतग्रहणानां। प्रणीताद्युपसन्न प्रणीतादि प्रणीताप्रणयनादिउ
पसद्भिर्भवति। अग्न्यन्वाधानब्रह्मवरणव्रतग्रहणानामभावस्योक्त
त्वात् प्रणीताद्येव घटते। तत्र प्रणीतानां यदि सर्वार्थत्वं अदृष्टार्थत्वं वा तदै
तत्सूत्रमुपपद्यते। न संयवनार्थत्वात्। अत्र संयवनं च स्याभावात्। तत्र प्रणी
तानां सर्वार्थत्वमेव युक्तं। तथा हि द्रव्यप्रकल्पनस्य परार्थत्वात् प्रणीताना
मपां अस्मिन्प्रयोगे यद्यदुदककार्यं तत्तदर्थता गम्यते। न च दृष्टेर्थे संभव
त्यदृष्टं कल्पनीयं। संयोगविनियोगाः श्रूयते प्रणीताभिर्हवींषि संयौतीति
सर्वार्थत्वेन संयवनेपि प्राप्तानामेवानुवादः। वर्तमानापदेशात्। सूत्र
कारस्याप्ययमेवाभिप्रायो गम्यते। यत् संयवनाभावेपि प्रणीताद्युपस
द्भिरित्युक्तं। ननु तत्र प्रणीताप्रणयनं यजमानमदृष्टीभ्यो योगहोत्वा
कृतं स्यं। उदककार्यं सन्ततं तत्युक्तत्वात्। इदानीमिदं विचार्यते किं पयसोभावे
योदक प्राप्तं दृष्टं पलयोराहननं भवति उत न भवतीति। किं तावत्प्राप्तं

तत्र सूत्रेणैव पूर्वपक्षं करोति । हविष्कृन्नामाह्वयानाहननमपेषणोतीक्ष्णार्थ

त्वात् । अपेषणोपेषणारहिते कर्मणि हविष्कृन्नामाह्वयाऽनाहननं भवति

हविष्कृदाह्वानकाले यद्दृषदुपलयोराहननं तन्न भवतीत्यर्थः । यथोपसमु

द्यमानयोश्चाविवक्षितमुच्यतात् । कुतः आहननस्य तीक्ष्णार्थत्वात् । तीक्ष्णीकर

णार्थत्वात् । प्रकृतौ हि दृषदुपलयोस्तीक्ष्णीकरणार्थं तत् । तीक्ष्णीकृताभ्यां

हि सुखेनावघातः क्रियते । येषणोर्थलोपान्निवर्तेत इति प्राप्ते सिद्धां

तमाह । स्याद्वा धर्ममात्रत्वात् । वा शब्दः पक्षव्यावृत्तौ । अपेषणेप्याहननं

स्यादेव । कुतः । आहननस्य धर्ममात्रत्वात् । यतस्तदाहननं धर्ममात्रमदृष्टा

र्थं न तीक्ष्णीकरणार्थम् । कुतः यतो नियतप्रहारं काष्ठकरणकं च । नहि

शम्यया त्रिसंरब्धाकेनाहननेन पाषाणस्य तीक्ष्णतोपजायते । अतो ध

र्ममात्रमदृष्टार्थमेवारादुपकारकं प्रकृतावाहननम् । तेन प्रकृतिवद्देवायेष

णेपि पयस्यायामविवक्षितमुभवत्येवेति सिद्धम् । उपसमुद्यावद्गुणः पयस्या

यां चापूर्वत्वात्प्रकृतितः प्राप्तेरभावादेव न भवति । अत्र तु निर्वापसूत्रप्रणे

यनादुपसमुभवतीति नियाम्नि काः । अतेश्चा । ग्रहे तेरस्याहननस्यादृष्टार्थत्वात्

वगम्यते। नतो दृढीकरणार्थता। तथाहि। सय त्रेधा हविष्कृतमुद्वादयति न
हैको दृषदुपले समाहन्तीति। तथास्येकं वासुरघ्नी सपत्नीघ्नी वा गुह्वदति
न घटेनामन्त्रवाचं प्रत्यक्षद्वादयति पापीयान् हि सोऽहैवास्य पत्नी भवन्तीति। अ
त्रपुरोडाशस्य हविषया अस्त्याहृत्य दृषदुपलयोराहननं असुरसपत्नहननार्थं
न दृषदुपलयोर्दृढीकरणार्थमिति प्रतीयते परिस्तरणयात्र स हि
सादनप्रोक्षणादिनिर्वपणाधिश्रयणानि कृत्वास्पचादि करोति। अत्र
ये न्यायप्रासाप्राक्तनाः पदार्थास्ते तु येन अनुष्ठानसौकर्याय न तु प्रासाः
परिसंख्यायन्ते नेनानुतजनमयाज्यनिर्वापनं तरं विदकरणं आज्याधिश्र
यणानं तरं चपर्यग्निकरणं नवस्येवापरिस्तरणं। केवलस्याहवनीयस्यैवा।
ततोर्थवस्त्वात्रागयासाद्यप्रोक्षणीः संस्कृत्य तेषां प्रोक्षणं ततः उलूखलहन
मन्त्रमवतीति केचित्। मन्त्रकारेण त्रैवसमर्थितत्वात्। अपरे त्वाहुः तस्माद
न्यतरमेवाघारमाघारयति यहि स्त्रुवेणोत्तिष्ठन्वा घारस्याघारस्यैव पुनर्वि
धानमितास्यैवं जानीत यस्मात्तदुपकारकस्याहृष्टार्थस्य परिसंख्यानार्थं
उपसर्गः। पूर्वत्व ज्ञापनार्थं च। तेनाग्र कुलु लहनस्योदकू प्रहरणोन्तरा

घारयाज्ञाज्यभागानुयाजपत्नीसंयाजदक्षिणाग्निहोमपूर्णपात्रविमु
क्रमणादिकमाहृष्टार्थमारादुपकारकमत्रैव भवत्येवेति। अतोऽपूर्व
त्वाघावस्तु नए अतेनाव देव भवति नाधिकं प्रवृत्ति प्रासंकिं चिदिति ततः
आज्यनिर्वपणं वेदबंधनं स्नग्नीध्र एवाज्याधिश्रयणम ध्रुवयोरव
पर्यग्निकरणं एतानि हृत्वा ततः स्रुच्यादानादिकर्म करोति। स्रुच्यादानेत्व
त्राघारमेव विधीयते। वेदस्तृणत्वेन स्तंबयजुर्हरणस्य प्राप्य भावात्। प्र
घस्तुपस्तदोऽपूर्वत्वात्परिस्तरणादयोपि न प्राप्नुवन्ति तथाप्यत्र पूर्वा
घारस्य विहितं तत्वात् अग्निपात्रहविर्वेधादीनां वांगप्रधानार्थत्वात्पूर्वा
घारमयुक्ताः परिस्तरणादयोत्र भवन्तीति बर्हिः प्रस्तरं हरति। स्तंबयजुर्हि
रणोध्वर्युर्बर्हिषः प्रस्तरं पुरीषरच्छादनेबर्हिः प्रच्छिद्य प्रच्छिद्य हरति नत्तु पुरीष
। अत एव बर्हिषः प्रस्तरं नोपदेशादिति ध्यायां यद्बर्हिस्तीर्णं तत्स्तनमेवति
नोद्धृतस्य पुनःस्तीर्यत इति गम्यते। अतश्च वेदस्तृणत्वादत्रैषाकरणं च्यानु
मार्जनं खननवर्जितानां वेदिसंस्काराणाम प्राप्तानांमेव वचनात्पुनःकृ
रणं मदन्तीरिति वा प्रेष्यति। मदन्तीरापादयेधर्मो बर्हिरुपसादयेत्येषे

पं६

मान

दे॰ब॰भा॰अ॰
१६

16

वंवा प्रेष्यति। प्रोक्षणीरासादयेध्मवर्हिरिति वा॥ अत्र मदन्तीनामेव प्रोक्षणी
त्वं यतः। उदकार्थत्वेन तद्रूपत्वात्। अपरे तु षष्ठ्यपदविभागामाह्नः। प्रो
क्षणीरित्येतन्मध्ववस्येव। मदन्तीरित्येतन्मध्ववतिवानवेति प्रोक्षणीर्मदन्ती
रासादयेत्येवमिति मात्राव दिध्मावर्हिः। इध्मावर्हिषोर्मात्राप्रमाणे
श्रूतानस्य रिमाणो भवति। अतएकादशकाष्ठक इध्मो भवति सामिधेनी
नां नवसंख्यत्वात्तासां प्रणवेनैकैकस्य प्रक्षेपात्। स्यश्यानुस्यश्ये चद्वैए
वमेकादशेति। वर्हिः श्रेष्ठस्तरणपर्याप्तमिति। अष्टादशसंख्याकाष्ठके
इध्मोऽस्मिन्सोमात्रावहिस्तु नं स्तुवतृतीयाः स्रुवः संमार्ष्टि। एका जुहूः
हुतीयादुपभृत्तृतीयाः स्रुवः एवं स्रुवतृतीयाः स्रुवः संमार्ष्टि। प्रैषश्चैवस्र
चौ संमृड्ढीत्येवदेयः। तथा चोक्तं मानवे प्रोक्षणीरासादयेध्ममुपसाद
य स्रुचौ संमृड्ढ्याज्येनोदेहीति संशास्तीति॥ अष्टगृहीतं जुहूं चतुरुपभृति।

तु॰

अष्टगृहीतं जुह्वामाज्यं गृह्णाति उपभृति च चतुर्गृहीतं गृह्णीयात्। प्राक्
नेएवकाले संमार्गवेदिस्तरणयोरन्तराले सत्त्रिकत्वात्। सर्वास्त्रष्टौ कृत्वा जु
ह्वां गृह्णाति चतुरुपभृतीति श्रूतेः। तस्मिन्नेव विनष्टे हरणमपूर्वत्वात्। प्रधान

१६

यागार्थमिदमाज्यग्रहणं न प्रयाजार्थं। अतो यावदुक्तं ग्रहणमात्रमेव प
क्षान्तरमाह यथाप्रकृति वा। यथाप्रकृति चाप्रकृतिवदेव वाऽसंगृह्णीयात्
। चतुर्गृहीतं जुह्वां उपभृत्यष्टगृहीतमिति। एवमपि हि श्रूयते। अथोऽन्तर
याहुश्चतुरेव कृत्वो जुह्वां गृह्णीयादष्टौ कृत्व उपभृतीति। अस्मिन्नपि पक्षे ग्र
हणं रूढमेवासंख्यामात्रस्यैव प्राकृतस्य श्रुतत्वात् एकहविरन्तरणं। एकह
दैकवारमेवान्तरन्तरणं भवति। नन्विह तिष्ठति। स्तीर्णायामपि वेदेर्वाचनि
कमेकहविरन्तरणं आज्यस्थाली ध्रुवार्थो। अत्राज्यस्थाली ध्रुवार्थध्रुवाका
र्ये भवति प्रस्तरणं जनकालेन लेध्रुवायामित्येनत्सरन्तरमल्लांजनं ध्रुवाकार्य
माज्यस्थाल्यां कर्त्तव्यमित्येवमर्थमिदं सूत्रं स्रुवाघारमाघारमाघार्यसं
मृष्टमाश्राव्य प्राव्यस्तीर्त्वहोतरित्येव ब्रूयात्। स्रुवेणाघारः स्रुवाघारः पूर्वाघा
रस्तस्यार्थः। तमाघार्य संमृष्टेऽग्नौ अग्निसंमार्गे कृते आश्राव्य सीद होतरि
त्येतावदेव ब्रूयात्। अग्निर्देवो दैव्य इत्येतस्य स्थाने। तस्मादन्यतरमेवाघा
रमाघारयतीति यत् स्रुवेणेति श्रुतत्वात् स्रुवाघारमाघार्येत्युक्तं। एवका
रेणेन्यत्पर्युदस्यते। अस्याघारस्य प्रकृतितः प्राप्तत्वान् पुनर्वचनाद्दे

हे॰ भा॰ अ॰ ८ तेनैव केवलेन प्राप्तत्वां गो यकारः क्रियमाणानीतराण्येवंगान्यत्र निवर्तन्ते अ

१७ तो पूर्वा उपसत् तेन यावदुक्तमेवात्र भवति नाधिकं प्रकृतितः प्राप्तं किंचिदि

ति सिद्धं अथाग्न्याध्यनहोतारं प्रवृणीते सा दहोतरित्येवाहेति श्रुतत्वान्नयो

क्तं। अत्र न होतारमित्यनुवादेन वा प्राप्तस्य भावात्। सीनरित्ययं तु विधिः

। उपविशति निहोतेत्यादि निवर्तमान प्रतिप्रसवः प्रस्तोतारित्याक्रामन्नग्नये

17

नुवाचयति। होत्राग्निर्होता वेत्ति निप्रस्तोतानुज्ञातोध्वर्युः स्रुचावादाय यज

ति देशं प्रत्यभिक्रामन् [illegible] क्रमणं कुर्वन्नग्नयेनुब्रूहीत्यनुवाचयति प्रस्तोतो

ध्वर्युः स्रुचावादाने स आहाभिक्रामन्नग्नयेनुब्रूहीति श्रुतत्वात्। वाचनीकमत्र

स्रुगादापनं। अप्रयाजा इडान्ताश्च [illegible] तु त्वा सोमाय जुहूमङ्गृहीनग्रह

णा यक्षेत स्यादि माज्यमग्नये हुत्वाऽपरमिद्धं सोमाय जुहुयात्। अग्नीषोमौ वे

देवानां [illegible] सयुजोतायाः [illegible] सार्द्धं गृहीतीति श्रुतत्वात् स आहाभिक्रामन्न

ग्नयेनुब्रूहीत्याश्राव्याहाग्निं यजेति वषट्कृते जुहोत्यथाह सोमायानुब्रूहीत्या

श्राव्याह सोमं यजेति वषट्कृते जुहोतीति श्रुतत्वाच्च। विस्पष्टं वैसमानीयात् उप

भृतमाज्यं जुह्वां समानीय विभज्य वे प्रदानं कर्तव्यं अनुवाचनं च समानयनं तु पूर्व १८

न् र्वेना कर्तव्यं अन्यायद्रुपभृत्याज्यं भवतीति तत्समानयमान आहवि
ष्णो. वेनुब्रूहीत्याश्राव्याह विष्णुं यजेति वषट्कृते जुहोतीति श्रवणो नाय
द्रोपभृद्धृत्यह्यगृहीतं। नदेदं स्वल्पं तदर्थमेव व्याख्येयं। तस्योपभृतस्याहं स
मानीय सोमाय हुत्वा पुनः समानीय विष्णवे जुहुयादिति। प्रनीवो जुहोत्युप
स्तुचेति प्रागुक्तः। तस्मात्तदुपस्थद्रूपेण प्रत्यंचो हूयंत इति श्रुतेश्चैते षां॰ त्रया
णां प्रधानानां होमोग्नेः प्रत्यक्तस्थः कर्तव्यः पूर्वार्द्धेग्नेः। मध्ये सोमस्य।
परार्द्धे विष्णोरिति। तथा च मानावे घृतवती अध्वर्यो इत्युच्यमाने स्त्रुवावाह
यद्दक्षिणोति कश्यप यादेवनमनुवाचयत्यग्निं पूर्वार्द्धे यजति मध्ये सोममो
पभृतं जुहूः सर्वमानीय विष्णुं पश्चार्द्धे इति सकृद इति क्रांतेनैवत्र यो विया
गाः कर्तव्याः स यस्मानंत्र तिष्ठ जुहोति न पश्चेमवरंस्तं चरतीति श्रुतेः सा
दयित्वा स्त्रुचौ सोमाप्यायनाद्यास्तु ब्रह्मणा प्रेषात्। ततः प्रत्येत्य स्वस्थाने स्त्रु
चौ सादयित्वा सोमाप्याय/नादि सो॰ माप्याय. नादारभ्य आसुब्रह्मण्या प्रेषा
तासु ब्रह्मण्या प्रेषांतमा तिष्ठ्या व न्करोति। आतेतिदि सूत्र मध्य एव विशेष मा
ह अत्वा प्रस्तरमुपसदं जुहोति स्त्रुवेण यानद्रत्ययः शयाम न्वार ब्धो जुहुयादि

18

स्रुमस्तरमत्का परिध्या दानात्पूर्वं स्रुवेणोपसदं जुहोति उपसत्संज्ञकं होमं क-
रोति। जुहूत्यस्या यवाद्ःस्रुवेणेति। याते अग्ने यःशये त्यनेन मंत्रेण यजमान
न्वारब्धेऽयःशयामुपसदं जुहोति। अनेकयजमानके एकस्यैवान्वारंभः। उ-
पसदृश्मिन्नि सामान्यसंज्ञा। अयःशयेति मंत्रलिंगाद्विशेषसंज्ञा। स जुहोति यथा
द्विरेकस्याहुः प्रचरिष्यन्नेवाग्नेयाते अग्नेयःशया तनूरिति श्रुत्वा त्वा तः। पूर्णा-
हुति प्रकृतिवेनान्वारंभः। प्रात एव परिसंख्यार्थं पुनरुक्तः। उपसत्स्वेवारंभोना-
न्येषु होमेष्विति। अग्निदेवत्यो यं मंत्रः। यातेत्री एष्याग्नेयानीति वचनात्। ततः
परिधिविधृत्यो रादानादि स्रुवस्रुच्या प्रेषांते। अत्र लोकपर्यायोपसदः प्रयोग
उच्यते चने   चतुरुपसनं ब्रह्मोपवेशनं समंत्रकं। प्रणीताप्रणयनं। आहवनी-
यस्यैव परिस्तरणं। पात्रासादनं। पवित्रच्छेदनादि तासां प्रोक्षणांतं। पात्रप्रोक्ष-
णं। आज्यनिर्वापो वेद्यःस्रुवः। आग्नीध्रवत्कान्ताधिश्रयणं अध्वर्योः पर्यग्निक-
रणं। उदकालंभः सं...णस्फ्यादानं। आलभ्यजपः स्तृतायामेव वेदिकरण-
निधानं। बर्हिषः प्रच्छेदहरणं। पूर्वपरिग्रहः। तरेखाकरणखननोत्तर
परिग्रहः। नानुमार्जनं। प्रोक्षणीभिर्दहनीरसादये ध्मां बर्हिरूपसादय स्रुचो सं

स्राद्रुपत्नीसंनह्याज्येनोदेहीति प्रैषः। सदंती शाकृत्स्याप्रयोगो वा। नस्फ्यो द्
ध्नहारः। नपात्र्योरवनेजनं। स्फ्येध्माबर्हिषां सादनं। स्रुवजुहूपभृतां
संमार्गः। संमार्जनापासनं पत्नीसंनहनं। आज्योद्वासनं। पत्न्यवेक्षणं। वेद्या
मासादनं। उत्पवनं। प्रोक्षण्युत्पवनमाज्यावेक्षणं। स्रुक्षु जुह्वामष्टगृही
तग्रहणं। उपभृति चतुर्गृहीतं विपरीतं वा इध्माप्रोक्षणं। वेदिप्रोक्षणं। ब
र्हिषः प्रोक्षणं घेरुहन्तरणं नं स्रुक्स्पृष्टं लेति विशेषः। समित्परिस्तरणदानं।
कल्पनं। नोत्सुके। परिधिपरिधानं स्पर्शानुस्पर्श इध्मयोराधानं। जुहूपभृदासा
दनं। ते आज्यस्थाल्या आसादनं। सर्वेषामालंभः। उदकाल्लंभः। होतुरामं
त्रणं। सामिधेनीप्रैषः। इदमहं नवमेन ज्योतिष्वबाधनं। प्रतिप्रणव
माधानं। आहवनीयोपवाजनं। पूर्वाघारः। संप्रैषो ग्निसंमार्गः। आ
श्राव्यासीद होतरित्येव प्रैषः। होतृरूपवेशनादि स्रुगासादनांतं। प्रसृत्तः
स्रुचावाघायातिक्रमणं ऊर्ध्वेन अग्नये नुब्रूहीत्याह। अग्निसोमविष्णुयागा
य योतं। प्रत्येत्यस्रुग्भोः सादनं। पाणिप्रक्षालनं। यजमानषष्ठानां हिरण्य
वधनं मदंतं पूषस्पर्शनं सोमाप्यायनं निह्नवः। पवित्रमतिपत्तिः संप्रैषो।

देवभा अ० १८

ग्निसंमार्गः व्यूहनं। अभ्युक्ष्य परिध्यंजनं नस्तृत्वा कुमैषः। कुर्वमनेतु
सोपिभवति। प्रस्तराहरणं। आज्यस्थाल्यां मस्यांजनं। उपसद्‌होमः परिधि
प्रसोरादानं अग्नीन्मदं स्वायाइति प्रैषः। मदः नीतिप्रस्तुतिः। मरुतामि
तिनीचैर्हरणं। तान्निरेहीति कृवनोग्नेरध्यधिहरणं। अभ्यक्ष्याग्नीध्रे सम
र्पणं। आस्मासं भोदकालंभौ संस्रावाहुतिः। देशेनिधानं वेदस्य त्र्य। विमो
कः। एकस्त हूर्दहैर्हेमिः मणी ताविमोचः सुब्रह्मण्याप्रैषस्तदाह्वानमिति द्वि
रेकपाचर रति। एकपाअयः शयादिकृयो यसदाहिश्चरति। एकेवर्चाहिरभ्य
स्येदित्यर्थः। ययाहिरेकस्याहुः प्रचरिष्य न्नवनिया ते अग्नेयः शयानन्पूरि
स्यादिश्रुतस्यान्हिरेकयोरनीत्क्रतं नलकदे व्याकांक्षायामाह सुसायप्रसुपूर्वी
ह्णे तान पोर्हयोः प्रमोगयाभे ध्येसुपूर्वाह्णप्रथमः प्रयोगः स्विवपराह्णे द्वितीयः
सायंत्राह्णना त्रापराह्णोलक्ष्यते। ऊतः सेयन्सायप्रातः प्रचरतितयाद्यवसंप
संयघ्नेसय पूर्वाह्णे प्रचरति न्तपस्य ययदपराह्णे प्रचरतिश्रुतत्वा ते। तथा
तघापूर्वाह्णेनुवाक्याभवंति भो अपराह्णे याज्या इति श्रुतेश्चो सत्रकारप्र
च्छानास्त्रा। उपसत्सु पौर्वाह्णिक्यो यराह्णिकां तरे चैपुरीषति वपंवरहति। सप

१८

ता२ मन२

19

ज्ञायां। प्रशस्तः पूर्वाह्णः सुपूर्वाह्णः। तस्य च प्रशस्तत्वं प्रथमाध्याये वद्। उद
यानंतरमेवेत्यर्थः। एवमपराह्णे पिवाच्यं। एवमितरेऽप्यन्वहं रजःश
यां हरिशयां वा। इतरे उपसदौ हि तृतीये एवमेवान्वहं कर्तव्ये। केते
इमरे रजःशयां हरिशयां च। या ते अग्ने रजःशये स्तनेनमंत्रेण हि तृतीय
दिने उपसद्धोमः कर्तव्यः। तदुपलक्षितोपसद्रजःशयेत्युच्यते। या ते अग्ने
हरिशयेति तृतीयदिने उपसद्धोमः तदुपलक्षितोपसद्धरिशया संज्ञा भव
ति। तत्रापि द्विरेकया त्रिरनीत्येव द्विरेकया तृतीयदिने हरिशयेति। एका
हस्त्र्युपसत्कः। एकाह एकसुत्यः क्रतुस्त्र्युपसत्को भवतीति स्त्र उपसदो य
स्यासौ त्र्युपसत्कः। एकसुत्ये यज्ञे तिस्र उपसदो भवंतीत्यर्थः। सर्वेति स्र उप
सद उपेयादिति श्रुतेः द्वादश वा। अथवा अत्र द्वादशोपसदो भवंति।
यद्युद्वादशोपसद उपेयादिति श्रुतेः। अपरे त्वन्यथा व्याचक्षते। एकाह
स्त्र्युपसत्कः इत्यत्र प्रक्रांते एवैकाहे पुनरेकाहग्रहणं द्वादशोपसत्त्वस्या
नेकाहविषयत्वज्ञापनार्थं। तेनैकाहस्त्र्युपसत्क एव। द्वादशत्वं त्विह पठि
तमपि शाखांतरीयवाक्यवशादुक्थ्याहीनविषयं व्याख्यायते। तथा

चवाचं। तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति। अथ द्वा सहसमा
सिं प्राप्नोतीति साह्ना एकाह इत्यर्थः केचिदेवमाचक्षते। एकाहस्योप
सत्तः ज्योतिष्टोमव्यतिरिक्तस्तद्विकार एकाहस्तस्य यस्मक एव भवति। एका
हकांड पठितः। तिस्रः साह्नस्येति वाक्यात् द्वादश वा वेतूनेएकाहे तिस्रः
स्थिता एवा ज्योतिष्टोमे विकल्पो द्वादश वा तिस्रो वेति। तत्प्रकरणे उभयस्य
विकल्पेनाम्नातत्वात्। सा वेति सत्र इति यद्य द्वादशेति च २ त्रिस्तनं प्रथमायां
दोहयति। प्रथमायामुपसदि त्रिस्तनं व्रतं दोहयति। उपसन्देववि शेषवच
नाद्दीक्षासु न नियमः एकापचये नोत्तरयोः। उत्तरयोर्द्वयोरुपसदोरेका
पचये नैकैकस्तनापसारणेन व्रतं दोहयति। द्वितीयायां द्विस्तनं तृती
यायां एकस्तनमित्यर्थः। अथातोऽग्नेतोपसदामेवेति प्रकृत्याथायासां
त्रीन् प्रथमाहं दोग्ध्यथ द्वावथैकं इति श्रुतत्वात् विपर्यस्य वाऽनग्निचि
ते। अनग्निचित्ये। अग्निचयनरहिते क्रतौ विपर्यस्य वा व्रतं दोहयति
प्रथमायां त्रिस्तनं द्वितीयायां द्विःस्तनं तृतीयायामेकस्तनमिति प्रा
गुक्तं तद्विपर्यासेन प्रथमायामेकस्तनं द्वितीयायां द्विस्तनं तृतीयायां त्रि

त्तनमित्ति एवं भवति। एवमपि हि श्रूजतां सयास मेकं प्रथमाहं दोग्धयद्दा
वृथस्त्री नित्ति। अन्नमग्निचिस्येउभयथा श्रवणात्। साग्निचित्से नुनिपमे
नाग्नि त्तनाद्यैव स्नतं भवति। अत्र हि अथान:पयो स्नत नायाइति प्रकृत्यपसत्री
त्तनानुपेतिस द्वौ त्तनाउपेतिसएक:॥ त्तनमुपेतीति पुन: श्रवणात्। अ
तोनविकल्प: एवं प्रकृद्वौ समंविभजेत। उपसत्सु द्वौ एवमेव समं विभजेत
। समं विभज्यदोहद्वये न। तद्यथा पक्षे द्वियोस्त्रिस्त्रनं द्वयो द्विस्तनां द्वयोरस्ति
त्तनं द्वयोर्द्वि त्तनं द्वयोरेक त्तनमिति। द्वादशसु चतुरहं त्रिस्तनं चतुरहं द्विस्त
नं चतुरहमेकस्त्तनमिति। एवं चतुर्मासो पसत्सु चत्वारि शदहानि त्रिस्तनादि
। संवत्सरोपपसत्सु च मासमासचतुष्टयं त्रिस्तनादि। अत एव श्रूयते यद्युद्वाद
शोपसदृतुपेयात्त्री श्चतुरहं दोहयेद्वौ चतुरहमेकं चतुरहमिति। इदानीमिदं
विचारयति। किं दंडकलितवदावृत्त्या उपसदावृत्तिरुतनखंरक्षानविवृद्धेति। उभ
यथासमविभागेनद्वृद्धि सिद्धुरनियाममप्राप्से नियममाह। खरक्षानविवृद्धि द्वा
दशाहाद्वौ उपसत्प्रवृद्धौ खरप्यनविवृद्धि: क.। तस्मानदंडकलितवदावृत्ति:। कुत:
मंत्रक्रमानुग्रहात्। खरक्षानविवृद्धौ च सोनुग्रहो न भवति। दंडकलितवदावृ

पसत्सु

नौ चक्रमेण क्रमेणाग्निबुद्धिनेषु निस्तउपसदः कृत्वा यदि चतुर्थे हनि पुनः प्रथमाग्निःयते तदा मंत्रक्रमो बाधितो भवति हरिशयाकृत्वा पुनरयः शयाकरणात् । तस्मात्स्थानविवृद्धिरेवांगीकार्या नेनाद्यासु चतसृषु अयः शयापंचम्याद्यासु च सर्वेषु रजःशया नवम्याद्यासु हरिशयेति प्रथमेह्निने अयःशया द्वितीये रजःशया तृतीये हरिशया पुनश्चतुर्थे अयःशयापंचमे रजःशया षष्ठे हरिशया पुनः सप्तमेऽयःशयेत्येव विवृद्धिर्द्वंद्वकल्पितव्याः ह्रस्वतिस्त्रः सुच्यते । द्वंद्वंव्यत्यासेसमाप्य १ कल्पनात् । यदा चैवाग्निःयते यावत्स्यउपसदो भवंति तावतीः समं त्रिधाविभज्यप्रथमभागदिने सुसर्वेषु न्वहमयःशयैव कृयते द्वितीये भागेसर्वेषु रजःशयैवा एवं तृतीये भागे सर्वेषु प्रसहं हरिशयेति । सा स्थानविवृद्धिरिति । तदेवमातिथ्यानंतरं प्रवर्ग्यमुपसदं च कृत्वा परान्हे तानूनप्त्रमिश्रं व्रतं च कृत्वा प्रवर्ग्योपसदौ कार्यौ । तानूनप्त्रमिते च वाग्बंधो नमिते च तद्विसर्गः । व्रतकरणप्रैषादि अपरान्हे व्रतकरणं । विवृद्धवा च न वाग्बंध विसर्गौ । ततो द्वितीयामुपसदि प्रवर्ग्योपसत्करणानंतरं विशेषमाह अथ सत्यात्पूर्वं हनियोवाक्कि

वया प्रचय वेदिं मिमीते। अग्नीषोमीयसंबंधिदिनमुपवसथशब्देनोच्य
ते। उपसथसंबंधि उपवसथ्यं। तस्मात्पूर्वं प्राचीने अहनि अत्र द्वितीया
यामुपसदीत्यर्थः। तत्रपौर्वाह्णिक्योपसदा प्रचर्य प्राव दिं महावेदिं मिमीते।
ननु वेदिं द्वितीयायामुपसदीति किं नोक्तं। उच्यते। तत्र षड्ढा द्वादश वा ततो
धिकाश्चोपसदस्तत्र उपवसथ्यात्पूर्वेह्न्येव वेदिमानं कथं स्यादिति मंत्रे
वेष्यते। अत उपवसथ्यात्पूर्वेहनीत्युक्तं। अग्नेरथयमथोगम्यते। वेदि
मानं प्रकृत्य सांख्येनेताः रात्रिवसतीत्येकाश्चाभ्रते उपवसथं कर्मोपदिश
ति। तनैव ज्ञायते। वेदिमानमोपवसथ्यात्पूर्वेह्णि भवंतीति। अथ वेदिः
स्थानमाह पूर्वार्धात्स्तंभात्पुरस्तात्त्रिषु प्रक्रमेषु शंकुं निहंति सोंतः पात्यः
न५ ।शालायाः पूर्वार्द्धेभवः पूर्वार्द्ध्यः। तस्मात्पूर्वार्द्धात्स्तंभात्पुरस्तात्पूर्वस्यां दि
शि त्रिषु प्रक्रमेषु अतिक्रान्तेषु एकं शंकुं निहंति भूमिमध्ये गमयत्युपरि मुद्गर
द्विभिः उद्धनेनाभिनिहतः शंकुरंतः पात्यसंज्ञको भवतीति पित्र्ये भनतिकर्द
यः। अत्र स्तंभग्रहणेन संमितं शालायाः पूर्वद्वारस्य मध्यं लक्ष्यते। तेन शा
ला द्वारमध्यात्प्रक्रमणं कार्यं। न गृहं सपूर्वार्द्धो वर्षिष्ठस्थूणाराजो भवति। तस्मा

त्मा उद्ग्रक्रामति त्रीन्विक्रमांस्तच्छंकुं निहंति सोंतः यान इति श्रुतत्वात् शा
लायाः पूर्वार्द्धे भवं स वोर्द्धः अन्याभ्यः स्थूणाभ्योतिशयेन महान्वर्षिष्ठः म
हत्तमः स्थूणानां राजेव स्थूणाराजः। तस्मादिति ल्यो गलक्षणं पंचमी। प्राङुद्
क्रामतीति देशलक्षणं। ततस्त्रीविक्रमस्य यास्मिन्प्रदेशे शंकुं निहंति। स दे
शोंतः। अंतः पतति शालाद्वार्यस्य वेदेश्चेत्यंतःपातः सामर्थ्यात्। कर्तरि यु
ट्। देशनामेतत्। तद्यदेवात्रांतस्पात्यदेशउक्तः स्थूणयेति। तत्र यासौ त्रामत्यां दी
क्षावस्थाव यजेतांतःपात्ये श्रेयनपत्राभ्यामिति। तन्न श्रूयते जघनेन वेदिं प्रांच
मात्रं तमिति तत्र तद्देवोपपद्यते यदा देशवाच्यंतःपात्यशब्दो भवेदिति। वि
क्रमशब्देन पदद्वयमुच्यते तस्मात्पुरस्तात्षड्विंशतिः। समस्येकवचनमे
तत्षड्विंशत्याद्याः सदेकत्व इत्यकत्वात्। तस्मादंतःपात्यात्पुरस्तात्प्राच्यां
दिशि षड्विंशतिप्रक्रमेषु अतीतेषु शंकुं निहंतीत्यनुवर्तते। तस्मान्मध्यमा
च्छंकोः प्राङ्. षड्विं. शत्तं विक्रमान्प्रक्रामति तच्छंकुं निहंति सपूर्वार्द्ध इति
श्रुतत्वात् दक्षिणोत्तरे च पंचदश पंचदशसु। तस्मादित्यनुवर्त्तते। तस्मा
दंतःपात्याद्दक्षिणोत्तरे दक्षिणस्यां दिश्युत्तरस्यां च पंचदश पंचदशसु प्र

प्रक्रमेषु भ्रमो एप यर्थं एकैकं शंकुं निहंति। तस्मान्मध्यमाच्छंकोर्दक्षिणो
यं चद्दशविक्रमान्प्रक्रामन्निनच्छंकुं निहंति सा दक्षिणा श्रोणिः। तस्मान्मध्य
माच्छंकोरुदङ्ङ्यं चद्दशविक्रमान्प्रक्रामन्निनच्छंकुं निहंति सोत्तरा श्रोणिरिति
श्रुतत्वात्। अत्र पक्षांतरमाह।। ।।अर्द्धसंप्तदशेषु वा। तस्मादेवमध्यमशं
कोर्दक्षिणोत्तरावर्द्धसप्तदशेषु वा प्रक्रमेषु शंकुं निहंति। अर्द्धः सप्तदशो ये
षांते अर्द्धसप्तदशाः। तेषु अर्द्धसप्तदशेषु सार्द्धेषु षोडशेष्वित्यर्थः। एवं स
ति त्रयस्त्रिंशत्प्रक्रमा यष्ठ्याद्दक्षिणोः स्यात्पंचदशसिति पक्षे चत्रिंशत्प्रक्र
मा उभयपार्श्वे यते अयं यस्त्रिंशद्विक्रमा पश्चाद्भवति। अथो अं
पि त्रयस्त्रिंशतः स्फ..रिति च पूर्वार्द्धात्त्रयोदशसु द्वादशसु पूर्वार्द्धे भवः
पूर्वार्द्धः शंकुः यः षट्त्रिंशत्प्रक्रमेषु निहतः। चकारेणैव दक्षिणोत्तरावित्यनु
कृष्यते। पूर्वार्द्धाच्च शंकोर्दक्षिणोत्तरो द्वादशसु द्वादशसु। पूर्वार्द्धे भवः पू
र्वार्द्धः शंकुः यः षट्त्रिंशत्प्रक्रमेषु निहतः।। चकारेणैव दक्षिणोत्तरावित्यनु
कृष्यते। पूर्वार्द्धाच्च शंकोर्दक्षिणोत्तरो द्वादशसु द्वादशसु प्रक्रमेषु वेघसनि
ष्पश्यर्थं शंकू निहंति। तस्मान्मध्यमाच्छंकोर्दक्षिणाद्द्वादशविक्रमान्प्रक्राम

ति ष्ठं तुं मिहंति सद्दक्षिणोर्ध्वः सरल न्यासमध्यमाक्षं क्रोशद्वयं दशविक्रमान्प्र
क्रामति तच्छ्रं तुं निहंति सउत्तरोर्ध्वः समध्यमामाचावे देशितिश्रुतत्वात। अथयच
त्तुरूर्ध्वः शतिविक्रमापरस्मान्द्रवतीति श्रुतत्वाच्चा अत्रायं साधनोपायः
क्राठके सोमिकं वेदिं विधिन्सत्वं चदशसु क्रमेषु लक्षणं रु.रु.तेत्रिपदः प्र
क्रमोर्द्धं व तुर्थ पदो वा पदं यं चदशांगुलं द्वादशांगुलं वा। तत एक विंशती
तत स्त्रिषु ततस्त्रि षु ततो द्वादशसु पाशः पूर्वेण मग्रंशं त्रिषु प्रक्रमेषु शंकुं
निहंति तस्मिन्पाशं प्रतिमुच्य प्राचीमायम्य यदेक विंशतौ तत्र शंकुं निहं
ति तस्मिन्पाशं प्रतिमुच्य पंचदशसु गृहीत्वा दक्षिणायम्य शंकुं निहंत्येतेनोत्त
रांतो व्याख्यातः एवं पूर्वार्द्धं विदधाति त्रिषु गृहीत्वा द्वादशसु तत्र शंकुं निहंती
ति। परिशिष्टे चापं चदशम थैक विंशं त्रिक मपरं परतास्त्रिके चापि द्वादशसु पा
शउत्तमः सोमेरज्जुममाणेमेतताः रज्वा पंचदशसु प्रक्रमेष्वेकं लक्षणं कृत्वा एवं
कर्णार्थमाकर्षणार्थं च तदेवांततः पंचदशसु कृता ह्न क्षणात्परं एकविंशे
प्रक्रमे द्वितीयं लक्षणं। प्राच्यंतां कर्णार्थं ततः परं त्रिषु प्रक्रमेषु तृतीयां आ
कर्षणार्थं। ततोपि परं त्रिषु चतुर्थी। अंसां कर्णार्थं। ततः परं द्वादशसु प्रक्र

त्रिं० शत्पदानि प्रक्रमावा पश्चात्तिरश्चीं नवतिषट्त्रिंशत्प्राची चतुर्विंशतिः पुरस्तात्तिरश्चीति सौमिक्या वेदेर्विज्ञायते षट्त्रिंशिकाम्प्रदशोपसमस्यापर
स्मादंशाद्द्वादशसु लक्षणं पंचदशसु लक्षणं पृष्ठ्यांतयोरंतौ नियम्य पंचदशके न दक्षिणायाम्य शंकुं निहंत्येवमुत्तरतस्ते श्रोणी विपर्यसायांसौ पंचदशिके नै
वापायम्य द्वादशके शंकुं निहंत्येवमुत्तरतस्तावंसौ तदेकरत्वा विहरणमित्यापस्तंबः। प्रक्रमो द्विपदः त्रिपदो वा प्रक्रमो याया कामी शब्दस्य विपर्यस्त्वा यजमा
नस्याध्वर्यो नैष हि चेष्टा नाकर्ता भवतीति च॥ दक्षिणांसे सुद्दयपदं पंचदशेति बौधायनः॥


मेष्टं तिमः पाश इति। एवं च तु: पंचाशत्प्रक्रमा रज्जुर्भवतीति। तथा चोक्तं शु
ल्बसूत्रे प्रमाणोद्दिष्टं चाभ्यस्यास् अष्टौ लक्षणकरोनित नितरं सनमिति। तथा
शास्त्रवद्दीर्घचतुरश्रस्येत्युक्तम्। तेन प्राग्वंशवेदिमानानि व्याख्याता
नीति चोक्तं। अत्र रज्जोः प्रथमं पाशमन्तः पार्श्वे प्रमुच्य प्राचीनिष्यां घ पंचदश
मध्ये कविंशमिस्येकविंशे शंकुं निहत्य तस्मिन्नंतिमं पाशं प्रतिमुच्य पंचद
शेऽकृतेन लक्षणेन रज्जुं दक्षिणातः आकृष्य पंचदश एव शंकुं निखनेत्। सा द
क्षिणा श्रोणिः। तेनैव गृहीत्वोत्तरत आकृष्य तत्रैव शंकुः सा उत्तरा श्रोणिः
। ततस्त्रिकमपरस्मिन्स्प नेन गृहीत्वा दक्षिणतो रज्जुमाकृष्य परतस्त्रिकमिस
स्मिन्शंकुः स दक्षिणोंसः। ततस्तेनैव गृहीत्वोत्तरत आकृष्य तत्रैव शंकुः स उ
त्तरांस इति। अत्र यूपावटाङ्कोः पश्चात्पदमात्रं यश्चादंतराले मुक्त्वा युग
मात्री यजमानदशपदप्रमाणो वोत्तरा वेदिः साधनीया। प्रक्रमश्चानग्निके
सौमे द्विपदः। तथा च परिशिष्टे उक्तं। आधाने द्विकं कुर्यात्सौमिको द्विपदो
भवेत्। अग्नौ तु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुध इति। अत्र पंचत्रिंशत्प्रक्रमा
पश्चादिति पक्षे सा धनोपायः। त्रयस्त्रिंशत्प्रक्रमेषु षट्त्रिंशत्प्रक्रमां रज्जुं द्विगु

वदनं २४

मध्य लंबं ३६ | मम बु ६

मुखं: ३०

अस्याः क्षेत्रफलं। मुखवदनसमासार्द्धं मध्यमलंबेन संगुणयेत्। तत्र मुखं: ३० वदनं २४ समासः ५४ अर्द्धं २७
मध्यमलंबेन गुणितेन फलं



णांहृत्वा प्रतिप्रक्रमां कृत्वा तस्यां सा हुं षोडशे प्रक्रमे श्रोण्योः कनार्थं लक्ष
णं कृत्वा सप्तविंशतितमे शिरश्छेदनं श्रोणिसाधने रज्ज्वाकर्षणार्थं। षट्त्रिंश
त्तमे च यूपावटशंक्वर्थं। ततः परं नवसु प्रक्रमेषु अंससाधनकाले रज्ज्वा
कर्षणार्थं ततोऽतिमात्याशाद्वादशे प्रक्रमेऽसांकनार्थमित्येवं विधया रज्ज्वा
साधनं अत्राह आपस्तंबः। प्राग्वंशस्य मध्यमाल्ललाटिकान्निःप्राचः प्रक्र
मान्प्रक्रम्य शंकुं निहंति तस्मात् चतुर्दशसु दक्षिणत एवमुत्तरतः श्रोणी।
प्रथमं निहतात् शंकोः षट्त्रिंशति पुरस्तात् तस्मात् द्वादशसु दक्षिणत एवमुत्तरत
स्तावंसौ। विमिमते इति विमानं; सर्वं तस्य यथायथं ततोऽतिमध्येपृष्ठ्यामिति
।अत्र वेदिः; सर्वतो रज्ज्वावेष्टनमुक्तं तया। वेदिं करोति दर्शपूर्णमासवत्सं
नम[illegible]नवर्जमिति संमननं च। मध्ये संगृहीतत्वात् तथा चोक्तं दर्शपूर्णमासयोः
।मध्ये संनततरा भवतीति। अतो महावेद्यां संनतत्वाभावः। स्फ्यामापस्य
स्फ्यादिकं करोति खादिरेणाच्छादनात्। ततो वेदिपरिसमूहनेन उत्करणे चाग्नी
ध्रादिके [illegible]तेऽध्वर्युः स्फ्यामायस्य अंतः पात्यादारभ्य यूपावटपर्यंतं स्फ्या
संज्ञकं वरंडकं सर्वापराय्यं निष्पाद्य ततः स्फ्यादि स्फ्यादानादारभ्य आ[illegible]

छादनात् छंन्नावसतीत्येतदं नं वस्त्रामघासवद्दत्र खादिरेणास्येच नक
रोति। ननु च खादिरः स्फ्य इति परिभाषितत्वात् खादिर एव स्फ्यः किमर्थं
पुनरुच्यते खादिरेणेति। अत्रोच्यते। तस्मात् खादिरो यूपो भवति खादिरः स्फ्य
इति स्फ्य यूपयोरेकजातीयत्वं श्रूतं। तत्र पदिखदिराभावे सोमे बैल्वो वा
रोहीतको वा यूपः स्यात् तदा स्फ्यस्यापि तज्जातीयत्वा शंकानिवृत्यर्थं पु
नः खादिरेणेत्युक्तं। पृष्ठे भवा पृष्ठ्या। वेदिपृष्ठे लेखामायतां कृत्वेति पि
तृभूतिः। वरंडकमिति कर्कः। पृष्ठ्येति संज्ञाकरणं संव्यवहारार्थं। अनुष्ठा
बर्हिस्तृणातीत्यादौ अत्रायं क्रमः पूर्वं शालामध्यात् त्रिषु प्रक्रमेषु शंकुनि
खननं। ततो हविरासनं ब्रह्मणः सभं त्र्यक मुत्तरवेदिदेशं दीक्षणेनो बर्हिर्वि
ष्युपवेशनं। वेदिस्पृष्टस्य यजमानस्य च। यजमानवाचं यच्छेत्येषः। त
तोग्निहोत्रहवण्यादीनां वेदीमानोपयोगिनां पात्राणामासादनं शालाद्वा
र्यस्य पश्चादुत्तरतो वा। वाग्यमः पवित्रछेदनादि तेषां प्रोक्षणं। प्रोक्षणीनां
पवित्रयोश्च यत्नेन रक्षणं। ततो वेदिमानं। परिसमूहनं। उत्करकरणं। प
स्याकरणं। ततस्फ्यादानादि। अनियतत्वादेशान्तं ब यजुर्हरणे प्रासेआ

ह उपरवदेशान्तं बयजुर्हरति। उपरवाणां देशस्थानमुपरवदेशः। तत्र उ
परवदेशे यत्रोपरवा भविष्यंति तस्माद्देशान्तं बयजुर्हरति। शाखांतरात्
। उपरवदेशं चाचार्यः स्वयमेव वक्ष्यति। दक्षिणस्यानसोधः प्रउगं
खनत्य परवानिति। स्पष्टादानमप्युपरवदेश एव कर्तव्यं। तदर्थत्वात्। दे
शांतरस्यानुपदेशाच्च। अधुना चात्वालस्य स्थानमाह। उत्तरार्द्धे सात्पश्चा
द्धिष्ण्यपदे चात्वालं। वेदेर्यदुत्तरार्द्धे सः। ततः पश्चाद् धिष्ण्यपदे प्रक्रमत्र
यपरिमिते प्रदेशे चात्वालं भवति। अत्र प्रक्रमद्वयपरिमाणं पदं तस्मि
न्नर्द्धाधिके इत्येवमत्र आध्यर्द्धे पदे इत्यस्यार्थः कुतः प्रतेनैत यादृश
त्वात्। अथ यशम्यां चस्फ्यं चादनेन घरएषपूर्वार्द्ध उत्तरार्द्धः शंकुर्भवति
तस्मात्स्यपञ्चक्रामति त्रीन्विक्रमांस्तु चात्वालं परिलिखतीति पित्रम्
तिस्तु अध्यर्द्धे हे पदे अति आति क्रम्य चात्वालं परिलिखेत्। पदशब्देना
त्र प्रक्रम उत्त्याप्रतता त। इति व्याख्यातवान् यथोक्तं वा॥ अथवा
यथा प्रागुक्तं पूर्वेणोत्करं संचरं परिहाप्येति तत्र वा चात्वालं परिलि
खेत्। यत्रैव स्वयं मनसा मन्येनात्रेणोत्करं तत्र चात्वालं परिलिखेदिति अ

तेः। चात्वालशब्देन पुरीष्यार्थः स्थानो ऽभिधीयते। परिशिष्टे त्वेवमुक्तमस्ति।
चात्वाल उत्करं च कुर्यात् पूर्वपरे ऽग्ने रथांतरं वा उत्करात्तु उत्तरतः कुर्यात् बध्यस्य परथांतरं
। उक्तं बध्यात्पूर्वतः कुर्यात्। इमित्र स्परथां तेर मिति। अत्र स्फ्याशम्या दानाद्यु
त्तरवेदिच्छादनांतमिह कर्तव्यं। छादने विशेष आपस्तंबेनोक्तः। उदुंबर
शाखाभिः प्लक्षशाखाभिर्वा प्रच्छन्ना वसतीति। तथा चात्वाल शब्द ग्रह
क्रमेषु पूर्वम्परिग्रह इति चात्र वस्तु पूर्वाह्णे एव कर्तव्यं। ततो परा ह्णे व्रतं प्रदा
यप्रवर्ग्योपसदौ। वाग्यमादिपूर्ववत्। अथ सुत्यायामाग्निं नक्तमाह
॥ ॥ प्रातरुपसदौ समस्यापातरिष्टोपवसथ्येहनि षदि मानदिनाह्नि ती
ये हनि उपसदौ समस्या अग्निं प्रणयनं निवक्ष्यमाणेन संबंधः। समास
श्चपौर्वाह्णिक्यापराह्णिक्योर्द्वयोरप्युपसदोः पूर्वाह्ण एव करणं। तत्र विशे
षमाह पौर्वाह्णिक्या प्रचर्या ह्वत्रतं प्रयच्छति। तयोरुपसदोर्मध्ये पौर्वाह्णि
क्योपसदा प्रचर्य पौर्वाह्णिकीमुपसदं कृत्वा यजमानाई व्रतं प्रयच्छति। न्या
परस्परसमानत्वात्प्रत्येक च तथा च मानवे उत्तमायां उपसदि पौर्वाह्णिकीकृ
त्वा शाखामच्छेति अर्ह व्रते व्रते प्रदायसद्यः कुर्यादापराह्णिकीमिति सो परा

हे वेदिठं: स्तोर्वाईं व्रतं प्रदाय संप्रपद्यं तद्दनिवक्ष्यमाणत्वात् दर्ढ व्रतं प्रा
दुग्धमितिगम्यते। यजमानः पत्नी च तदानीमेव व्रतयतः। व्रतस्यार्द्धं सम
विभक्तं अर्द्धव्रतं। अर्द्धं नपुंसकमिति समासः। तेन यावद्दुग्धार्थं दुग्धं भव
ति त्रिस्तनमेकस्तनं वा तस्य समविभक्तमर्द्धं दद्यात् न न्यूनमितिरिक्तं वा
सर्वं वाग्नौ॥ अग्नौ चयने योर्वाद्विकयोपसदो प्रचर्य सर्वं वा व्रतं यजमा
नाय प्रयच्छेद् अर्द्धव्रतं वा। तथा श्रवणात्। प्रत्येकस्य प्रवर्ग्योपसद्भ्यां प्रचरति
प्रवर्ग्योपसद्भ्यां प्रचर्याऽस्मै व्रतं वाऽर्द्धव्रतं वा प्रयच्छत्यथ प्रवर्ग्योपसद्भ्यामि
ति। अग्निचित्येनियमेनार्द्धं व्रतमेवासाग्निचित्ये तु विकल्पः॥ ॥उभाभ्यां
चरिते प्रवर्ग्यमुत्सादयति यथोक्तं कुर्याद्वैतत्। उभाभ्यामुपसद्भ्यां चरिते प्रव
र्ग्यं महावीरं यथात्तमुत्सादयति यथा प्रवर्ग्याध्याये उक्तं। उपसदंते प्रवर्ग्यो
त्सादनमित्यर्थः। चेद्यदि श्रोत्रियोऽनूचानः प्रथमं यज्ञेपि प्रवर्ग्यं कुर्यात्। तदान्ना
वत्सरे प्रवर्ग्योत्सादनं कुर्यात्। सर्वेदृतीयेह न्पष्ठे वा द्वादशे वा प्रवर्ग्योपसदोस
मस्य प्रवर्ग्यमुत्सादयतीति श्रुतेः॥ ॥अग्निं प्रणयति। अप्रवर्ग्ये उपसत्समा
नंतरमग्निं प्रणयति। सप्रवर्ग्ये च प्रवर्ग्योत्सादनानंतरमिति यथा वरुणप्र

26

ह्यासेउक्तं। अत्र मार्वेदिमुत्तरेणोवेध्मानयनकर्तव्यं। वरुणप्रघासेषशो चा
पस्तंबलौगाक्षिसूत्रयोस्तथादर्शनात्। इध्ममभ्याहधस्तुपयनीरूपकल्प
यंतीत्यत्रत्याराभ्यांतरवेदावग्निनिधानांतस्येह श्रुतत्वात्। औपनिवपना
न्कृत्वा हविर्धाने स्थापयन्ति दक्षिणामुन्नयतोद्धारस्यांतरे प्रक्षालितेमा वोउ
न्नयतः शालामावर्त्येत्याइध्माभ्याधानोह औपनिवनादुपयमन्युपनिवप
नामग्निप्रणयनान्तं कर्मकृत्वा प्रक्षालितेप्रह्वकर्षणो द्वौ नेह हविर्धाने अन
सो शालाउन्नयत आवर्त्येवेमध्ये दक्षिणामुन्नयतो द्वारंभ्यंतरे परस्परमर
तिदूयांतरालयुते प्राचीप्राङ्मीबे स्थापयन्ति। पत्निहविर्धाने उपतिष्ठेते
समवर्त्तयंतीत्यादिश्रुतत्वात्। प्रणिते प्रक्षालितो प्रक्षालने चोकरे प्रय
मं कुर्यात्। कृत्वाएकं हविर्धानं मध्वर्युग्रहणातिद्वितीयं प्रतिप्रस्थाह विःसो
मोधास्यते अनयोरितिहविर्धाने अनसा उन्नएनत। साक्षस्यसंतापमु
पानकास्य क्षादेः शकटस्यदर्शनात्। तेप्रणीनेउपतिष्ठन्ति शालासमीपे
तिष्ठतः। तेसमवेति। नेह हविर्धाने अनसावेदिमवनार्यसन्निकृष्टवर्तयंतिग
मयंति। दक्षिणमभितः। कथंसमवर्त्तयंति। यद्दक्षिणोमनः स्थापयिष्यनेनद्

देव भा अ ८
२७

क्षिणे नैव संवर्त्तयंति यदुत्तरेणास्थापयिष्यन्तेनदुत्तरेणैव पार्श्वे न वेदिः
संवर्त्तयंति। अनसो महत्वादेकैके संवर्त्तनं कर्तुमशक्यमिति अतो बहु
वचनं। ततश्चाध्वर्युः स्वकीयं रथं वेदिं दक्षिणेन नीत्वा शालाया दक्षिणेनो
नीत्वा प्रदक्षिणमावर्त्य दक्षिणेनैव प्रत्यानीयांतःपात्यसमीपे वेदिम
ध्ये दक्ष्यातो दक्षिणेनः प्राञ्चं संस्थापयति। प्रतिप्रस्थाता तु स्वकीयं हविर्द्धा
नं वेदेरुत्तरेण शालाया उत्तरेण च नीत्वा प्रदक्षिणमावर्त्य शालाया उत्त
रेणैव प्रत्यानीयांतःपात्यसमीपे वेदिमध्ये दक्ष्या यदुत्तरतः प्राञ्चं संस्था
पयति। अ[illegible]तरद्गुति दक्ष्यातो दक्षिणेनोरत्निमात्रे दक्षिणं। उत्तरतोरत्नि
मात्रे उत्तरमिति परस्परमरत्निद्वयमंतराले भवति वर्षीयो दक्षिणं तयो
र्हविर्द्धानयोर्मध्ये यद्वर्षीयो तिशयेन महद्वृत्तरं तद्दक्षिणं स्यात्। अथो
कनीय उत्तरतः। यद्वर्षीयस्तद्दक्षिणं स्यादिति श्रुतत्वात्।। अत्रैव मानवे
विशेषः। हविर्द्धानयोः प्रथमक्लृप्तानां ग्रंथीन् विस्रंस्य प्रक्षाल्याभ्यज्याभिन
त्यांभितः दक्ष्यामरत्निमात्रेव स्थापयंति बहिर्वेदि चक्राण्येतं तर्वे यूपस्तंभय
तीति काठके च।। सच्छदिषयोर्हि हविर्द्धानयोः ग्रंथीन्विस्रस्य प्रक्षाल्याभ्यज्याभि

27

तः । दक्षिणमवस्थापयतीति ॥ आपरास्वे च ॥ प्रक्षाल्यानयोः पश्चाद्ग्रथितानां ग्रंथी
न्विस्रंस्य न चानप्रज्ञातान् कृत्वाग्रेण प्राग्वंशमभितः पश्चादवस्थापयती
ति ॥ नयोश्छदिरध्यस्यति ॥ नयोर्हविर्धानयोः परिच्छदिरध्यस्यतीत्याधि
उपरि तस्यानिक्षिपतीति निदधातीत्यर्थः । तृणमयः कटश्छदिः । नयोः स
मवद्य नयोश्छदिरधिनिदधातीति श्रवणात् । नयोर्नसोः सन्निकृष्टयोरुप
रिच्छदिस्तृणकटादि निदधाति यजमानपुरुषः ॥ मितिं वा भावो छदिषो
ऽभावे मितिं छदिषा तुल्यां वेणुशकलैः कृतं किलिंजं हविर्धानयोरध्यस्यती
ति शेषः । यदि छादिं न विदेयुश्छदिः सम्मितां मितिं मिनुयादिति वचनात् । अन्यत्रा
पि ॥ अन्यत्रापि छदिः सिद्धे छदिषो भावे मितिस्तत्कार्यं भवतीति प्रसंगादुक्तं
र । राघांपुरस्तादासज्य ऐषीकीं ॥ इषीकाः वीरणशरादीनां दीर्घाग्रशस्त
काः तन्मयी ऐषीकी । तां ऐषीकीं इषीकामयीं रराटीं हविर्धानयोः पुरस्ताद्भा
गे आसज्य अवलगयति । प्रस्थानस्थं तिरश्चीनामिति श्रुतेः । ततः पूर्वस्यां दि
शि प्रस्थानस्थं ति । अभिमुखं प्रतिबध्नंति । किं रराटीं रराटं ललाटं । तत्र भवा र
राटी । ललाटपट्टिका । तां इषीकामयीमिति शाखांतरात् । रराटीहविर्धानस्य

पूर्वद्वारे उपरि ह्यात्कटिके ति धूर्तस्वामिनः उच्छ्रयीभ्यां परिवार्यच्छदिः
। परिश्रयणार्थाभ्यामुच्छ्रायीभ्यां कटाभ्यां हविर्धाने अनसी परिवार्य परि
वेष्ट्य च्छदिर्निदधाति पश्चाद्ववकारात्प्रथमं निर्हितस्य च्छदिषः पश्चाच्चच्छ
दिर्निदधाति। अस्य च पश्चान्निधानोपदेशात्पूर्वस्य त्रोपदिष्टस्य च्छदिषः
पुरस्तान्निदधानमिति। परिश्रयंस्तुच्छ्रायीभ्यां च्छदिः पश्चादधिनिदधा
ति च्छदिः संमितां वा मिन्ति मिति श्रुतत्वात्। अस्यार्थः। परिश्रयंति समं
ततस्ते अनसी वेष्टयंति। केनाउच्छ्रायीभ्यां। उच्छ्रायेते इत्युच्छ्रायौ पार्श्वक
टकौ। तयोरेका हविर्धानस्य पूर्वद्वारदक्षिणद्वार्यात आरभ्य दक्षि
णतः पश्चिमद्वारदक्षिणद्वार्यावदुच्छ्रीयते। अपरा च पश्चिमद्वार
स्योत्तरद्वार्यात आरभ्योत्तरतो यावत्पूर्वद्वारस्योत्तरस्थूणा। ततश्छदि
रपरं कटं पश्चात्प्रथमस्य च्छदिषो निदधात्युपरि हविर्धानयोः। च्छदिस्त
त्वं वा कलंजीर राघाते जनीत्मन थीनरमितिति पिन्न... निः चतुर्गृहीतं
शाला द्वार्ये जुहोति पुंजन इति। एवं हविर्धाने सज्जीकृत्याध्वर्युः शालां प्रवि
श्याज्यं संस्कृत्य चतुर्गृहीतमाज्यं परिस्तरणसमिदाधानपूर्वकं शालाद्वार्ये

ग्नौ जुहोति। युंजते मन इति मंत्रेण। अथ पुनः अपरं चतुर्गृहीतमाज्यं
गृहीत्वा सावित्रं प्रसवाय जुहोति स जुहोति युंजते मन इति अनंतत्वात्
स गार्हपत्यो ऽतः। अतः परं स शालाद्वार्यो गार्हपत्यो भवति गार्हपत्य
कार्यकर्तृत्वमित्यर्थः। शालामुख्यीय एवात ऊर्ध्वं गार्हपत्यो भवति। निश्चव
णात्। न त्वेवं कौंडपायिनामयनेऽग्निहोत्रदर्शपूर्णमासादौ इह विश्वपण
मपि शालाद्वार्य एव स्यात् चोदकेन तत्रापि शालाद्वार्यस्य गार्हपत्यत्वात्।
सत्यं चोदकादेव। अग्निहोत्रादिनामधेयानुनेयमिकाग्निहोत्रं च मुख्य
एव गार्हपत्ये अयणं प्रापितं तत्र चोदकाद् लौपदृत्युक्तं एतत्र ज्योतिष्टोम
प्रकरणे पठितत्वात् ज्योतिष्टोमार्थो प्रसंगाद्धग्नीषोमीये पि गार्हपत्यका
र्यमगार्हपत्येऽक्रियते तस्यापि ज्योतिष्टोमपरतंत्रत्वात्। अतः स्वतंत्रे पुनि
रूढादिष्वेतं न भवति। अत एवाग्नीषोमीयोपभोगेऽपि निरूढादिषु वेदिर
पि सोमर्वन्तम भवति। आपस्तंबेन च पशुबंधेष्वेवमुक्तं। एष पशुबंधस्याह
वनीयो यतः प्रणयति स गार्हपत्य इति अपरं दक्षिणे वर्त्मनि दक्षिणा
स्यानतो हिरण्यं निधायाभिजुहोतीहं विस्मुरिति। पुनराज्यं शालाद्वार्य एव

दे०व०मा०आ०
२८

29

संस्कृत्यापरं चतुर्गृहीतेन गृहीत्वा दक्षिणस्यानसो दक्षिणस्य हविर्धानस्य
दक्षिणे वर्त्मनि दक्षिणे चक्रमार्गे हिरण्यं निधायाभिजुहुयादिदं विष्णुरित्य
नेन मन्त्रेण। अत्रापि हिरण्यस्य परिस्तरणं कृत्वा तस्योपरि चतुर्गृहीतं जुहुया
त्। अथापरं चतुर्गृहीतमाज्यं गृहीत्वोपनिष्क्रामतीति प्रकृत्य स दक्षिण
स्य हविर्धानस्य दक्षिणायां वर्तन्यां ०। हिरण्यं निधाय जुहोतीदं विष्णुरिति
श्रुतत्वात्। वर्तनिश्चक्रवर्त्मा। गृहीत्वोपनिष्क्रामतीति वचनाच्छालायामेव
चतुर्गृहीतं गृहीत्वा निष्क्रामेत्। दक्षिणया द्वारा नीता पत्नी पाणिभ्यां ०। शेषं
प्रति गृह्यास्य धुरावनक्ति प्राग्देवयजनात्। वि[illegible] शालाया दक्षिणे द्वारेणानी
ता सती [illegible] पत्नी उभाभ्यां पाणिभ्यां हस्ताभ्यां हस्ताभ्यां चतुर्गृहीतस्य हु
तशेषं प्रतिगृह्याक्षधुरोरक्षस्य धुरौ धुरिकशल्ये परागनभ्यावृत्तं अ
नक्ति हरजस्येनाक्ष्येनौ तानेनैव हस्तेनादेवयजनो देवेषिपनेन मन्त्रेण द
क्षिणया द्वारा पत्नीं निष्क्रामयन्तीति श्रुतत्वात्तानीनेसुकं अत्र सब्बाहोर
हीत्वा शालाया दक्षिणद्वारेण पत्नी निष्क्रामयानीया। पत्नि निः क्रमस्वेति
अध्येषणया वा। उभयथापि निजर्योपपत्तेः। तथा सह ०। स्रवं पश्येयाणवा २८

नयति सा ऽक्षस्य संतापमुपानक्ति। देवश्रुताविति श्रुतत्वात्। संतापमिति य
स्मिन्प्रदेशे चक्रेणाक्षो घृष्यमाणः संतप्यते चक्रस्य धुरिकायाः संतापः। आ
पस्तम्बः। द्विर्दक्षिणमक्षधुरं दक्षिणेन हस्तेनोत्तानेन प्राचीनं नवहस्त
मावर्तयतीति। अक्षधुरमक्षशल्यं प्राचीनं प्रागपवर्गमनक्ति नवनीतिवर्त
यति हस्तमिति धूर्तस्वामिनः। इदानीमिदं विचार्यते। किं युगपद्भावस्य
धुरौ अनक्ति उत भेदेनेति। किं तावत्प्राप्तं सक्रमेणैव पूर्वपक्षं करोति युगप
त्वद्वचनात्। युगपत्सहैवोभयोर्धुरोरंजनं करोति। कस्मात्तद्वचनत्वात्। द्वि
वचनान्तोऽयं मंत्रः। स च भेदेनांजने क्रियमाणेऽविवक्षितवचनोऽस्समम
र्थः स्यात्। प्रातिपदिकमात्राभिधायी न च क्रियमाणस्य द्विवचनस्याविव
क्षान्याय्या। अत एवाचार्येणोक्तं पाणिभ्यां शेषं प्रतिगृह्णीति। एवं प्राप्ते सि
द्धान्तमाह भेदे मंत्रावृत्तिः स्यान्निपातितत्वात्। भेदेनांजनं कर्तव्यं। कुतः। यु
गपदशक्यत्वात्। कथं। दक्षिणेन पाणिना कर्मकर्तव्यमिति स्मर्यते। न च
भिन्नदेशमंजनमेकेन पाणिना युगपच्छक्यते कर्तुं। तस्माद्भेदेनैव कर्तव्यं
। भेदे सति मंत्रावृत्तिर्भवति। द्विवचनान्तोऽपि मंत्रः। प्रत्यंजनमावर्तनीयः। कुतः

सांनिपातिकत्वात्। सांनिपात्योपकारी हि मंत्रः सोमं निर्वपामि तेनैवोपकरो
तीति पुनरावर्तते। यत्तु द्विवचनं तदेकस्याप्रकाशक इति प्रातिपदिकार्थ
प्रकाशयन्नुपकरिष्यतीत्यर्थः। अत एकेनैव दक्षिणेन पाणिना संस्रवं
गृहीत्वा क्रमेण द्वे अप्य स्रुचौ दक्षिणेनैव पाणिना नयति॥ स्रुक्कंठात्यो
प्रतिगृह्य प्रतिप्रस्थातोत्तरस्येरावती इति पूर्ववत्। प्रतिप्रस्थाता अध्वर्यु
णा समर्पितां स्रुक्कंठात्यो प्रतिगृह्योत्तरस्य हविर्धानस्य दक्षिणे चक्रवर्त्म
नि हिरण्यं निधाय परिस्तीर्य तस्मिन्निरावती धेनुमतीइति मंत्रेण चतुर्गृ
हीतं जुहोति पूर्ववदित्यस्यार्थः॥ प्रयच्छति प्रतिप्रस्थात्रे स्रुवं चाज्यविला
पनी च पर्याणयंति पत्नीमुखे जघनेनाग्नी चतुर्गृहीतमाज्यं गृहीत्वा प्रति
प्रस्थातोत्तरस्य हविर्धानस्य दक्षिणायां वर्तन्यां हिरण्यं निधाय जुहोती
रावतीइति मंत्रेणत्वात्। पत्नीयापरेणाग्नीन्परीत्योत्तरस्यानयति पूर्ववत्
।पत्नी दक्षिणे हविर्धाने समीयाद् इत्याय दक्षिणे द्वारेण शालां प्रविश्यापरे
णाग्नीन्परीत्य पूर्वद्वारेण निष्क्रम्योत्तरस्य हविर्धानस्याक्षधुरो चतुर्गृहीत
शेषं दक्षिणेहस्तेन गृहीत्वा क्रमेण पराकूदेवपत्नीर्विस्मनेन मंत्रेण नयति॥

र्वैवछुद्दे नैनत्सर्वैलभ्यते। पर्याणयंतिपत्नीमुभौजघनेनाग्नीइति। त
यासहदः स्त्रवंपत्न्यैपाणिवानयतिसाक्षस्यसंतापमुयानजि। देवश्रुता
वितिश्रुतत्वात्। अनेकपत्नीके एकैवपत्नी अक्षधुरायजनेकरोतिप
रार्थत्वात् ३ हविर्द्धानाभ्यांप्रवर्त्स्यमानाभ्यामनुवाचयतिततोध्वर्युर्हवि
र्द्धानाभ्यांप्रवर्त्स्यमानाभ्यामनुब्रूहीत्येवमनुवाचनहोत्राकारयति। अथा
हहविर्द्धानाभ्यांप्रवर्त्स्यमानाभ्यामनुब्रूहीतिश्रवणात् त्रिरुक्तायामु
त्तमस्यैववर्त्तनं होत्राप्रथमायाम् त्रिरुक्तायांसत्यांहविर्द्धानयोरुत्तमस्यैवो
क्षिप्यैवभूमिसंलग्नमेवोद्गृहणं कृत्वावर्तनं प्रवर्त्तनं प्राङ्नयनंकारयेयुः
।समुद्गृह्यैवप्रवर्त्तयेयुर्यथानोत्सर्जेतामितिश्रुतत्वात्।समुद्गृह्यसम्यगुत्था
प्यैवप्रवर्त्तयेयुः। यथाप्रवर्त्स्यमानेनोत्सर्जेतांशब्दंनकुर्यातां। चक्रघर्ष
णशब्दउत्सर्गः॥ ॥प्राचीप्रेतमितिवाचयति। प्राचीप्रेतमित्यमुंमंत्रंयज
मानेवाचयतिहविर्द्धानयोः प्रवर्त्स्यमानयोः। अथवाचयतिप्राचीप्रे
तमितिश्रुतत्वात् आपस्तंबः॥ उद्गृह्णन्तः प्रवर्त्तयेत्॥ति। मानवेच। उद्गृ
ह्णंतोनुव्रजंतीति। काठकेचत्रिरनूक्तेनुद्गृह्णंतोवर्त्तयंतीति। अतोभू

मिसंलग्नयोरेवोद्वहणं कर्तव्यं याभ्यां रवश्शाखयोर्घर्षणेन जातः क्षरशब्दो
नोत्पद्यते स्वंगोष्ठमिति वरवर्जैति। रवजेति आव्यानं च ऋघर्षणेन जशब्दं
कुर्वत्यनसि स्वंगोष्ठमित्यमुं मंत्रं यजमानं वाचयतीत्येतत् किमिदानीं तत
श्च वहणायेति कालाकृतिरपि भवति। यद्युत्सर्जनात् मेतद्वाचये स्वंगोष्ठमि
त्यादि श्रुतत्वात्। पद्धतिदाहशेतप्रयत्नेन प्रवर्तमाने अप्युत्सर्जनान्तरा
तद्वक्षमाणं वाचयेदित्यर्थः। पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेषु मत्सावान
न्यस्येआभिमन्त्रयते अरमेथामिति। उत्तरवेदेः पश्चात्त्रिषु प्रक्रमेषु अ
नीतेषु तेह विहूर्नेन भूपृष्ठे मध्यफलकाधारस्थे हविः लाध्वर्युर्हि अपि अ
नसि युगपदभिमंत्रयते अत्ररमेथामिति मंत्रेण। अथवा मत्यालमति
परिकल्पिते देशे न त्रिषु प्रक्रमेषु इति नियमः। तदाहुरुत्तरवेदेः प्रत्यङ्
क्रामेत्रीन्विक्रमांस्तद्विहूर्नेस्थापयेत्साह विहूर्नयोर्मात्रेति मात्रमा
त्रास्ति यत्रैव कायं मनसा मन्यते नाहेव समात्यन्तिके नो दूरे न स्थापये
त् अभिमंत्रयते अरमेथामिति श्रुतत्वात्। तयानभ्यस्तु केरोतीति चा
याहृ शानि मालके ऽनसां चक्राणि त्रिफलकानि नाहणात्यगाकृ स्यदमु

त्वा मध्यमं चक्रस्य फलकं नभ्यं । नाभिनभं वेति प्रत्ययसंनियोगेन
नाभेर्नभभावः । नभ्येति स्थितो नभ्यस्तु मध्यमेव फलके स्थापयेदित्य
र्थः । अतो त्रानसो अक्षाणि त्रिफलकानि भवंति तानि चाक्षस्य प्रांतयो
रेव धुरि काष्ठानीयपोः भवेत्युंते । एवं च द्वे ईषे प्रागायते एकोऽक्षः । अक्षस्य
पुरस्तात्पश्चाद्द्वे द्वे कीकाः कूबरावित्यादि संज्ञिका परपर्याया उद्धौ विधारिणी त्रिफल
के चक्रौ युगबंधनप्रदेशसमीपे एक उपस्तंभनार्थः स्तंभः स चानसः पृथ
ग्भवति काष्ठ अनसाः सह बहुधा उभयथा दर्शनात् । ईदृशे एवंविधे एतेऽनसी
भवति प्रतीयाम् । उत्तरेणापरिक्रम्य दक्षिणमुपस्तम्भानि विस्मोर्नुकमि
ति । अथ शुद्धे अपि हविर्धाने उत्तरेण परिक्रम्य दक्षिणं हविर्धानमुपस्त
म्भानि युगप्रदेशं दारुणिस्तंभे प्रति स्थापयतीत्यर्थः । विस्मोर्नुकमित्यनेन
वा मंत्रेण । अथोत्तरेण पर्येत्याध्वर्युर्दक्षिणं हविर्धानमुपस्तम्भानि विस्मो
र्नुकमिति श्रुतेः नलात । ननतु छ्या यदशारभिन्नपरिमाणस्य हविर्धानस्य सा
धनं । नवारत्नि हविर्धानं नाभिस्यापस्तंबः दक्षिणेनः स्थूणामुपनिहंति विष्णु
वेत्यात्तिं दक्षिणस्य हविर्धानस्योपस्तंभनादनंतरं दक्षिणे नर स्थूणां मेथी

दे॰ब्रा॰अ॰ निहंति निखनंति अवटे मिनोति मेथीमुपनिहंतीति श्रुतेः। दक्षिणे इति

३२ दक्षिणपूर्वः कोणो निधीयते दिवो वेत्युत्तरं प्रतिप्रस्थाता। ततः प्रति

प्रस्थाता दिवो वेत्यनेन मंत्रेणोत्तरं हविर्धानमुपस्तभ्नाति। सुगमदेशं दा

रुणोऽस्तं मे प्रतिष्ठापयतीत्यर्थः। अथ प्रतिस्थानोत्तरं हविर्धानमुप

स्तभ्नाति दिवो वा विष्णु विनिश्रुतत्वात् उत्तरतस्थूणां पूर्ववत्। ततउत्तर

तउत्तरपूर्वकोणे स्थूणां निहंति विष्णवे त्वेति मंत्रेण अध्वर्युरेवा विष्णवे त्वेति

मेथीमुपनिहंतीति श्रवणात् उभे वा दक्षिणतः। अथवा मेत्यपि स्थूणे द

क्षिणत एव हविर्धानस्य दक्षिणपार्श्व एवाध्वर्युर्निहंति एकां पूर्वदक्षिणको

णे अपरां दक्षिणापरकोणे इति इतरत्सत्त्वतः। ततोनंतरमितरतः इतर

योः कोणयोरेकैकं स्थूणां निखनंति। सूक्ष्ममेवामंत्रानुपदेशात्। ययोः कोणयो

योः पूर्वं निखाते। ततोऽन्ययोरित्यर्थः। यदि प्रथमं मंत्रयोर्निखाते तत इतर

त इति द्वयोः श्रेण्योः। यदि प्रथमं दक्षिणतस्तत्तउत्तरत इति यद्दे व मानुष

इति श्रुतेः। यच्च मानुषे लोकविषये प्रसिद्धं मनसः सुप्रयुक्तायमेडपकर

णाय च दाष्यकुर्यादुपरि वल्कादिनिधानबंधनादिवत् स्थूणानिखननादि ३२

दशायामविस्तारं हविर्धानमिति बोधायनः। दन्वायामविस्तारं हविर्धानमिति करविंदस्वामिनः

दृष्टौ कुर्यादित्यर्थः॥ ऊनाः इत्तरस्तनेतो यद्दुच्यमानुषङ्गः इति श्रुतेः॥ इ
ति श्रवणात्। अत्र पूर्वोक्तेन प्रकारेणेह विहितानां मंडपस्थानिष्याहृते
कर्तव्यं अवनतसरणोद्धारस्थूणानां निखननं उपर्युहरणमाणां त्रयाणां छ
दिषामारोपणं पूर्वद्वारस्योपरिष्टात्तरणघावधनं उक्तायोध्यां परिश्रय
णं। अत्राहापस्तंबः। सर्वरत्नरण्यः परिमितो निपुरस्तात्प्राचीनः खण्याव
का शंशिखूर्ध्वं चो वंशावात्यद्धाति पश्चात्पुरस्तात्प्राचीनयापाचोवंशा
नत्याधायेविरमोः ऋक्षमसानि तेषु मध्यमं छदिर धाहृति उत्तरं निवि
स्तारं नवायामं नसमीमितरे छदिषी अध्युत्पक्रांतास्त्वे जनीरिति छर्दिंत
णं तेषु प्रवर्तमुपास्यति तेंतवन्तीमवंति परिसा गिर्वणो गिरइति सर्वतः
परिश्रित्य विस्मोः श्नप्रेइति रराघा ग्रंतौ मस्यती ति। प्रतद्विष्णुरिति वा
चयति मध्यमं छदिरालंभ्या एवंह विहितानां निष्पाद्यनंतो मध्यमं छदिरा
लंभ्य मध्यमं छदिरालभसेत्यध्वर्युणा यायजमानेन मध्यमच्छदिष आ
लंभंकारयित्वा प्रतद्विष्णुस्तवतइत्यमुं मंत्रमध्वर्युर्यजमानं वाचयति मा
णायति। अथ मध्यमं छदिरुपस्पृश्य वाचयाति प्रतद्विष्णुरित्यादि श्रु.

दे॰ वभा॰ अ॰ ८

३३

नत्वा तां मध्यमं कृत्वा दक्षिणं यजमानेन स्पर्शयित्वा यजमानं वाचयति प्र
तद्विष्णुरिति। ननु च स्पृशतेः परोक्षमपश्यन्ते। न स्पर्शयतेः। न तत्रस्थ
यमेवाध्वर्युः स्पृष्ट्वा वाचयेत्किंस्विद्गम्यते। न मन्त्रलिङ्गविरोधात् मन्त्रो
ऽध्यालब्धस्याभिधायकः। न च यजमानो ब्रवीति। अध्वर्युस्तु केवलं प्रयु
क्ते। अध्वर्युणालब्धे यजमानो मन्त्रोऽनर्थकः स्यात्। तस्मात् स्पर्शयित्वा
यजमानं वाचयतीत्यर्थः। एतेन सर्वे एवं जानीयात्। अथैवमपि पत्नीं वा
चयतीत्यादयो निर्दिष्टा व्याख्याताः। इति हरिस्वामिनः। उत्तरे चाउत्तरे च
ह्वे यजुषी आलम्भ्यालम्भ्य वाचयति। विष्णो रराटमसीति रराटां रराटामालं
भ्य रराटमालं भयेत्स ध्येषणाया यजमानेन रराटां स्पर्शयित्वा विष्णोर
राटमसीत्यमुं मन्त्रमध्वर्युर्यजमानं वाचयति नामयति। अथ रराटामु
पस्पृश्य वाचयतीति श्रुतत्वात् रराटं ललाटं रराटमिव हविर्धानस्य
पूर्वद्वारस्योपरि। तत्र रराटे भवा ऐषीकादिकाररराटां स्पृष्ट्वा एवं तं यजमा
नं वाचयतीत्यर्थः। विष्णोः श्नप्त्रस्तुक्थ्यौ आलभ्य वाचयतीति शे
षः। उच्छ्राय्या वालम्भ्य। अध्वर्युरुच्छ्राय्यावालभनरञ्चे स्वेस्य ध्येषणो हूयो

रु. छ्रूष्योर्यजमानेनातंभंकारयित्वा विष्णोः श्रग्रेस्थ इत्यमुंमंत्रं वाचयति।
अनन्त्र यजमानके उपस्पर्शनमेकस्या वाचनं सर्वेषामिति सर्वत्र ज्ञेयं।
अथाच्छायाउपस्थ स्पर्शकाचयति विष्णोः श्रग्रेस्थ इति श्रुत्वान् उदग
ग्राणि छदीर्छ्षि पश्चात्कृते:। त्रीण्येप्यपि रिक्तदोर्ष्युदग्राणि भवंति। कृतः प
श्चात्कृतः। अथ यदिदं पश्चाच्छादिर्भवतीति यतः श्रूयते एनत्त्वनादेवो यपद्य
तो यस्यूदग्राणिच्छर्दीषि भवेयुः। तस्यान्यथा पूर्वापराच्छदिषां पंक्तिर्भवति
।उपरि द्वारदनार्थाः कटाच्छदीषि दृष्यंते नानि चदृशार त्रिदर्षाणि त्र्यं
शेन विपुलानीति द्वार्याः परिणीव्यति लस्पूजनि प्रतिहृतव्यारंभा विष्णोः
स्यूरसीति। ततो ध्रुवां द्वार्याः द्वारमवाः वास्तोस्यूणाः द्वारशाखाः लस्पूजनि
प्रतिहृतव्यारंभाकाष्ठमयस्त्वचकम्भो तयारंभाउच्छ्रीयीमानैः सहक्रमेण प
रिषिच्यातिम्लन आरभ्याग्रपर्यंतरंज्वा सिव्यति वेष्टनेन दृढं बध्नातीत्यर्थः
।एतत्त्वपूर्वद्वारस्य दक्षिणस्थूणामारभ्य प्रदक्षिणमुत्तरस्यां स्थूणायां समा
नयनीयं। अथ लस्पूजन्या स्यंघया प्रसीव्यति विष्णोः स्यूरसीति श्रुत्वान्
।लस्पूजनी।लघस्त्यणी।पूजयूलायां पूजितं शोभनं म्लेष्यतेनयेति पूजित श्लो

षणीति पाशेक्षां दसलाक्षास्त्र सृजनीति। स च दारुमयः सत्वकः। तेन स्यंघया
सीत्यति। स्यदिविं चित्रु सने। स्यंदनीयागमनीयाबंधनाय थे स्य घार रज्जुं [illegible]न
याम सीत्यति सामर्थ्याद्रज्ञावबध्नाति ल स्यूज[illegible]न्यार रज्जुं प्रवेशयति विस्मोर्द्रु
वोसीति ग्रंथिं करोति विस्मोर्द्रुवोसीति मंत्रेण रज्जुं मूले ग्रंथिं करोति परिवीव
णोरं ते। अग्र ग्रंथिं करोति विस्मोर्द्रुवोसीति नेद्व वपघातादिति। नेद्वमु च्या
ते अवाग्विविघं नेव पतेत इत्यर्थः उपक्रांत प्रमुंचति। उपक्रांते समासे सेव
नकर्मणि ते पूर्वे कृते ग्रंथिं प्रमुंचति विमुंति विस्रंसयती त्यर्थः। तं प्र[illegible]जने कर्म
न्विष्यतीति श्रुतेः। तं स्पांथि प्रकृते प्रकर्षेण कृते समासे सेवनकर्माणि विष्यति
षोंन कर्मणि। स्यजिरुपसृष्टो विमोचने विमुंचतीत्यर्थः। प्रागग्रं शा होहविद्धा
नेनिष्ठाप्यवे सुमवमसीत्यालभतो प्रागग्रो वंशो मध्यवलो यस्य तस्मात् वंशा
प्रागग्रावा सर्ववंशा यस्य तस्माग्वंशं। एवं विधं ह विर्द्धानेनिष्ठायसमाप्य नि
ष्पाद्य वैष्णव मसीति मंत्रेणालभते स्पृशति। तं निष्ठितमनिमृशति विष्णव
मसीति श्रुत लात। निष्ठितं परिसमाप्ते कठसूत्रे॥ द्विखुरुपया पं चां ग्याह
विर्द्धा नेवि दध्या दनः संमितं विवस्याद्वि प्रादेशयापंचांग्योपरवान्विद्धपादि

प्रादेशोपरवेषु दृष्ट्या प्रादेशं द्वेधं संमुञ्चाई प्रादेशेन परिलिखेद्दश पदया
पंचांग्यो त्तरवेदिं दृष्ट्वा उः दश पद्या पंचांग्या ग्नीध्रीयं विदृध्या त्रिपदया
पंचांग्या धिष्ण्यान्विदृध्यादृष्टौ दश दश पद्या पंचांग्या सदो विदृध्यादिति भो
जनभक्षणो चास्मिन् उर्युः। तृस्यार्थे भोजने नित्या शनां भक्षणं चेज्ज सोमस्व
मसादीनां अत्र हविर्धानेनोर्युः। तदुदीचीनवंशं सदो भवति प्राची
नवंशं हविर्धानमिति हविर्धाने प्रच्छन्न्या ह तस्मात्तत्र नाश्नन्ति न भक्ष
यन्ति। तथा अनिष्टमेभिर्हार्थवादश्चास यो ह तत्राश्नीयाद्वा भक्षयेद्वा मू
र्द्धा हास्य विपतेदिति। वशेनात्रायामोल क्षपते। उदीचीनो वंशं आयामोस्ये
त्युदीचीनवंशं उत्तरतं आश्रयतमित्यर्थः। प्राचीनवंशं हविर्धानमित्यर्थः
यादग्रसंगाह्विधिरे वायमितिद्वारिस्वामिनः अद्वारेणो सदो हविर्धाने प्रेक्षेथा माणं ब्रूयान्मा प्रेक्ष
मिति। अद्वारेणोसदः प्रेक्षमाणं पुरुषं प्रति हविर्धानं प्रेक्षमाणं च प्रति मा प्रे
क्षथा इत्येव ब्रूयादध्वर्युः। तस्माद द्वारेणो सदः प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा
इति। तस्माद द्वारेणाह विर्धाने प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति श्रुतत्वात्।
तद्येतत्स्य दृष्टिसिनो त्रशस्त्रकालेह विर्धाने च सोमेरिष्ठिते त्यां प्रवेशमादृत्ते

देवभाअ९
३५

35

नरं। तद्वाराणां तद्वक्षावामयोर्वामचरणः सदस्य ध्येत्वीति मिथुनसंपत्तेः। अथै
तद्दक्षासौ मोमोमा अयोह विहीनि ध्येत्वीति ह विहीनेमिथुनसंपत्तेः पश्चा
मुखयतो द्वार्यां वेदिम ध्येवर्त्मानाप्राचीरेखा दक्षिणा तामभितस्त्रां दक्षिणां तु
मयतो द्वारद्व्यंतरे द्वार्ये द्वारस्थूणे भवतः। पूर्वद्वारस्यापरद्वारस्य चासह सो
ध्येवमेव दक्षिणामुखयतो द्वायमवेतः ऊर्ध्व श्रवणातानां तु मयतो द्वार ठः ह विहीं
नं भवत्य मयतो द्वारठः सदः इत्यादि श्रवणातां। मतो ह विहीनस्य सदः सम्यक् पू
र्वापरे द्वे द्वे द्वारे भवतः। दक्षिणामुभयतश्च द्वार्ये इति सिद्धं। द्वारप्रमाणं चारत्नि
द्वयं। तु चितत्वात्। मंडपादौ हस्तत्वाच्च कन्यसेद्धि करं द्वारमित्याहो द्विशयाति
द्वारा तोतिमानवसूत्राच्च। काठके चा अरत्निमात्रे दक्षिणामभितो द्वार्ये स्वं वंस
र्वत्रेति दक्षिणस्यानसो धः प्रतुगं खनत्सुपरवान् ४ दक्षिणस्यानसो दक्षि
णस्य ह विहीनस्य यत्प्रतुगं हे धामन्तस्य पूर्वो भागस्तस्याधः प्रदेशे ध्वर्युरुपर
वान् खनति। तु परवा अवटाः म्ब्राहत्य र्थः। ऊनाः। अयथाः प्रोक्षणः परिशि
ष्यंते ता अवटे श्रव मयतीति श्रुतो तु परवरणं। अवटलक्षणात्। स दक्षि
णस्य ह विहीनस्याधोधः प्रतुगं खननीति श्रुतेः॥ पुनर्हि शेखनतीत्या

त्रं वचाहस दक्षिणस्य हविर्द्धानस्य प[श्चा]दुपपसं मन्त्रयुगं प्राग्नयुगं प्राग्न
युगं। ईषासंगमा पराई तमधो धुः खनती सार्थः मानवेच दक्षिणस्य हवि
र्द्धानस्य पश्चाद्धुपपरस्तंभनस्याद्धि प्रादेशं चतुरस्रं विधाय प्रादेशमात्रान् उ
प्रास्य परवान् खननीति। काठके दक्षिणस्य मस्त्यगुपरस्तंभनादि तिनत्र हवि
र्द्धानस्यार्द्धप्रमाणेनोभयतो यच्छिद्य चतुःकोष्ठकं तत्स्थान आग्नेयकोष्ठमध्ये
द्धि प्रादेशं चतुरस्रं तत्स्थाने कोणेषूपरवान्स्तनान्परिलिखेन्नाग्न्यानिति उ
तः तघट्टमेशीर्षश्चत्वारः कूपा इति वाक्यशेषात्। कूपानां प्रायेण लो[ ]के
प्रत्तन्वद्दर्शनात्। हृदयं वा अस्य उपरवाः यत्तद्दुत्स्य उपरवे प्रास्ताणामेतन्नाउ परवा
नामकूपकाः तेषां चोपर्यधिषवणफलके निधीयते तयोरुपर्यधिषव
णेव सीनत्र सोमाभिषूयते। तस्मिन्न्यावभिहन्यमाने वाद्रिश्रोदरवत्सुषि
रास्ते कूपा गंभीरमुपरवन्तीत्युपरवा इत्यभिधीयते। उपरवा इत्येतेषां नामधे
यं संव्यवहारार्थं उपरवदेशे मन्त्रस्त्वातेत्याहेति खनने विधिमाह अ
भ्र्यादिकरोत्यवट्वचहा परिलेखनात्। आहरत्यनयाम दमिस्यसिः खनि
त्रात्मया आदानादि आदानादारभ्य अ अवटपरिलेखनात् अवटपरिलेख

नं पर्यंतं। अत्र दवदिति पूर्वावरवत्करोति देवस्य त्वे त्यस्म्या दानमिदं महमि
त्यनेन च परिलेखनमिति। सो ऽग्निमादत्ते देवस्य त्वेति। तान्प्रति देशमात्रं विना
परिलिखतीदं महमिति पूर्वावरवदेव पूर्वत्वात्। या देशमात्रं विना अंत
रा प्रादेशं परिलब्ध्य इत्यर्थः। अग्नो ऽप्यपरिमिता एवोपरवा भवंति। पूर्वाव
त्वत्वात्त्वाच्च। विश्वजन्दर्शनाच्च। आहवनीयस्य पुरस्तात्प्रत्यावत्तुरस्रे ष्वग्ने
रत्निं तु मवदधातीति। तथा अग्न्याधेयं चतुरस्रं खनतीति चानिना विना
वचने ऽप्यग्न्यश्चतुरस्रो न भवतीति [illegible] प्रतीयते। गर्जोऽवपश्चान्न इति पर्या
याः। गर्जो ऽवटो ऽनुविश्वश्चेतस्यमरसिंहोक्तेः॥ उपरवा नाम श्वभ्रा इति छंदोग
सूत्रे उपरवाणां श्वभ्रत्वोक्तेश्च चतुरो ऽक्षमात्र्या व्याघारणावन्तानुपरवान्स्र
तुरः चतुः संख्यान् व्याघारणावदक्षमात्रया परिलिखति व्याघारणवदिति दक्षि
णो ऽसे उत्तरश्रोण्यां। दक्षिणश्रोण्यामुत्तरे ऽसे इति क्रमः। उपरवास्य सप्तत घट
मेशा चे चत्वारः कूपा इति हरिस्वामिनः। हे कर्णेच्छिद्रे हे नासिके काष्ठ हे इति
माधवः। या दक्षिणे न परिलेखने प्रादेश यति कौशिक्येनेत्यर्थः। तत्
पिको ऽरत्निमात्र नियमेन प्रादेशेनातिनियमयाति व्याघारणवदिति। तेनद

चतुर

क्षणा

क्षिणापूर्वं अपरोत्तरं अपरदक्षिणां पूर्वोत्तरमिति। तद्यथा वेतौ पूर्वोत्तयोर्द-
क्षिणामेवाग्रे परिलिखेद् यथापरयोरुत्तरम् यथापरयोर्दक्षिणामथ पूर्वयोरु-
त्तरमिति शङ्कते। तत्तात्पक्षान्तरमाह उत्तरापरं वा प्रथमं वा विकल्पार्थः
।अथवा प्रथममुत्तरापरं परिलिख्य ततो दक्षिणापरं परिलिखेत् तानेनायं क्रमः
।उत्तरापरं दक्षिणापूर्वं दक्षिणापरं उत्तरपूर्वमिति। अत्र दक्षिणे स्येतच्चा-
स्मिन्नेव पक्षे चरितार्थो पूर्वस्मिंश्च पक्षे व्याघारणवदित्यनेनैवास्याय-
स्य सिद्धत्वात्। अथो उत्तरयोरपरयोरेव प्रथमं उत्तरं परिलिखेद् अथ पूर्वयोर्द-
क्षिणाम् यथापरयोर्दक्षिणामथ पूर्वयोरुत्तरमिति शङ्कते। तत्तान्तरतीयं पक्षमा-
ह सम्यग्वा। वा विकल्पार्थो। अथवा सम्यग् ऋजुमार्गेणैवोपरवान्परिलिखेत्ता-
कृत्या॥ अथो अपि समीचीनमेव परिलिखेदिति शङ्कते। तत्तान्त समीचः समन्ता-
पूर्वं दक्षिण त्संलग्नान् ऋजूनेवानेन प्रथमं दक्षिणापरं ततोपरोत्तरं ततउत्तरपूर्वमिति
उत्तरपूर्वत्वं तं उत्तरयोरपि पक्षयोस्तु उत्तरपूर्वमेवोपरवमं स्यं परिलिखेदिति
पूर्वस्मिन्नपक्षे व्याघारणवदित्यनेनैवोत्तरपूर्वस्याप्यस्य सिद्धेः। तेनांति-
मे पक्षे दक्षिणापूर्वं प्रथमं परिलिखेदित्येतदवगम्यते सम्यक्त्वसिद्धेः। एवं

रिमं उत्तरं परिलिखति। ... प्रादेशेन कोण्येषु वज्रान्परिलिखतीत्यर्थः। तदंतरानिनितच्छूत्वे तथा २

दे॰ब॰भा॰अ॰ ३७

तत्त्वेवोत्तमं परिलिखेद् घ्राणपूर्वं पोहृत्तरो भवतीति श्रुतत्वात्। अथोपर
वाणां प्रमाणमाह प्रादेशमात्रां स्तदंतरालं। प्रादेशः प्रमा। समे पांते प्रादे
शमात्राः। ज्ञातः प्रादेशमात्रान्प्रादेशप्रमाणान्वेदेश्या ऽपराम्, इयत्ते परस्परं प्रा
देशमात्रां तरालानित्यर्थः। तान्प्रादेशमात्रं विना परिलिखनीति श्रुतेः प्रा
देशमात्रं ... नरा ... लेपरित्यज्य परित्यज्य खननमितीत्यर्थः। इहन्तसी
तिय यापरिलिखितं खननित्वा हन्तसीत्यनेन मंत्रेणाय यापरिलिखितं परि
लेखनक्रमेणोपरवान्खनति। तान्यथापरिलिखितमेव यथापूर्वं खननमिह
हन्तसीति श्रुतत्वात्। नात्रोदकोपस्पर्शनं। अग्र क्षससतादं इहजोपरवाणा
ति वचनात्। इदमहमिति सक्रिरति यथाख्यातं प्रतिमंत्रं। खननानंतरं यथाख्या
तं खननक्रमानतिक्रमेण सर्वेभ्य उपरवेभ्य उद्धृतान्पांसून् किरति मध्याद्ब
हिर्नि; काश्यपति इदमहं तं वलगमित्यादिभिः प्रतिमंत्रं नान्यथाख्यातमेवो कि
रती इदमहं वलगानामित्यादिश्रवणात्। येन क्रमेण खननं कृतं तेन क्रमेण पांसूद्धा
पः कार्य इति यथाख्यातशब्दार्थः। उद्धृत्यां किरामीति यश्चान्सर्वेभ्यः प्रथममि
दमहमित्यनेन पांसूनामुद्धरणं कृतं। पश्चादित्यं नेउन्द्धृत्यामित्यनेनैवमंत्रे ३७

णाहृतेन सर्वेभ्यस्तु परवेभ्यः सकाशात्त्वां सन्तु चिरति। उद्धपति। उद्धृत्यां
किरामी त्वं तत उद्धृयती ति श्रुतत्वात्॥ अंततः [illegible] इत्यंतइत्यर्थः। स सम्यर्थे
न सिद्ध्। प्रथमं पश्चाद्धमं त्रेणो ह्यापो वचना[illegible]ता। मध्येयावदर्थं तूष्णीमि
ति। प्रती च्यां च परे पश्चादित्यमरः। तेनात्र पश्चादुद्धृत्य श्वरमार्थः। श्रुतिनो
विशेषावगमात्तादृखातप्रमाणमाह बाहुमात्रान्। तान् अनुपरवान् बाहुमा
त्रान् खनेत् निम्नान्। तान् बाहुमात्रान् खनेदिति श्रुतत्वात्। अश्मया
संभिंद्यात्। तान्ग्रहतान् अनुपरवान् अश्मया कोटिस्थेन अधस्तात् संभिंद्यात्
परस्परं छिद्रेण संयोजयेत्। तान् अश्मया संतृंदंती ति श्रुतत्वात्। तृदेर्हिं
सार्थस्य संभिंदंतीसंछिद्रयंती त्यर्थः। अश्मया शङ्कोऽयं क[illegible] विवदनः नमु
जेन को द्यावा संभिंदति किं न हि वर्णो नादक्षिणा पूर्वे उत्तरापरचछिद्रयं
ति। तथा दक्षिणोपरं पूर्वोत्तरं चेत्यर्थः। अत्राह हायस्तंबः। अधस्तात्सं
तृणा भवंति नोपरि ष्टादिति। कात्यका चाबाहुमात्रान् खनत्यसंभिदंतोध
स्तात् संभिंदंति अशक्तौ सम्यक्। अशक्त्या संभेदनाशक्तौ सम्यक् वृक्षःजु
भावेनेव संभिंद्यात्। यद्यशक्त्या नशक्नुयाद पिसमीच इति श्रुतत्वात्॥

र्ण

यदि केनचित् कारणेनाक्षत्यासंनेतुं न शक्नुयात् तदा समीवोपि हस्तं नेव संमिघातात् दक्षिणौ परस्परीपुनः पाणिमौलतनतुजतरौ पूर्वोद्दिष्टेवं । यस्माच्चैवमेतेषि यजसंमिघंतेतस्मादेवेनकारणेन मेच क्षणादि कृत्याः परस्परतः कंठप्रदेशे संसृष्टाः संमिन्ना इत्यर्थः खराडिश्चवमर्शय तियथाख्यातेन प्रतिमन्त्रान्तानुपरवान्यथाख्यातं खननक्रमेण यजमानम वमर्शयत्यध्वर्युः । उपरवानवमृशाहेत्यपि व्याख्यातम्या । यजमानश्च खरा त्विसिस पत्नेहेत्यादि भिर्मन्त्रैः प्रतिमंत्रं खननक्रमेणोपरवानवमृशति । अंतः प्रदेशान्निम्नोन्नतत्वपरिहाराय संमृशति । नान्यथाख्यातमेवाव मर्शयतीति श्रुतत्वात् । अनेक यजमानके चे... कत्वाचमृशति । उप रव संस्कारत्वात् अध्वर्युयजमानौ संमृशेते । अवमर्शनानंतरमध्वर्युय जमानौ उपरवयोः खं खं दक्षिणं हस्तं प्रवेश्याक्षत्यासमेतेन देमार्गेण पर स्परं संमृशेते । संस्पर्शं कुर्वाते । अथाध्वर्युश्च यजमानश्च संमृशेते इति श्रुतत्वात् । अत्राहापस्तंबः बाहूपावहरतो अध्वर्युयजमानश्च संमृशेते इति । कथं संमृशेते इत्यपेक्षायामाह... पूर्वदक्षिणोध्वर्युर... परो

त्तरे यजमानः। पूर्वं दक्षिणोऽत्तुपरवेऽध्वर्युर्हस्तं प्रवेशयति। अपरोत्तरे च य
जमानो हस्तं प्रवेशयति। पूर्वयोर्दक्षिणोऽध्वर्युर्भवत्यपरयोरुत्तरे यज
मान इति श्रुतत्वात् अध्वर्युः पृच्छति यजमान किंमत्रेति। उपरवयोर्हस्तौ
प्रक्षिप्य संमेहनमार्गेण परस्परं संमर्शनानन्तरमध्वर्युर्यजमानं पृच्छ
ति यजमान किंमत्रेत्येवं। पूर्वयोर्दक्षिणोऽध्वर्युर्भवत्यपरयोरुत्तरे यजमा
नः सोऽध्वर्युः पृच्छति यजमान किंमत्रेतीति श्रुतत्वात् भद्रमित्याह।
स यजमान एवं पृष्टो भद्रमिति प्रतिब्रूयात् भद्रमित्याहेति श्रुतत्वात् त
न्नौ सहेत्यध्वर्युरुपांशु। भद्रमिति यजमानेनोक्ते तन्नौ सहेत्यध्वर्यु
रुपांशु ब्रूयात्। तन्नौ सहेत्युपांशु अध्वर्युरिति श्रुतत्वात्। प्रश्नप्रतिवच
नसंबंधादुच्चैः प्राप्ते वचनादुपांशुत्वमुच्यते। अयवावाणंनयक्षेप्णुयांशु
त्वप्राप्त्यर्थ[illegible]मुपांशुत्वमुक्तं। अयं च चोदितार्थाभिधायी। अतश्चाने
कयजमानके तन्नः सहेत्येवमुच्यते मानवे अनुमर्शनं: पूर्वयोर्दक्षि
णोऽध्वर्युरपरयोरुत्तरे यजमानः किंमत्रेति पृच्छति भद्रमित्यध्वर्युस्त
न्नौ सहेति यजमान उत्तरमध्वर्युर्दक्षिणयोरपरे यजमान इति॥

दे॰ब॰भा॰अ
३९

काठके चा अध्वर्युयजमानौ सविमर्शनौ द्वा अन्यो द्वा अन्यः॥ किं मन्त्रेणा
ध्वर्युर्यजमानो मह्यमिति प्रत्याहन्तौ सहे सुमाउ यन्त्र श्येति पुनर्दक्षिणा
परे ध्वर्युः पूर्वोत्तरे यजमानः पुनरपि दक्षिणापरेत्र परवे ध्वर्युर्हस्तं प्रवेश
येत् । पूर्वोत्तरे यजमानो हस्तं प्रवेशयेत् । अथापरयोर्दक्षिणोध्वर्युर्भवति पू
र्वयोः उत्तरे यजमान इति वचनात् यजमानः पृच्छत्यध्वर्योः किं मन्त्रेणेति एवं
पूर्ववद्धस्तौ संमेदनमार्गेण परस्परं संयोज्य यजमानोध्वर्युं पृच्छति अध्व
र्यो किं मन्त्रेणेति एवं मह्यमिति प्रत्याह तन्मह्यमिति यजमानः [illegible]
[illegible] यजमानः एवं पृष्टेनाध्वर्युणा मह्यमिति यजमाने प्रत्युक्ते तन्म
ह्यमिति यजमानो ब्रूयात् । स यजमानः पृच्छत्यध्वर्यो किं मन्त्रेणेति मह्यमि । प्रत्याहन्
मह्यमिति यजमानस्तद्देवर्ध्वः संमर्शने प्राणानेवैतत्सयुजः कुरुते तस्मा
दिमे प्राणाः परः संविद्रे इति श्रुतत्वात् तद्देवं संमर्शनेन संसर्जनेन परस्प
रं ज्ञापनाद् यतिन प्राणान् सयुजः एकार्थयुक्तान् कुरुते । तस्मादिमे प्राणाः सं
विद्रे संविद्रते संजानते । आतिनी कर्णजनमुखनासिके अपि विकरो
ति न स्वं चाक्षिमुखे इति । तस्माद् द्वाकर्षे बाः संमर्शने परस्परं हस्तसंस्पर्श ३९

मं

नमिति प्रतीयते प्रोक्षत्येनान्रक्षोहणोइति। अथाध्वर्युर्लौकिकाद्भिरेना
नुपरवान्प्रोक्षति हस्तेनैवारक्षोहणोवोवलगहनः प्रोक्षामीति मन्त्रेण। प्रो
क्षामीति मन्त्रेण। प्रोक्षणप्रकाशकेन। अथ प्रोक्षतीति प्रकृत्य सप्रोक्षति
रक्षोहणोवइति भिन्नत्वान्न। एतत्त्वाग्नेयकोणरेखादुपरवादारभ्य प्रदक्षिणं
भवति। न प्रवृत्तिक्रमेण पूर्वत्र यथा परिलिखितं तथा। यावानमिति यस्मात्
। तेनैव प्रोक्षणं सर्वेषामुपरवाणां युगपत्स्यात्। मन्त्रस्य बहुवचनान्तत्वा
त्। भेदेन चक्रियमाणे बहुवचनमविवक्षितं स्यात्। न च श्रूयमाणमवि
वक्षितं न्याय्यमित्येवं प्राप्त आह भेदे मन्त्रावृत्तिः सन्निपातित्वात्। भिन्नदे
शानामुपरवाणामेकेन पाणिना युगपत्प्रोक्षणाशक्तेर्भेदेन भवितव्यं
न चोभाभ्यां पाणिभ्यां कर्तव्यं दक्षिणेन पाणिना कर्मकर्तव्यमिति स्मरणा
त्। तस्माद्भेदेन प्रोक्षणं भेदे च सति प्रत्युपरवं मन्त्रावृत्तिर्भवति। कुतः सन्नि
पातित्वात्। सन्निपत्य हि करणो मन्त्र उपकरोति। यदि च प्रत्युपरवप्रोक्षणं मन्
त्रो नावर्त्येत तदा प्रथमे उपरवे प्रयुक्तो नेतरानभिदध्यात्। असंनिपाति
त्वात्। न त्वभ्यां वर्त्तमानोऽपि बहुवचनान्तत्वादेकं न शक्नोत्यभिधातुं। नावदेवा

देवमाऽअभिदध्यदुपकरिष्यति। नन्वनडुह्योत्तरेण सौपांजने चान्या योग

४० स्मिंति:। सत्यं। तथापि प्रत्युदाहरणमुच्यमानमादर्शसंमार्जनवन्निर्मलं

भवति॥ ॥अवनयनावस्तरणे चावटवद्रक्षोहणो रक्षोहण इति। प्रोक्षणी

शेषस्योपरवेष्ववनयनं। प्रागुदग्ग्रीवैर्बर्हि[illegible]भिरवस्तरणं चावटवद् यूपावटव

द्व भवति। रक्षोहणो रक्षोहण इति। मंत्राभ्यां। अत्र यथालिंगं विनियोगः क्र

५० मेण च। अवनयामीति लिंगकेनावनयनं अवस्तृणामीति लिंगकेनावस्तर

णमिति। अथ याः प्रोक्षण्यः परिशिष्यंते ता अवटेष्ववनयतीति प्रकृत्य सो

वनयति रक्षोहणो वो वलगहनोवनयामि। वैष्णवानित्यर्थं बर्हि[illegible]षि प्राची

नाग्राण्युपरिष्टाद्वा नाग्राणि चावस्तृणातीति। तथासो वस्तृणाति रक्षोहणो वो वल

गहनोवस्तृणामि। वैष्णवानिति श्रुतत्वात्। अत्र प्रोक्षणीवनयनादौ च[illegible]ते नो

दकोपस्पर्शनं। रक्षोहणो वः सप्ताववैष्णवानीति वचनान्मंत्राणां वैष्णवत्वे

नाराक्षसत्वात्। नयनावस्तरणे च प्रदक्षिणमेव भवतः उक्तं पुनः॥ ॥ननु

परिकृष्य न्यञ्चत्वाधिषवणोपलके द्व्यंगुलांतरे प्रक्षालिते प्राची अरत्निमात्रे

संतृणे वा यद्धा निपर्यूहति च रक्षोहणो रक्षोहणो वितो। तेषामेव प्रकृतानामु ४०

परवाणामुपरिनन्नसंक्ष्मानरक्कूलानंउ[illegible]ग्रानकृत्वा प्रागग्रानुदग्ग्रा
न्वादर्भानास्तीर्याधिषवणावफलके आधिउपरि अभि षूयन्ते सोमो यथौ
स्तेवारणे प्रादेशमात्रविपुले स्थूले उपदधाति। कीदृशी। अधिषवणफ
लके। द्व्यंगुलान्तरे परस्परं द्व्यंगुलान्तराले। पुनः कीदृशी। प्रक्षालिते अद्भिः
शोधिते। तथा। प्राची। प्रागग्रे। किं प्रमाणे अरत्निमात्रे दीर्घे। पुनः कीदृ
शी। संवृणोवावा विकस्येते फलके परस्परं संवरणे संधिते संयोजिते वा भवतः
सवायं व्याव स्थिते विकस्यः एकसुत्यय ज्ञे अग्निष्टोमसंस्थे असंवरणे
[illegible]एव। उत्स्यानिरात्रादौ अनेकसुत्ये चाव श्यंसंवरणे एव भवतः
। दीर्घसोमे संतृंद्याद् धृत्या इति शाखान्तरीयाद्वचनात्। दीर्घश्चासौ सोमश्च दीर्घसो
मः। अग्निष्टोमापेक्षयायो दीर्घः उत्स्यातिरात्रादिरनेकसुत्यस्तत्राव
श्यं संतर्दनं कर्त्तव्यं। एवं विधे फलके उपदधाति रक्षोहणो वलगहनाउ
पदधामीति मन्त्रेण। अथाधिषवणे फलके उपदधाति रक्षोहणो वलग
हनाउपदधामि वैष्णवा इ[illegible]ति अनत्वात्। ततस्ते अधिषवणेप
र्यूहति चर्मासु भिस्तदंतराले द्व्यंगुलं परितश्चर्म प्रसृणाति। तार्णायां रक्षोहणोवा

मितिमंत्रेण । अथ पर्यूहति रक्षोहणो वो वलगहनो पर्यूहामि वैष्णवी इति
हृ (२) हत्येवैनेन तच्छिथिलं करोतीति अनन्तरं । पांसुभिः छदनेन फलकयो
र्द्वि (२) करणं दृष्टार्थं । अन्यथा सोमाभिषवकाले नेदं तत्तनं स्यात् तथा सति
दुःकरोभिषवः स्यादिति । तथा च कारवे । अभिषवणे फलके पुरस्ताद्द्राहीय
सी पश्चाद्ह्रसीयसी द्व्यंगुलेनासंहिते पश्चाद्रक्षोहणा इति सोक्षस्य तरेणोप
रवे पृथगुपदधाति उत्तरेण पुरीषं पर्युप्तं शंकुभिः परिणिहत्येति । मानवे च
ऊर्ध्वं उदुंबरे अधिषवणफलके समोपहते बाहुमात्रे इत्यादि ॥ ॥ तयोश्चर्मा
धिषवणं परिस्तृणाति सर्वरोहितं निदधाति विस्रवमसीति । तयोरधिषव
णफलकयोरुपरि सर्वरोहितं सर्वांगीणं परिस्तृतं परिस्तः कृत्तेन नमामीत्युक्तं
म्वंविधमधिषवणचर्म निदधाति विस्रुवमसीतिमंत्रेण । मा त्वा वयमुत्तरलो
मेति परिभाषायामुक्तमेवा चर्मणस्तु तरलोमानि प्राग्ग्रीवाणीति । अधिषु परि
सोमः स्यन्तोस्मिन्निति स्यधिषवणं । अथाधिषवणपरिस्तृतं भवति सर्वरो
हितमिति श्रुतेः । सर्वरोहितमिति वचनाद्धि चर्मणो विषयो हि रक्तो वर्णो
रोहितः इत्युच्यते मंत्रवर्णाच्च । अथांशून्दुहन्तो आध्यासनेग्रावाणि तथा समान

वे। अधिविवयनस्य चर्मणोऽधिषवणं करोतीति॥ तस्मिन्नत्राङ्कः पंचावे
हमवास्थेति। मन्त्रा णोऽभिषवार्थाः पंचपाषाणाः तस्मिन्नधिषवणचर्मी
णि पंचग्रावणः पंचपाषाणाः स्वन्ति दृषानिरुक्ता पयन्ति वैसमवास्थेतिमंत्रे
ण। अथग्रावणः उपावहरन्ति तान्निदृषानिवेहमवास्थेत्येतिप्रजल्पान॥ तरं
पुरस्तान्तवकरोत्युद्धतावोक्षिते सिकतोपकीर्णं च उरस्त्रं पुरस्तादिदृसुपवर
वाणंपुरस्तात्। अथ वा प्रकृतस्याधिषवणचर्मणः पुरस्तात्खरं तन्त राद्दु
पस्तंभनस्य वा पुरस्तात्प्राच्यांदिशि उद्धतावोक्षिते देशे सिकतोपकीर्णं चतुर
स्त्रं करोति। उद्धतमुद्धृत्य खने। अवोक्षितमभ्युक्षणं। सिकतावालुकाउपकीर्णं
यस्मिन्त सिकतनोपकीर्णं। अर्थाप्रमाणं। चउरस्त्रं चतुःकोणं। मानवे।
उपरवाणां पासनाम ग्रेणोपस्तभनंवाहमात्रं चउरस्त्रंखरंकरोत्युद्धतावो
क्षितेसिकताभिः प्रेरोचयतीति। काठके च पूर्वेणोपस्तंभनंपात्रेभ्यः खरंक
रोतीति॥ ॥ अंतः पात्यात्प्रक्रमान्प्राङ्गत्वा दक्षिणतः सप्तमं महान्तं। अं
तः पात्यात् शंकोः अवधिभूतात् षट्प्रक्रमान् प्राङ्गत्वा प्राच्यांदिशि
गत्वा सप्तमं प्रक्रमं महान्तं दक्षिणा गच्छेत्। दक्षिणस्यां दिशि [illegible] पान॥ ॥ तत्रो

धा

उदुंबरीं मिनोतीति यजमानमात्रीं। तत्र सदसमध्यप्रांते यजमानमात्रीं यदुमान
प्रमाणामौदुंबरीस्थूणां मिनोति अवटे प्रक्षिपति। सा च निखननप्रदे
शादूर्ध्वं यजमानमात्री कार्या। निखननार्हं प्रादेशमात्रं ततोऽधिकः।। तदुक्तमा
पस्तंबेन। ऊर्ध्वं निखाताद्यजमानसंमितेति युक्तं चैतत्। यदि चोपरणेस
ह यजमानप्रमाणं क्रियते तदा सहसेति नीचतया भवेत्। अमुत्थितानात्तु
पसर्पतीत्येतद्विरुध्येत। ॐ उदुंबरीति सदसो मध्ये स्थूणा विशाखा भवति
। उदरमेवास्य सद इति तन्मध्य उदुंबरीं मिनोतीति च प्रेहत्याथ यदग्रे समध्य
मः शंकुर्भवति वेदेर्जघनार्धे स्यात् स्यादुग्रक्रामति षड्विक्रमान्दक्षिणा सस
मसपक्रामति संपदः कामायेति तद्वत्तं परिलिखतीति श्रुतेः। अथ शंकौ
अथ यदग्रे समध्यमः शंकुर्भवतीत्युक्ते सत्रे अंतःपात्यादित्युक्तं तेनैव
ज्ञायते शंकोरंतःपात्यसंज्ञेति। यजमानेन संमाय औदुंबरीं परिवासयतीत्युक्
त्वा यजमानमात्रीमित्युक्तं यावद्यजमानो ऊर्ध्वं शंसदोत्तमां मिनोति सो
दुंबरी नैर्ऋत्यां स्थूणानां दक्षिणायस्योत्या अंत्याहृसिष्ठा इति। काठकेऽव। अ
द्वे पंच मेधं पुरस्तात् मायाद्दक्षिणामध्ये उदुंबर्यै गर्त्तं परिलिखतीति मानवे च।।

अपरस्माद्देशान्तात्त्रिषु प्रक्रमेषु परिमिते वा चकाशे सदो विदधातीति तस्य म
ध्ये दक्षिणतः पृष्ठ्यायाः प्रक्रममात्रे उदुंबर्यै गर्त्तं खनतीति आपस्तंबः। द
क्षिणतः प्रक्रमे पृष्ठ्याया उदुंबरीं मध्ये सदसो मिनोतीति दक्षिणास्त दः प्रक
र्षीदि तितेन पृष्ठ्यायाद्दक्षिणतः सदो मध्यरेखायां महांतं प्रक्रमं प्रक्रमस्यान
त्यांते उदुंबर्या अवटपरिलेखः कार्यः। अंततः पात्यात्परेषु प्रक्रमे च सदसो
मध्यं तु यानता। सदसो मध्ये उदुंबर्या मानमवटानस्य मध्ये उदुंबरीं मिनो
तीति यूपवत्छेन। सा चोदुंबरी यूपवत्छेन। यूपवदित्यवटस्य पुरस्तात्स्माग्नाग्रं
भूमौ निदधातीत्यस्यात्परि ऊश मुष्टिं च निदधातीत्यर्थः ॥ ऊतः ॥ तामग्रेण
प्राचीं निदधात्येतावन्मात्राग्निर्बर्हीं षु पुपरिष्टाद्दधि निदधातीति अनंतरा
ना। अग्रेणेत्यवटस्य पुरस्तादिति हरिस्वामिनः। अग्रेणावटं प्राचीं निधाये
त्यापस्तंबः ॥ ॥ अन्यादिकरोत्यावदन्तरणात्। अन्यादि अन्याहानाहा
रन्ययूपावटवत्कर्मेरीति आ अवस्तरणात्। अवटमध्ये प्रागुदग्रबर्हिः प्रास
नपर्यन्तं कुर्यादित्यर्थः। ऊतः ॥ अन्याहानादेः सर्वस्यात्र पुनः श्रवणात्
याहितेद वटं परिलिखतीति प्रकृत्य सोऽग्निमादत्ते देवस्य त्वेति। अथावटं परिलि

खनीदमहमिति। अथ खनाति प्राचमुद्धिरति यजमानेन संमायेत्यादि
अथ यवमस्यः प्रोक्षण्यो भवंतीति स यवानावपति यवोसीति। अथ प्रोक्ष
तिस प्रोक्षति दिवे त्वेति। अथ याः प्रोक्षिण्यः परिशिष्यंते ता अवटे वनयति शुं
धं तामिति। अथ बर्हिः पिप्राचीनाग्राण्युदीचीनाग्राणि वा वस्तृणाति पि
तृषदनमसीति। अत प्राग्राचापि अभ्याहाने अवटपरिलेखः। खननं प्राच्यांपां
सुद्वापः। ततः प्राच्यां उदुंबरीनिधानं तस्या उपरि कुशमुष्टिनिधानं। यवोसी
त्यप्सु यवावापः। दिवे त्वेत्यादिभिरौदुंबर्या अग्रमध्यमूलानां प्रोक्षणं। अवटे
शेषासेकः। प्रागग्रोदगग्रबर्हिः प्रासनं चेति॥ ॥उद्दिवमित्युच्छ्रयति। अवट
मध्ये प्रागुदग्बर्हिः प्रासनादनंतरं नामेव प्रच्छन्नामोदुंबरीमुच्छ्रयत्यूर्द्ध्वां करो
त्युद्दिवामित्यनेन मंत्रेणोत्तामुच्छ्रयस्व उद्दिवमित्यादिश्रुतत्वात्। प्राचीनकर्णां
स होता त्वामिनोत्यूर्द्ध्वं निखाताय यजमानमंमिमीते त्यापरतंब॥ ॥पर्यूहणघो
पसेचनानृत्वा ध्रुवासीति वाचयत्यौदुंबरीमालभ्य। अवटे प्रक्षेपानंतरं पर्यू
हणादिपांसुभिरवटपूरणाद्वारभ्य आ उपसेचनादद्भिरुपसिच्यते स्येतस्य यंतं
यूपवदेव कृत्वा तत उदुंबरीमालभ्य उदुंबरीमालभ्य खेत्यध्येषणायायज

मानं

मानेनौदुंबर्या आलंभं कारयित्वाध्वर्युस्तं यज ध्रुवासी ध्रुवोयमिति

मं मंमंत्रं वाचयतिमाणेपाति। अथपर्यूहतिब्रह्मस्वनिलवेति अथपर्युष

तिब्रह्मस्वहे हेति समंभूमि पर्यषणं करोतीति अथापउपनिनयति अथैव

मनियच्छवाचयति ध्रुवासीतिश्रवणात्। पर्यूहतितमौदुंबरीगर्तं पांसुभिः

पूरयाति। पर्यूषति परिसमंताद्रूषति। रूषागतौ॥ पिहनलक्षणा यां गता

वत्र द्रष्टव्यः। रुहिंसे परिपिहयतीत्यर्थः। उनरानन। ब्रह्मस्वहे हेति मंत्र

व लिंगात्। पिहवचनोयमूषति ४ प्रत्ययेतव्य इति हरिस्वामिनः। समं भूमी

ति भूम्याः समं समं भूमीति वदिपाठादव्ययीभावः समासः पूर्वापदार्थ

प्रधानः भूमिसममित्यर्थः। पर्यषणं। पर्यूषति परिपिहयत्यनेनौदुंब

रीमिति पर्यषणमवठ पूरणं न भूमिसमं करोति ध्रुवासीति वाचयत्यौदुं

बरीमालभ्य ध्रुवासीत्यस्मिन्मंत्रे एणप्रजायापशुभिर्भूयादित्युभयोः पद

व्योः समाम्नानचादुभयोः समुच्चयेन प्रयोगप्राप्ते आह प्रजयाभूयादि

ति पशुभिरितिवाध्रुवासीतिवाचनमंत्रे अयं विशेषः अस्मिन्वायतने

प्रजयाभूयादिति प्रयोक्तव्यं। अस्मिन्नायतने पशुभिर्भूयादिति वा। नोभयं

प्रजयापशुभिरित्येवंयथासमाम्नातमित्यर्थः॥ विकल्पस्य श्रुतत्वात्तां प्रज
यामूयादित्तिपशुभिरित्ति चैवंयंकामंकामायते सोस्मैकामः समृध्यतइ
ति॥ ॥स्रुवेणोविशाखेजुहोति घृतेनद्यावापृथिवीइति॥ आज्यं संस्रुतस ॐ
दुंबर्याविशाखेकस्मिन्मूर्द्धनि वल्कनिधानप्रदेशेस्रुवेणाध्वर्युर्जुहोति घृते
नद्यावापृथिवीपूर्व्येयामितिमंत्रेणोइदं द्यावापृथिवीभ्यामितिः त्यागः।
स्रुवेणेतिजुहूनिवृत्त्यर्थं। अनश्चात्र स्रुवस्यैवसंमार्गः। अथस्रुवेणो
पहत्याज्यं विष्टयमभिजुहोति घृतेनेत्यादिमंत्रेणः॥ विष्टं निविष्टं तु परि
स्तुप्यिते वल्कादिपाजिर क्षतिअप्रेः पतद्वारयतीति विष्टयं विशाखं तं
दभिजुहोतीत्यर्थः॥ इतिहरिस्वामिनः॥ मानवेविशेषः। अंतराकस्मोहिर
ण्यं निधाय घृतेनद्यावापृथिवी आपृणे अभिजुहोति आमूलादव
स्त्रावयतीतिच॥ आपस्तंबे॥ तस्या विशाखे हिरण्यं निधाय घृतेनेतिस्रु
वेणहिरण्ये जुहुयात्तंतमोदुंबरीमन्ववस्रावयेदेषा सदः स्थूणा वर्षि
ष्ठेति॥ ॥भूमिप्राप्ते स्वाहाकरोति॥ भूमिसंप्राप्ते घृते स्वाहाकारं करोति॥ ॐ
दुंबर्या विशाखे प्रक्षिप्तमाज्यं यदा भूमिं प्राप्नोति तदेत्यर्थः॥ भूमिंगते स्वाहाक

रोतीति शाखांतरेश्रवणात्। अनाम्नातस्वाहाकारेषु होममंत्रेषु स्वाहा
कारेण प्राप्नोत्यत आह॥ ॥ सर्वत्र मंत्रवत्सु जुहोत्युपदेशात्। सर्वत्र मंत्रवत्सु
होमेषु स्वाहाकारं करोति। अनाम्नातस्वाहाकारेष्वपि कुतः जुहोत्युपद
शात्। अत्र होमे स्वाहाकारस्योपदेशात्। वषट्कारेणवा देवेभ्योन्नं प्रदीयत इति। तत्र वषट्कारस्य यजनेनियतत्वात् परिशेषा
त्स्वाहाकारस्य जुहोतेनिवेशः। नियतो हि वषट्कारो यजतौ॥ नाधारतः
पंच भाहतयो भवंत्यो श्रावयेत्याद्यः यास्त्या पाओधि वषट्कारोतीति अत
श्चाविधि॥ अनाम्नातप्रतिषेधाच्च। अनाम्नातस्वाहाकारेषु मंत्रेषु स्वा
हाकारेषु मंत्रेषु स्वाहाकारस्य प्रतिषेधाद्धारणाच्चैवं निश्चीतयेत्तेयत्स्वा
हाकारः सर्वत्र भवतीति। सकृल्लेवसमिष्टयजुः पीत्यत्र गर्भहोमेम
न्तोयस्य हीमि मंत्रेन स्वाहाकरोतीति स्वाहाकारोतिषिध्यते। तत्र चाम्ना
तो नास्ति। तथा न स्वाहाकरोति न त्वेषा हुतिरित्यनुनाहूते। स्वाहाका
रस्य सम्बन्धावगमाच्च। अमेत्रवत्सु पूर्णाहुत्यां स्वाहाकार प्रदानदृत्यत्र
च स्वाहाकारो विहितएवामंत्रवाहुविषयो यमारंभः॥ छंदोगसूत्रा उ दुंबं

र्यीनग्नापहृतो-स्वान्तदग्धमरुद्धया मत्या माहात्म्यमयोराजोच्छित्योहा
नाग्नीध्रीयं गत्वा महाव्याहृतिभिर्जुहुयादिति॥ ॥नाभिदघ्नं सदः॥ ना
भिः प्रमाणमस्येति नाभिदघ्नं। नाभिमात्रं। प्रमाणे द्वयसज्दघ्नञ्मात्रच
इति प्रमाणे दघ्नञ्प्रत्ययः। नाभिप्रमाणं सदः प्रान्तेषु उच्चं भवति। शाखां
तरान्नाभ्योन्नत्वमेव। औदुंबर्या मध्यस्थूणायाः यजमानमात्रीत्वोपदे
शात् तान्तया चाहुः पितृन्नभिः। सदसोऽयन्तमध्यउच्चैस्त्वं तदौदुंबरीप्रमाण
मेव हद्रष्टार्थत्वात् औदुंबर्युच्छ्रयणस्याय त्वं तेषु तदने तो पादि तृप्यते। सदइ
ति च वक्ष्यमाणस्य परिश्रितस्य नाम। संव्यवहारार्थं सदो द्वारं पूर्वेणैत्या
दो मन्त्रावा मनतिभिक्षा॥ इच्छया चासदसः प्रान्तेषु उच्चत्वं भवति। न
नाभिमात्रनियमः। शाखान्तरात्॥ ॥उदग्वंशं॥ ज्ञां वंशो मध्यवलः॥ सो
त्रोदगायतो भवति। तेनोदगायतमित्यर्थः। तत्र्द्वी चीनवंशं सदो
भवतीति श्रुतेः॥ ॥अष्टादशारत्नि। अष्टादशारत्नयः प्रमाणम
स्य तदष्टादशारत्नि। अत्र चोत्पन्नस्य मात्रचः प्रमाणे लो द्विगोर्नित्यमि
ति लुक्। तिर्यक्प्रमाणस्य वक्ष्यमाणत्वात् दैर्घ्यप्रमाणमुच्यते। अ

45

ष्टादशारत्निर्दीर्घसहस्यान्तः । पक्षान्तरमथाह ॥ ॥ एकविंशतिं
श्चतुर्विंशतिर्वा । अथवा एकविंशतिररत्नयः सदसो दैर्घ्यप्रमा
णं भवन्ति । अथवा चतुर्विंशतिररत्नयो दैर्घ्यप्रमाणं भवन्ति शाखान्तरा
त् ॥ ॥ नवतिर्यक् । त्रिष्वपि पक्षेषु नवारत्नयस्तिर्यक्प्रमाणं भवन्ति
। द्युत्वेपि प्रमाणान्तरमाह अर्हीयामो वा । अर्हायामो दैर्घ्यं । तस्याहु प्र
माणं । अर्हीयामः । अर्ह इति नपुंसकमिति समासः । यावत्प्रमाणं दीर्घस
हः क्रियते तस्य दैर्घ्यप्रमाणं स्यात् ईदृ प्रमाणेन तिर्यक् प्रमाणं च द्युत्व
प्रमाणं कुर्यादित्यर्थः । तेनाष्टादशारत्निदैर्घ्यपक्षे नवारत्निस्तिर्यक् । ए
कविंशत्यरत्निपक्षे सार्द्धदशारत्निस्तिर्यक्त्वं । चतुर्विंशत्यरत्निदैर्घ्यप
क्षे द्वादशारत्निस्तिर्यक्त्वमिति । अथवा सर्वपक्षेषु नवारत्निरेवेति । तत्रा
ष्टादशारत्निनवतिर्यगिति पक्षे परिशिष्टे सदः साधनश्लोकः ॥ नव केल
क्षणं कुर्यान्नाग्निपुत्रिपु उत्तमो नवकः पार्श्वः सदसो मानमुच्य
ते । इति । एकविंशत्यरत्निदीर्घनवतिर्यक्पक्षे अस्यामेव रज्जो नवकरज्ञान
लक्षणं सार्द्धहस्ते श्रोण्यंसांकनार्थं लक्षणं कर्तव्यं । अन्यस्मिन्नां च चतुर्वि

शत्यरत्निर्दीर्घेन वा तिर्यक्पक्षे वनिरंछन एकरत्कोण त्र्यं कथो नवंतीति वि
ज्ञेयः। नवकं लक्षणं तु प्राच्यंकनार्थमेवानयोः पक्षयोः एकविंशत्यरत्नि
नद्दर्घ्यायामपक्षे च साधनोपायस्तु च्यतोसार्द्धदशारत्निपुलक्षणं ततः सा
र्द्धदशारत्निप्रमाणं रज्जुं त्रेधा वा विभज्य त्रिपुरस्ताने पु तृतीये तृतीये भागे ल
क्षणानि। ततः सार्द्धदशारत्निर्धिति। एवं च सार्द्धकरत्निं देशेरत्निप्रमाणार
ज्जुर्भवतीति। अथ चतुर्विंशत्यरत्निदीर्घतद्दर्घ्यायामपक्षे। द्वादशसु ततस्था
नत्रये च तुर्ष्णां ततो द्वादशास्वेति। अथवा त्रिष्वपि पक्षे षड्ढप्रमाणे यारज्वा
यावत्प्रमाणोत्साहिनासमचतुरस्रसाधनोपायेन दक्ष्यातोदक्षिणोत्त
रतश्च चतुरस्रद्वयं पृथक् साधनीयं। अथ वेदी वीप्राचीवह्निचित्यं देर्घ्यप्र
माणेन रज्जुं मित्वा तद्द्वैनाभ्यस्याभ्यासस्य षष्ठे भागे मूलरज्जुसंनिकृष्टे
लक्षणं कृत्वा शास्त्रवद्दर्द्धप्रमाणेलक्षणं कुर्यात्। शास्त्रवर्द्धवात्र सर्वप
क्षे पुनर्वारत्न्यर्द्धं अथवा द्वितीयपक्षे सार्द्धदशारत्न्यर्द्धं सपादपंचारत्निः
। तृतीये च पक्षे द्वादशार्द्धं षडरत्निरिति॥ ॥आपस्तंबः॥ ॥नवार
त्निविस्तारं सप्तविंशतिर्दैर्घ्यायमपरिमितं वा यावदग्निभ्यो धिष्ण्येभ्यः

प्रासर्पकेभ्य आः संमन्येते स्वपरमिति॥ ॥ औदुंबरीमध्ये। पूर्वं निखा
तामौदुंबरीं स्कूणां सदसोमध्ये कुर्यात् तथा सदः साधनीयं यथासा ति
र्यक्प्रमाणस्य मध्यं भवति। सदः प्रकृत्य तन्मध्ये औदुंबरीं मिनोतीति
श्रुतत्वात् एष्वामेके। एके एष्वाम पिसदसः उदगायामस्य मध्ये कुर्वं
ति एके नेति। कुतः। उभयोर्नोद्वारं हविर्धानं भवत्युभयतो द्वारं स
हस्तस्मात् हृदयं पुरुषअंतरं संहणं इति श्रुतत्वात्। आअंतं मुखच्छिद्रादा
रभ्य गुदच्छिद्रपर्यंतं संहणं सुषिरं तेन सदसमुदरत्वोक्तेः हविर्धानस्य
च शिरस्त्वोक्तेः श्रुप्युक्तमेव एषायाः सदसोमध्ये करणं। अभ्यासभणा
ताभिधानम संगतमेव स्यात्। एषा उभयतो द्वार्ये इत्युक्तत्वात्। अन्तए
के गृहणं समजार्थानि यमेनोदगायमस्य मध्ये एषा कार्या। प्रागायामस्य म
ध्ये चौदुंबरीति॥ ॥ इंद्रस्य छदिरसि तन्मध्यमं छदिरारोप्या। परपूर्वं चापू
र्वे चापूर्वे क्रि यकारेण सदः प्रत्यासाध्य यावद् स्थूणानि खाय पूर्वाप
र द्वारयोः एष्वामुभयतो द्वार्येव निखायोपरि वंशादिं निधाय रज्जाबं
धनेन सर्वतो दृढं कुर्यात्। ततः प्रथमं सदसो दक्षिणे तृतीये भागे मध्य

47

प्रदेशेइंद्रस्यछदिरिति मंत्रेणोदग्गंमध्यमंछदिरारोप्यवंशानामुप
रि निधायापरपूर्वे चद्वेछदिषी आरोपयतितस्यमध्यछदिषोपरपार्श्वे
पूर्वपार्श्वेचेत्यर्थः। अथछदिरधिनिदधातीद्रस्यछदिरसीतिमद्ध
तदुमयान्तच्छदिषिउपदधातीतिश्रुतत्वात्त्रिवर्गोवोत्तरतः।साह
स्रा एकच्छदिषांत्रिवर्गउपदिष्टः।तदहशावेद्वेत्रिवर्गौतद्वेवतेनैव
क्रमेणोत्तरतोभवतः।एकोमध्यमेतृतीयेभागेद्विनीयस्तत्तउत्तरे
सदसस्तृतीयेभागेइतिछदिषः स्तृणमयाःकटइतिप्राणुक्तं नदभा
वेमितिर्वंशमयःकिलंजइतिचप्राणुक्तं।भितिवाभावेस्यत्रापीतिम
दुमयतश्छदिषीउपदधात्यजरनस्त्रीणितानिनवभवंतीतिश्रुतेस्त
त्।मंत्रस्तप्रतिछदिरावर्तनीयः॥ ।परिस्त्वेतिपरिचार्यपरिश्रीवणं
गंधस्यानिमर्शनान्येद्वैः।उपरिच्छादनानंतरंपरिस्त्वेतिमंत्रेणलोकसि
द्धैःषड्भिःपारिवारकैःसदःपरिवार्यपरिश्रियस्तपमितआग्नीध्रपूर्वद्वा
रस्यदक्षिणस्थूणादिप्रदक्षिणक्रमेणचतसृणांद्वार्याणांपरिश्रावणंर
ज्वांगंधिकलांसदसोनिष्ठितस्याभिमर्शनंचएनासेंद्रेरिंद्रलिंगकैर्मंत्रैःरिं

द्रस्यस्यूरित्यादिभिः कुर्यात्समासे ग्रंथिविमोचनमनुक्रमपि तूष्णीं कुर्या
त्। अत्रापि सर्वस्य तथैवाश्रुतत्वात्। तत्परिश्रयंति परित्वेति। अथ
लस्पृजन्यास्यं यथाप्रसिच्यंती द्रस्यस्यूरसीत्यर्थं ग्रंथिकरोती द्रस्य ध्रुवो
सीति नेघव पद्यातादिति तं यजमानेकर्मन्निष्पतीति। तथा तंतनिष्ठितममिम
ज्ञात्पें द्रमसीत्येंद्र ६ हि सहइत्तिछदिषामपि यजविशेषेण संख्याविशे
षाः शाखांतरे उक्तः। नवाग्निष्टोमे पंचदशोत्थ्ये षोडश षोडशिनि सप्तद
शवाजपेये तिरात्रे चैकविंशतिः सत्राहीनानामित्यापस्तंबः। मानवे च
।। नवछदीरग्निष्टोमे उदक्ष्यानि पंचदशोत्थ्ये सप्तदशानि रात्रे एकविं
शतिः सत्राहीनयोरेकादश षोडशिनि वाजपेये चेति। तथा। उदुंबर्या मध्य
मं छदिराद्धाति पूर्वामाथायापरामाद्धाति द्विः षि रौरभिनिधास्युत्तरा
एप्य पकर्षति परित्वागिर्वणो गिर इति परिश्रयति मध्यमापरयोः संधा
विंद्रायत्वेत्यारभ्य जुषतो द्रस्यस्यूरसीति प्रकर्षती द्रस्य ध्रुवोसीति प्रथमं ग्रं
थिं करोत्यां तान्सानि षीवे। द्वपरा संधीन्नानि षीव्य द्वार्योः प्रति षीव्यती
ति। नाध्वर्युः प्रत्यक् सदो नीयाद्धिष्ण्या होतारं वायद्यतीयादेंद्र्यावीसं चरेदिति

काठके च॥ ॥न प्रत्यङ्ङग्नीधादतीयादध्वर्युः समयायघ्नीधात्क्षेत्रस्य पत
त्रूति संचरेदिति॥ ॥हविर्द्धानापरार्द्धमुत्तरेणाग्नीध्रमग्न्यगारद्वारमंतर्वे
मंतर्वेद्यर्द्धं मध्यः सर्वं वा॥ अर्थाद्द्वारत्निपरिमाणस्य हविर्द्धानस्य समं द्विधा
विभक्तस्य योऽपरोंऽतःभागः अपरार्द्धं पश्चिमः समो विभागः। तमुत्तरेण जेव्य
माग्नीध्रं अग्नीध्रः द्वारेणं गृहं मिनोति स्थूणानिखननादिनानि ष्पादयती
त्यर्थः। अत एव यं चारत्निपरिमितं हविर्द्धाना परभागस्य तावत्परिमाण
त्वात्। तथा कर्तव्यं यथा हविर्द्धानस्याग्नीध्रस्य चापरप्रांतौ समतया भवतः
। अथ हविर्द्धानयोर्जघनार्द्धं समन्वीक्ष्योत्तरेणाग्नीध्रं मिनोतीति श्रुतेः। ह
विर्द्धानयोर्यदपरार्द्धं पश्चिमो भागस्तं समन्वीक्ष्य समतया निरीक्ष्येत्यर्थः। अ
ग्नीध्रः द्वारेणमाग्नीध्रं अग्नीध्रः द्वारेण रत्न्याननुक्रं यं ज्ञायते समं द्विधावि
भक्तस्य हविर्द्धानस्यापरार्द्धमुत्तरेणेति। तामुत्तरेण हविर्द्धाने दक्षिणेनाग्नीध्र
मिति न्यायकात्। हविर्द्धानाग्नीध्रांतरे कोणाकृलत्रामेतामिति सूत्राथा अप
रांतद्वाक्त्वपरार्द्धं वाची॥ सर्वत्र श्रुतौ जघनार्द्धशब्देद्वाहैःश्रुते अपरांतद्वाह
स्य दर्शनात्। तथाहि शार्दूलचर्मणो जघनार्द्धे सीसमिति श्रुतेरपरेंते सीस

48

निर्दध्याति॥ति। तथा। सर्वे जघना ईड्वै वाग्त आसीतेति श्रुते। तेनासे
परेतदिति। अत्रापि श्लथहविर्द्धुनियोजघना ई ऽ समंत्वी उक्षे तिश्रुते
हविर्द्धूइव वैग्म आसीनापरांतमुत्तरेणेति। तथा अग्नेः आसनो दक्षिण
मर्द्धं प्रस्तावोत्तराई सांधनमुपदिशन्नाह एतमुत्तरांतदिति अंतःशब्दमुत्त
राईपरमेवाह॥ ॥मानवे॥ उत्तरतः सदो हविर्द्धानयोः समयाई चउस्यू
णां दक्षिणाद्वारं प्राग्वंशमाग्नीध्रमिनोति तस्याईमंतर्वेद्यर्द्धं बहिर्वेदीति च
।आग्नीध्रमिति संज्ञासंव्यवहारार्थो। आग्नीध्रे हविर्यजतर्लिंजइडां प्राश्नंती
त्येवमाहोक्ताहशमाग्नीध्र। आग्न्य[illegible]गारद्वारं। अग्न्यगारमेतीत्(?)द्दक्षि
ण पूर्वेद्वारे यस्य तदग्न्यगारद्वारेण वेवास्यद्वारद्वयं। पूर्वद्वारं दक्षिणद्वारं
चापुनाकाहशां। अंतर्वेदिवेदिमध्ये अर्द्धं। अर्धार्द्धं बहिर्वेदि। अथमू
या अर्द्धार्द्धं हह अंतर्वेदिस्तोकं बहिर्वेदि। अथवा सर्वमप्यंतर्वेदिमध्येभ
वति। उत्तरेणाग्नीध्रमिनोति तस्याईमंतर्वेदि स्यादर्द्धं बहिर्वेद्यथो अपि
म योर्द्धादंतर्वेदि स्यात्कनीयो बहिर्वेद्यथो अपि सर्वमेवांतर्वेदस्यादि
ति श्रुतेः ततात् तस्याईमंतर्वेदीति दशतल सादायांतस्मिन्देशे मानत्वाय

स्मिन्नाधीयमानस्यार्द्धमंतर्वेदि भवति अर्द्धंच बहिर्वेदीति॥ ॥काठको
॥प्रत्यगुदग्विहृतानाहाग्नीध्रीयं शालामर्द्धमंतर्वेद्यर्द्धं बहिर्वेदि प्रागप
रस्माद्धिष्ण्यान्तात्सदोनवशय्याप्राक्सदोविशतिस्तिर्यगिति। आयतंवैचोष
ह्नं प्राक्रमेषु प्रत्यगुलकएवाग्नीध्रमिनोत्यर्द्धमंतर्वेद्यर्द्धं बहिर्वेदि प्राचीनवं
शं चतुःस्थूणं सर्वतः परिश्रितं दक्षिणेनउपचारो परस्माद्धिष्ण्यान्त्रिषु
पुरस्तात्प्रक्रमेषु सदोमिनोतीति॥ ॥निधाय्याविश्वदेवमसीत्यालभ
ते। एवमाग्नीध्रीयं निधायवैश्वदेवमसीति मंत्रेणालभते स्पृशतीत्यर्थः। तं
तिनिष्ठितमभिमृशति। वैश्वदेवमसीतिइतिश्रुतत्वात्। धिष्ण्यान्निवपत्सु
द्धनावोक्षिते पुरीषंनिवपति स्प्योनान्वारब्धउदङुःपविश्यविभूरसीति
प्रतिमंत्रं। धिष्ण्यानिनिवप्स्यमाणानांसिकतोपकीर्णानां पुरीषरसानां
नांनामधेयांसंव्यवहाराय धिष्ण्यानुपतिष्ठंतइत्याहो। उद्धनावोक्षिते
भूप्रदेशेनाधिष्ण्यान्निवपति। कथं। स्प्योनकरणभूतेनान्वारब्धे यज
मानेउदङ्मुखउपविश्याध्वर्युर्विभूरसीति प्रतिमंत्रेण एकैकेनमंत्रेण
यथाक्रममेकैकस्मिन्धिष्ण्ये हस्तेनैव पुरीषंनिवपति। नतुस्प्योनेति

त्पुरीषनिवापस्य कर्तुमशक्यत्वात्। स तु यजमानस्यात्वारंभेकर
णां। अत्र पूर्वस्मात्त्रीःपंचभूसंस्काराः परिसमूहनादयो भवंत्येव
ति याम गन्धर्थत्वायाग्न्यभिधानात्। ततस्तु हुत्वावोक्षितेऽद्भिः खननाभ्यु
क्षेणे धिके भवत इति। अत्र च पुरीषं चात्वालोत्खनने यच्चात्वालात्पुरीष
मितिपरिभाषितत्वात्॥ आग्नीध्रीयं पूर्वं। आग्नीध्रे भवं आग्नीध्रीयः
तमाग्नीध्रीयं धिष्ण्यं पूर्वं प्रथमं विभूरसीति मंत्रेण निवपति। आग्नी
ध्रगृहस्य मध्ये आग्नीध्रीयं प्रथमं विनोति तुः हि प्रथमं निवपेद
क्षिणेनतु दक्षिणासीन इति श्रु. तत्वात्॥ सिकताश्चा परिरोहणेति सर्वत्रा
सर्वत्र सर्वेषु धिष्ण्येषु पुरीषनिवापनंतरं धिष्ण्यानामुपरि रोहणेति
मंत्रेण सिकता उपकिरति। तेषां वा अनुपकिरंतीति श्रु. तत्वात्। आग्नी
ध्रीयस्य प्रकृतत्वात् सर्वत्रेत्युक्तं। कर्कोपाध्यायास्त्वाहुः सिकताश्चापरि ६ के।
यंते तत् ह्यामेवारोहणेनेति मंत्रस्य विभूरसीत्यादिषु सर्वेष्वनुषंग इति अयं
च शाखांतरीय एकवचनांतो रोहणानीके न याहि माग्ने विपदूहि माग्नेगो
याद्यमानमसजेत्र स्तुमामाहिं ः सी रिति। स्वशाखीयस्य बहुवचनांतस्य

नुधिष्ण्योपस्थं नेविनियोगं वक्ष्यति आग्नेयः सगरा इति धिष्ण्या नि
ति। एतद्दपि समूलं। तथा च मानवीं रौद्रेण नाकं नेति सर्वे त्वानुप जनीति
॥ ॥ काठके चद्रौणोस्यानुषंगस्सर्वत्रेति अत्र भूसंस्काराः पुरीषनिवापः
सिकतोपयुक्तिरांगवेयेन पदार्थाः सर्वधिष्ण्येष्वेकस्मात्मेवादिक्रमप्रवि
ष्टेनकर्तव्याः। आग्नीध्रीयेतु दङ्मुखेना होत्रीये प्रत्यङ्मुखेनामार्जा
ली ये दक्षिणामुखेना शेषेषूदङ्मुखेनेति। षड्दसि। आग्नीध्रीयनि
वापनंतरं सदसि षड्धिष्ण्यान्निवपति। तानेवाह॥ ॥ प्रत्यङ्मुखो होतारम
परेणाहोतुः पूर्वं सदो होतारमपरेणाहस्यामुत्तरेणाहस्यासंलग्नमेव होतुर्धि
ष्ण्यं प्रत्यङ्मुखो ध्वर्युर्निवपति। बहिः सदसीति तत्र पुरीषनिवापे मंत्रः॥ ॥ द
क्षिणपूर्वेणोदुंबरीमैत्रावरुणस्य। औदुंबरी दक्षिणपूर्वेण उदुंब
र्या आग्नेय्यां दिशि मैत्रावरुणस्य धिष्ण्यमुदङ्मुखो निवपति। आत्मासी
ति पुरीषनिवापे मंत्रः। होतृधिष्ण्याद्दक्षिणस्यां दिशि रत्निचतुष्टये सार्द्धय
त्नाधिके प्रशास्तृधिष्ण्यो भवति। तथा चोक्तं। अरत्निसार्द्धं च तुष्टये पदे होवे हो
तृधिष्ण्यतः॥ प्रशास्तृधिष्ण्यामानेस्यादिति। ॥ होतृधिष्ण्यमुत्तरेणाच

ऊरः समो ऽन्तरान्ब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकानां होतृधिष्ण्यमु
त्तरेण होतृधिष्ण्याद्दुत्तरस्यां दिशि चतुरो धिष्ण्याः समान्तराननुःस्यान्त
रालान्निवपति केषां ब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकानामिति । प्रथ
मं ब्राह्मणाच्छंसिनस्तु योऽसीति । ततनउत्तरं पोतुः । उशिगसीति । ततनउत्तरं ने
ष्टुः । अंघारिरसीति । ततनउत्तरमच्छावाकस्यावस्यूरिति ॥ ॥ आग्नीध्राद्द
क्षिणतः संप्रति वेद्यन्ते दक्षिणतो मार्जालीयं । आग्नीध्राद्दक्षिणतः सं
प्रतिसमन्तया आर्जालेन वेद्यन्ते दक्षिणतो मार्जालीयधिष्ण्यं निवप
ति शुन्ध्यूरिति । अत्रमानवेधिविशेषः । दक्षिणतत आग्नीध्रस्याग्नीध्रा
यायलक्षणं करोत्युद्दुत्यावोक्षचात्वालास्तान्निवपति शुन्ध्यावो ऽसि
कृताभिः प्रोक्षयत्येवं धिष्ण्यान्निवपति षडन्तः सदसः प्रक्ष्या देशे होत्री
यं बाहुमात्रे पश्चाद्धृदस्य दक्षिणं मैत्रावरुणीयं प्रथमेन यो ऽसमया उदुम्ब
रीं भवेष्वस्तः दो च इतरान्बाहुमात्रांतराब्राह्मणाच्छंस्यं पोत्रीयं नेष्ट्रीय
मच्छावाकीयं यावति होत्रीयादाग्नीध्रीयस्तवदिति दक्षिणतः पुरस्तान्मा
र्जालीयो दक्षिणत आग्नीध्रचत्वालस्यान्तर्वेद्यास्तावायसंस्तृणात्युत्तरत

देव भा अ०
५१

5/

श्चात्वालस्य शामित्रायतलक्षणं करोतीति। धिष्ण्येषु नव पादप्रागलो
काइत्यज्ञत्वा दृष्ट्वा दशांगुलानि धिष्ण्यस्य प्रमाणं। अष्टौ दशांगुलान्ये
व परस्परमंतरालमिति। तथा परिशिष्टे स्थानमभ्यर्जं सदो मध्यमरे
त्वायांत औदीचीनिराम या। तस्याः प्राचं पदं त्यक्त्वा ततो धिष्ण्यानि का
रयेदिति॥ ॥सदो द्वारं पूर्वेणेति तिष्ठन्ननुदिशत्याहवनीयबहिष्पवमा
नदेशचात्वालशामित्रौदुंबरिब्रह्मासनशालाद्वार्यप्राजहितं। सम्मा
डसीति प्रतिमंत्रं। अष्टानां धिष्ण्यानां निवायानं तरमध्वर्युः सदो द्वा
रं पूर्वेण सदसः पूर्वद्वारस्य पुरस्तात्तिष्ठन्सन्नसम्माडसि कृशानुरित्या
दिभिर्मंत्रैः प्रतिमंत्रमाहवनीयादीनां नुदिशति विलोकनीत्यर्थः। अनु
देशश्च संदर्शनमात्रं तथा चाहुर्मोधवाचार्याः। अनुदेशो नाम विधमा
नमेव पदार्थमनुत्वमेवं भवसीति निर्देश इति। तत्र सम्माडसीत्याहवनी
यमीक्षते तुज स्वो दिरछं। ततश्चात्वालस्य दक्षिणतो नत। वेदिबहिष्पवमानदे
शं परिषद्योसीति नभोसीति चात्वालमीक्षते। मृष्टोसीति शामित्रमीक्षते।
कृशानुधामासीत्यौदुंबरीं सदोमेयौमी क्षते। समुद्रोसि प्रशास्तुर्दक्षिणतः

सदसे ब्रह्मासनमीक्षते। आज्योसादिति शालायाद्धार्यमग्निं। अहिरसीतिप्र
जहितमाघंगार्हपत्सं मिति। प्राजहितइति यौगिकं नाम। अनुषंगपक्षे
सम्राडसीत्यादिषु परिरोद्धेणोत्पस्मात्तुषंगः। तेषां वा अर्द्धानुपकिरंत्यर्द्धा
ननुदिशं नीतिश्रु नत्वान्। अर्द्धं नाग्नीध्रीयादीन वधिष्ण्यानमृहासि
कनामिश्रोपकिरंति। अर्द्धानाहवनीयादीनष्टो अनुदिशं निविलोक
यंतिईक्षंते इत्यर्थः॥ ॥उकर ६ समुत्सोसि विश्वदेवा अंनतिरिक्षमप्र
तिष्ठेति। ततः समूत्सोसीत्यादिनामंत्रेणोत्करमनुदिशति। ईक्षते। अ
त्रापिरोद्धे त्येनुषंगोभवत्येवक्रमेणेवमत। अथाग्नीषोमीयपशोरूपक्र
ममाह परिस्तरणपात्रस ६ साहनप्रोक्षणाज्यानिर्वपणानिकृत्वोत्त
रपरिग्रहादिकरोति। आहवनीयशालाद्धार्यदक्षिणाग्नीनां परिस्त
रणं। पात्रयुक्तानां पात्राणां आसादनं तेषामेव प्रोक्षणं। पात्रसुकस्येवा
ज्यानिर्वपणं। अत्रानुक्रमपि आज्यनिर्वापात्पूर्वं उराहननं आज्य
निर्वापादनंतरं नरं च वेदकरणं भवत्येवा ततो महावेदेरुत्तरपरिग्रहा
दि करोति महावेदेः संमर्शनान्तं प्राहृतो। अधुना खननस्यावसरस्तस्य

निषेधाभावाश्वखननादि करोतीत्यर्थः। उत्तरपरिग्राहस्याहोयत्तत्ख
ननमेवनत्वाहांस्यर्थः ननु कथमेतत्क्षायने परिस्तरणपात्रासादनादि
सर्वं पाशुकमिति। उच्यते। धिष्ण्यनिवपनानंतरमग्नीषोमीयस्य पशोः
पत्रमस्य श्रृतत्वात्। सोपराह्ने वेदिः स्तीर्णाई ब्रतं प्रदायस्य सपसंपद्यं
नइधामध्यादधत्सुपयमनीयरूपकल्पयंत्याज्यमधिश्रयति स्रुवः
संमार्ष्टीति प्रागाज्याधिश्रयणात्पूर्वाह्न एव कृतमिति गम्यते। महावेदे
रपि खननात्प्राक्पूर्वेद्युरेव कृतं इदानीं खननादेव कर्त्तव्यं। नन्वश्रुत
त्वाद्वेदिसंस्काराणाम पूर्वत्वाद्ध सोमस्य दार्शो। पौर्णमासिकावेदिसंस्का
रा इह नैव प्राप्नुवंतीति सत्यं अपूर्वः सोमः न यापि उ वेदिशब्दस्य संस्का
रवचनत्वाद्वेदि शब्देनैवाक्षिप्ताइति कृत्वाक्रियेते। ननु वेदिशब्देन प्रापि
ताइति। कथंपुनः संस्कारवचनो वेदिशब्द इति। लोके कस्मिंश्चिद्भूमेर्वेदि
शब्दस्याप्रसिद्धत्वादेव संस्कारसंबंधस्यश्रुतत्वाद्भूपवसंस्कारवचन इति
गम्यते। तेन सोपराह्न इत्यपराह्ने स्तरणस्य विधानात् स्तरणात्प्राग्ये वेदि
संस्कारास्ते पूर्वाह्न एव कर्तव्या इत्यभिप्रायः। उत्तरपरिग्रहादि करो

तीति॥ ॥अंतःपात्यसहितं बर्हिरंतं प्रेष्यति। अंतःपात्यसहितेमंतः
पात्यसमीपे स्थितो बर्हिरंतं प्रोक्षणीरासादयेध्मां बर्हिरुपसादयेत्येव
मंतमेव प्रेष्यति। अथ वा इध्मं संनह्य। अंतःपात्यसहितं वेदानुमार्ज
नमंतःपात्यसहितं भवति। पराग्वेदे जघनार्द्धं त्रींऊरुत्स्यानीति शा
खांतरात्॥ ॥मानवे॥ नाप्रोक्षितामाक्रामेदुत्तरं परिग्राहं परिगृह्य
प्रत्यवमृज्याग्नेणाहवनीयात्त्रींऊर्जियेंचस्कंत्स्ताप्रोक्षणीरासादयेत्यादि
। प्रैषानंतरं रिग्राहं परिगृह्य प्रत्यवमृज्याग्नेणाहवनीयाच्च पाणिप्रक्षा संकुं६
लनं। सामर्थ्यात्। स्फ्योद्वकग्रहणं स्फ्यासादनं चाग्नेसकलप्रैषदानो
त्तरकालमेव भवति॥ बर्हिरंतं प्रेष्यति। उक्तार्थं। एवं सति प्रैषस्य देशो
नोक्तः स्यात्। इष्यते च सः। अन्यथा तत्र सर्वमासादयतीत्यत्र तत्रेति
शब्देन व्यवहितस्यांतःपात्यस्य परामर्शानुपपत्तेः। अत एव सूत्रेतेव मु
क्ता। अनुमार्जनं चार्थात्सदसोंतःपात्यस्य वांतराल एव भविष्यति। अन्य
त्र करणे व्यवायादिदोषात्॥ ॥तत्र सर्वमासादयति॥ तत्रांतःपात्ये सर्व
मासादयति। सर्वशब्देनात्राग्नीषोमप्रणयनसमयेऽयस्थ्य यस्य नयनं विहितं

न्तं सर्वमुच्यते। तेन शाकटबर्हिः। ग्रावद्रोणाव कलशासोमपात्राणि इध्मं च
उपयं च संनह्य वपाश्रपण्यौ रशने मंथन चरुस्यंपं चेति। वक्ष्यति त्वेतेषां
नयनं। आहवनीयं गच्छं सादाय ग्रावद्रोणाकलशमित्यादिना॥ ॥ अत्रे
व प्रोक्षणमिध्मं निधायाग्नीषोमीयायाइध्ममग्नीषोमीयार्थं निधाय
रच्छापयित्वा अत्रे वांतःपात्यदेश एव महावेदेः प्रोक्षणं भवति बर्हिः प्रो
क्षणो उ बर्हिरसि स्रुग्भ्यो त्वेति मंत्रः यथस्यापक्षे अनूबंध्यायक्षे उब
र्हिरसि त्वा जुष्टामिति। अत्र शाकटबर्हिष एव प्रोक्षणं आतिथ्याबर्हिष
स्त्व ग्रे भविष्यति। इध्मस्य चानेदानीं। तयोः परिष्टात्प्रोक्षणं निधाना
त्। स इध्ममेवाग्नइत्यादिना। अतो न तयोनं प्रोक्षणं। अपरेन्तरस्
त्रेणसह योजयंति। इध्मं निधायाग्नीषोमीयावेदेस्तरणमिति तेषां
हिः प्रोक्षित इध्मो भवति॥ ॥ वेदेस्तरणमग्रहणं प्रस्तरस्यापराह्णे अप
राह्णे महावेदेः स्तरणं भवति अयं तु विशेषस्तत्र प्रस्तरस्याग्रहणं ग्र
हणं न भवति। सोमस्य प्रस्तरेण प्रयोजनाभावात्। अत्र काठके विशेषः
।वेदिं शेषं स्तृणाति सस दोह विद्वानं घिसमस्तरवर्जमिति। मानवे चावे

दिंस्तृणाति यथा पदलोमा धाउशो यूत्वं नोवनयच्छादयंतो धिष्ण्या
न्खरो परवो तरवेदिं चेति ॥ ॥ अर्द्धव्रते प्रविश्य प्रणयनीयाधानं वेदि
स्तरणानंतरं पत्नीयजमानाभ्यामर्द्धव्रते प्रते सति प्रविश्य पत्नीशालां
शालाद्यार्थे प्रणनीयस्येध्माधानं कर्तव्यं। सोपराह्णे वेदिः स्तीर्णा चा
व्रतं प्रदाय संपद्यंते इध्मामभ्यादधत्सु पयमनीरूपकल्पयंतीमिध्म
ते:। अपराह्णे स्तीर्णा चेति ध्रुवस्तरणांतः। प्रदाय अन्यूर्वं तरमेव कृता
न्दर्शयति अर्द्धव्रतं प्रदायेति ध्रुवन्यूबाह्णे। अर्द्धव्रतमेव प्रतदर्शय
ति। संप्रपद्यंते समुद्दितः प्रपद्यंते अग्नीषोमप्रणयनायानदर्थमेवेध्मा
धानादि कुर्वंतीति। एतच्चेध्माधानमाग्नीध्रीयप्रणयनार्थं। अपम
पीध्मोपरिमितकाष्ठकल्पितयूनबहुः स्यात्। अपरिमितं प्रणयनीयं त्रि
यूनमिसुकत्वात्। प्रविश्येति प्रवेशनेन निष्क्रमणं लक्ष्यते। तच्च शा
लाछेदनार्थं। यतोगेयस्यति परिवाप्याये। दोहनमिति। तच्च वसान्ना
य्यधर्म प्रहस्या शाखाछेदनवत्सापाकरणादिकमपराह्णे मकृतिवत्सा
मोति। तस्य चावसरो न ज्ञायते इति न प्रवेशनेन लक्षितस्य तिः कमणास्या

ह्यानप्रयोजनस्येतत्प्रयोजनं कल्प्यते यच्छाखाच्छेदनार्थं नत्विध्मभरण
मितितेनात्र शाखाच्छेदः प्रगुणीकरणं तत्र सप्रवर्ग्ये चतुर्णां दोहानां व
त्सापाकरणं तत्र प्रथमतृतीयचतुर्थवत्सापाकरणेषु इंद्राय सरस्वति
वते भागमिति गोरूपस्पर्शनमंत्रे विशेषः द्वितीये चेंद्राय भागामिति द
धिघर्मस्य। अप्रवर्ग्योऽप्येवदोहाः। तत्र दधिघर्मो न भवति। ततः शा
खापरिवासनमुपवेषकरणं शाखोपूहनं चेति। एतावत्कृत्वा शालां प्र
विश्य प्रणयनीयाधानमिति। मानवे च तत्रणानंतरं। स्वर्ई व्रतेप्रस
योत्तरतस्त्वाहवनीयस्य ध्मा बर्हिरुपसादयतीति। काठके च वत्सापा
करणस्य कालांतरमुक्तं वत्सानपाकृत्य प्रवर्ग्यवंति पात्राण्युद्वास्याग्नि
कर्मणाग्निं प्रणीयेति उपसत्समासदनंतरं प्राक्प्रवर्ग्योत्सादनादित्यर्थः
। मानवे च॥ ॥उत्तमायामुपसदि योर्वाह्निकीं कृत्वा शाखामच्छेत्सर्ई व्र
ते प्रदाय सद्यः कुर्यादापराह्निकीमिति। आपस्तंबे चोत्तरपरिग्रहानंत
रं मुक्तं। उत्तरं परिग्रहं परिगृह्णात्यत्र प्रति प्रस्थाता शाखामाहृत्य मै
त्रावरुण्याः पयस्यायावत्सान्नयाकरोति प्रोक्ष्य बर्हिस्त्रिर्वेदिं प्रोक्षति

नाप्रोक्षितामभिचरं स्पृष्ट्वेनां बर्हिषा बहुलं प्राचीनं स्तीर्चेति। प्रति
प्रस्थाउः सवनीयनिर्वापविधानात् तस्यैव शाखाहरणं वत्सापाक
रणं च युक्तं। एवं च कात्यायनेनाग्नीद्रं द्रुमे कदं शंकुयालं निर्वपतीत्या
दिनाग्नीध्रस्य पुरोडाशधानाकरंभदधिपयस्यास्य सवनीयकरण
विधानात्त करणरूपं शाखाछेदनवत्सापाकरणदोहादिकं तत्रैव क
र्तव्यं। सवनीयार्था। नामत्वं करणं तस्याग्नकनायस्य नर्दकत्वविधा
नात्। सूचांतरेषु शाखाछेदनादेः कालांतरे दृष्टत्वाभ्राव्यकारेरयं
कालः किमूलं दृष्टाक स्मिन्नपि न ज्ञापते। न च प्रविश्येत्यस्या न्व
यानुपपत्त्याकल्प्य पिउ ज्ञाक्यते। अस्मान्यथेवोपपत्तेः। नादीक्षितोन्न
नयं तं पश्यतीति निषेधाद्धु नकरणं तंतरं प्रविश्येत्यस्य सार्थकत्वा
त्। तेन प्रविश्येत्यनेनैव ज्ञापते। नादीक्षिणा व्रतयं तं पश्यतीति। न च
शाखाछेदनाद्यध्वर्युकर्तृकं तस्याग्नीकर्तृत्वात्। येन प्रविश्य प्रणयनी
याधानमित्यनेन शाखाछेदनार्थनिष्क्रांतस्य प्रवेशनेन समानकर्तृक
मिध्माधानं विधीयते। न चेदमेव कर्तृकं प्रवेशनं येनैवाकर्तृकं शाखाछे

देवभाअ०
५५

55

दनार्थमिति श्रमणेमनेनलक्ष्येत। अतो अइहु व्रतंप्रदायसंप्रयाघ्नंनइति
बहुवचनदर्शनात्। तेनैनेनत्स्नवेशानंबहुकर्तृकंनैकस्मिन्निष्क्रमणंज्ञापय
ति। बहूनांचप्रवेशनमग्नीषोमप्रणयनार्थयुक्तमेव। तत्र बहूनामुपयोगात्
। अतः प्रवेशानेन शाखाछेदनार्थनिःष्क्रमणंलक्ष्यतइतियत्किंचिदेतत्। ते
नप्रागुक्तसूत्रांतरोक्तकालेषुशाखाछेदनादिकर्तव्यमितियुक्तं। स्वशाखा
यांकालस्यानुक्तत्वात्। तेनप्रातःप्रथमोपसद्दोनंतरंवाउपसत्समाप्त्यानंत
रंवाउत्तरपरिग्राहानंतरंवाबर्हिःप्रोक्षणात्प्रागग्नीध्रेणशाखाछेदनादि
वत्सापाकरणांतंकर्तव्यं॥ ॥आज्याधिश्रयणंस्रुक्संमार्जनोद्वासनावे
क्षणानिकृत्वा शाखाद्वार्यमपरेणाग्नेयजमानउपस्थेसोमंकृत्वा। आ
ग्नीध्रीयप्रणयनार्थमिध्मांशालाद्वार्येप्याधायाग्नीषोमीयार्थस्या
ज्यस्याधिश्रयणंस्रुक्संमार्जनंपश्वर्थानामेवस्रुचांसंमार्जनं आज्योद्वा
सनंपत्निशालाद्वार्यमपरेणाग्नेयजमानउत्संगेसोमंकृत्वाअवेक्षणंच
कृत्वाकर्तृशालाद्वार्यमपरेणयजमानउपस्थेउत्संगेसोमंकृत्वाआ
ग्नेयविशन्ति अनेकयजमानकेएवोपविशामि। उपस्थेसोमंकृत्वेतिस्का ५५

त्स्यच आनंतर्यमात्रे । पदार्थानां भिन्नकर्तृकत्वात् । प्राग्वंशनीयाधानानंत
रमाऽऽप्याधिश्रयणाद्देरेवश्रुतत्वात् । इध्माभ्यादधत्सुपयमनीरुपकल्प
यंत्याऽऽप्यमाधिश्रयतिस्रुवः संमार्ष्टि परस्ताद्राजानं यजमानः कुरुतइति अ
त्रैवेध्माधानाऽऽप्याधिश्रयणोत्तरं शालानोतिः क्रम्यांतः पात्यसमीपे
स्थित्वास्रुचः संमृड्ढीत्यादि प्रेषशेषं ब्रूयात् । ततस्यमोदकप्रहारं चकुर्या
त् । पाणिप्रक्षालनं चैव बर्हिरंत प्रेषानंतरं पूर्वमेवकृत्नं । सामर्थ्यात् । ततोंतः
पात्यदेशस्यास्मादनमात्रेवकार्यामवकल्पे पदानानंतरमेवस्यैचाद्वक्ष्य
हारदेर्दृष्टत्वादिति । ततः स्रुक्संमार्जनादि ॥ ॥ शालाद्वार्यमपरेणसोम
क्रयणीपदं परिकिरयति । ततोध्वर्युः शालाद्वार्यमपरेणसोमक्रयणीय
हं परिकिरयति । पदमिति पदपांसूनित्यर्थः । सोमक्रयण्याः पदं च यत्पूर्वस्था
स्थामोप्यमन्त्रेसमर्पितमासीत्तदेव । अथ सोमक्रयण्यै पदं जघने नगा
र्हपत्यं परिकिरवीति श्रुतेः । सोमक्रयण्याः पदं यत्पांसून्गार्हपत्यस्य
शालाद्वार्यस्य पश्चाद्दूरे परिसमंताच्चिरंति विक्षिपंतीत्यर्थः ॥ ॥ च
उद्दैक आहवनीयस्योपयमनीषाग्नीध्रीयस्योर्ध्वं यांजवेनेत्याएकेषा

खिनः सोमक्रयणीपदं चतुर्धा एवं सञ्चतुरो भागानचतुर्षु स्थानेषु कुर्वन्ति
। कथं तस्याह एवं चतुर्भागं आहवनीयस्योपयमनीषु अग्निप्रणयनकाले
। तथा तृतीयं चतुर्भागमाग्नीध्रीयस्योपयमनीषु । तृतीयचतुर्भागमक्षो
पांजने अक्षधुरावनक्तीत्यत्रांजनार्थाज्यशेषे पत्नीपाणावित्यर्थः चत्वा
राद्दिह च शालाद्वार्यमिपरेणो चतुर्थभागं परिकारनीत्यर्थः । तद्देवे चतुर्धा
कुर्वन्ति यत्राहवनीयमुद्धरन्ति तत्रास्योपयमनीषु चतुर्भागमहं चतुर्भागेणो
पांजनस्येतास्योपयमनीषु चतुर्भागं जघनेन गार्हपत्यं चतुर्भागं परिकिरन्तीति
श्रुतेः । अक्षमिति दक्षिणोत्स्याहविर्धानस्योत्तरस्य चाजात्यभिप्रायं चैक
वचनं ॥ ॥ आज्यप्रोक्षणीरन्तःपात्यदेशात्यूपपश्वाज्यग्रहणं । आज्य
प्रोक्षणीरन्तःपात्यसंज्ञके देशेवाकृतेः पश्चान् बहिर्वेदितत्यूपस्याज्यस्य
प्रोक्षणपाश्च प्रकृतिवद्देवोत्पवनं कृत्वा आज्यावेक्षणं च कृत्वा पश्वाज्य
ग्रहणं करोत्यध्वर्युः पशुसंबंधिसर्वपदार्थाज्यमाज्यग्रहणमित्यर्थः । अत
एव पश्वाज्यग्रहणमिति निर्देशात्सूर्वपत्रप्रसुनेत्रसुंपुप्रसुनेत्रसुपक्रान्तमि
तिज्ञायते । उत्पवनस्यान्तःपात्यदेशनियमः शाखान्तरात् । अन्तःपत्यवेक्षणं

नंतरमग्नीदा स्पमानीयबर्हिर्विघेवासादयति प्रोक्षिण्यासादनम
पि पूर्वंतत्रैव कृतं। अथोत्सूपाऽस्यंचतुर्गृहीतेजुह्वांचोपभृतिचगृहा
ति पंचगृहीतं पृषदाज्यं ज्योतिरसीत्यादिश्रुतत्वात्पश्चाऽग्न्यहणमि
त्युक्तं॥ ॥धारयंत्याऽऽज्यानि।गृहणानंतरं जौहवादीन्याज्यानि अन्ये
धारयंति आश्रुतत्वाहवनीयंप्रतिनयनायाधारयंतिस्रुचइति
श्रुतेः। अध्वर्युरर्पिताः सतीः स्रुचोन्येधारयंतीत्यर्थः॥ ॥अपिव्र
ताश्चान्वारभंतेयजमानं॥ अस्मिन्काले अपिव्रतायजमानमन्वारभं
ते। तस्माद्येपिव्रताःस्युस्तेन्वारभेतेइति श्रुतत्वात्। अनेकयजमान
केसर्वेषांयथास्वमपिव्रतान्वारंभः। अपिव्रतास्तु उच्यंतेयेषांयज
मानेनसह प्रासभो जनःस्यात् बंधुवर्गःस्यादित्यर्थइतिमाधवः॥
वाससाच्छादयत्येनान्। तनेवसयजमानानां पिव्रतानहतेनवाससा
च्छादयेत्। शाखांतरात्। अनेकयजमानकेसर्वेषांच्छादनं॥ प्राग्द
शेनवाससामात्मानंयजमानंच संच्छादयंतियुमांसोयजमानमन्वारभं
तेस्त्रियःपत्नीमितिमानवे॥ चरमुनाच्छियेत। चरन्सुइत्तस्ततोव्याप्ते

स्वपितृतेषु तेषामन्वारंभेनाद्रियेत । अतश्चाय चार प्रायश्चित्ताभा
वः ॥ ६ ॥ प्रदीप्त समिधं हुत्वा सोमेति प्रचरण्यामि जुहोति । ततो नन्तरं प्र
दीप्त समिधमभिप्रदीप्तस्य ध्यास्यो परिष्टं सोमेति मंत्रेण प्रचरण्याश्रु
वा सकृद्गृहीतमाज्यं जुहोति । अत्रैव सोमायेति देवतोद्देशः । यदा प्रदी
प्तस्य ध्यास्यो भवत्यथ जुहोति तदा सोमेति ॐ तत्वा तत्प्रचरणी नाम पात्रा
शीस्रुवं जुहूरेवा अन्या सुव्याप्तत्वासु तयाप्रचर्यं जुहोमाज्य स्वह स्तो विनि
युक्ता या होमार्थं हुतिर्या जुहूस्त्या घृतेन सा प्रचरणी इत्युच्यते । इति श्रीपितृ
भूत्याचार्याः इति प्रचरणी ॥ अन्तस्या आसादनादि सहैव कर्तव्यं सा
च व सा होमहवनीतः स्यात् प्रवति । यतो अनुबंध्यायां गं सम्भावे प्रतिप्र
ति प्रस्तुतानाव शावदानकाले प्रचरण्यां मेधमवद्यति । स्वत्रव सा होमहवन्यां
व्याहृता यां प्रचरणी हूयते ॥ ॥ तथा च मानवे । प्राग्वंशे पात्राणि प्रयुनक्ति
स्रवाहृ क्षिणां स्रुवं प्रचरणीं तस्याः प्रथमं तूष्णीं संमार्जनमिति ॥ ॥ जुषा
णो अप्तुरिति हुतीया । ततः पुनरपि प्रचरण्यां सकृद्गृहीतं गृहीत्वा जु
षाणो अप्तुराज्यस्येति मंत्रेण प्रदी । प्तस्य ध्यास्यो पर्येव हुतीया माहुति

57

जुहोति हुतीयाग्रहणाद्देवतावत्सर्वं लभ्यते। अत्र चेदमत्सवइति देवतो
द्देशः। अथावें सर्वे हुतीयामाहुतिं जुहोति जुषाणो अप्सुरिति श्रुतत्वात्
॥ ॥ अग्नये प्रह्रियमाणायानुवाचयति। होमानंतरं प्रद्दो समिधमुपयम्को
पयमनीमिहपयम्याचाग्नये प्रह्रियमाणायानुब्रूहीत्यनुवाचयति। होत्रा
नुवाचनं कारयति। उपयच्छंतीध्मामुपयच्छंसुपयमनीर् याहाग्नये प्रह्रिय
माणायानुब्रूहि सोमानायेति वेति श्रुतत्वात्॥ ॥ सोमाय प्रणीयमानाये
तिवा। अथवा सोमाय प्रणीयमानायानुब्रूहीतिवा प्रैषं ब्रूयात्। उभयोर्वि
कल्पेन श्रवणात्। शास्त्रांतरेत्वग्नीषोमाभ्यां प्रणीयमानाभ्यामित्येवंविधः
प्रैषउक्तोस्ति॥ ॥ आहवनीयं गच्छत्याहार्यग्नाव द्रोणकलशसोमपात्राणी
ध्मां बउहूयं च संनह्य वपाश्रपण्योर ज्ञानेन कलशयमणमरणीच। अनुवाच
नानंतरं सर्वे आहवनीयंगच्छंति तत्रयजमाना ध्वर्य्वादयो बहवः। किं कृ
त्वाग्नावाहित्याहार्य पूर्वं तरेह सोमगृहीत्वा पंच गन्तावाणोभिषवार्थाः। ते च पूर्व
मधिषवणे स्थापिता अपि वचनात्तत्र आहवनीयं नीतेसंस्कारार्थं द्रोणकल
शो दुमममयः कलशाकारो वैकंकतः तस्योपरि धारा ग्रहा गृह्यंते। तथा सो

देवभा अ०
५८

मपात्राणि सर्वाणि नवग्रहपात्राणि दश चमसाः परिप्लवा ऋतुपात्रे कुण्डप
वित्रे स्थाल्यश्च तस्याः पूतभृदाधवनीयो दुहं चनः सोमासंदीह त्येवमादीनि
। कठसूत्रे एतेषां सर्वेषामग्नीषोमीयपात्रैः सहासादनं प्रोक्षणेन यत्नेन
विहितमस्ति । स्वसूत्रोक्त द्रोणकलशस्य हस्तयुगपादानं श्वास्य नुकरणमात्रं ।
इध्मं । विंशतिकाष्ठकाः परिध्यादि चतुष्टयसंनद्धं सम्मार्गबर्हिः चतुष्टयं प्रा
गुक्तं कार्ष्मर्यमयाः परिधय आश्ववाल प्रस्तर ऐक्षव्यौ विधृती बर्हिः श्वण्त
देवाग्नीषोमीयोपस्थापि चतुष्टयमिति तत्र देवहूनेष्वाग्निपाश्व-प एयोव
पाश्वप्यते पात्र्यां तेव पाश्वपएयो कार्ष्मर्यमय्योर्वि शाखा विशाखा हूरशनो
द्विगुणा रशना पश्वर्था । यूपार्था त्रिगुणा रशना चात्वाल एकः । तृणे द्वे द
र्भे तृणे । आरणी द्वे अधरारणी उत्तरारणी श्चेति मंथन चतुष्ट
यं । मानवसूत्रे ग्नीषोमीयमजं चेति पठ्यते । एतानि सर्वाण्याहवनी
यं प्रतिगच्छंति । आज्यानि च ये : पूर्वं धृतानि तानि तत एव नयंति द्रव्यार्थत्वात्
। अन्यानि पयांसि यज्ञोक्तानि अर्थं प्रापत्त्वात् । आददते ग्ना ब्राह्मणेणकाल
शं वायव्यानी ध्मं कार्ष्मर्यमयान्परिधीनाश्ववालं प्रस्तरमैक्षव्यौ विधृ

58

नीतद्धूहिरूपसंनद्धमवतिष्ठपाश्वपएयोरग्राने अरणी अधिमंथनः
शाकलो हृषणो तत्समादाय प्राञ्च आयंतीतिश्रुतत्वात्। अन्नवाय व्या
नि सोमपात्राणि। अरणी अग्निमंथनार्थेऽधिनुपरिमथ्यतेऽस्मिन्नि
त्यधिमंथनः शकलः॥ हृषणौ वृषणौ संस्तुतेदर्भेतरुणेवे॥ ॥इति॥ ॥यद्य
प्याग्नीध्रे मीयेमंथनस्य विकल्पः। तथापि मंथनचउत्पन्नायतएवसव
नीयार्थे। मा वादीनामष्य.नेरघ्रु.रेवोपयो क्ष्यमाणानांनयनविधानात्
॥अग्नेनयेति वाचयति। आग्नीध्रं प्रतिगमनार्थं प्रवृत्तेषध्वर्युरग्नेनयेत्य
मुंमंत्रंयजमानं वाचयति। तदायमुवाचयत्यग्नेनयेत्यादिश्रुतत्वात्। आ
यन्तु आगच्छन्तु॥ ॥उत्तरेणास्य दोहत्वाग्नीध्रेऽग्निं निदधाति। सदउत्तरेणेत
त्सर्वहत्वा आग्नीध्रे आग्नीध्रमध्ये आग्नीध्रीयेधिष्ण्येनमग्निस्थापयेत्
ति। तथा समानवेत्। जंचाग्नीध्रामीयमनुनयंत्युत्तरेणास दोयंत्याग्नीध्री
येधिष्ण्ये ऽग्निंनिधायाग्नेनयेत्यभिजुहोत्याग्नीध्रेयजमानाएयासाद
यंत्यासंदीग्नावग्वायव्याद्रोणकलश मजंबध्नातीति। काठकेच। आग्नी
ध्रीयेधिष्ण्येपत्यद्रि.स्थन्निधायाग्नेनयइतिजुहोत्यत्राग्नावग्वायव्यानि

देवनाअ° ५८

59

सादयत्यासंदीचेति। तेनयाद्यपिस्वश्नतोसन्ने चाग्नीध्रस्येतावद्देग्राजि
तत्थापितन्नधिष्ण्येनिधायनमवसीयते॥ ॥ग्रावद्रोणकलशसोमपा
त्राणिच। ग्रावद्रोणकलशसोमपात्राणि चाग्नीध्रे आग्नीध्रमध्येनिद
धाति सर्वयद्येनगृहीतेन स एव निदधातीत्यर्थः। तानि चायंनइति होमा
नंतरं। तथाश्वतत्वात्। सन्निहिते जुहोत्ययंनइत्यभिधायतदेवनिदध
तिग्रावाद्रोणकलशंवायव्यान्यथेतरमादायायंतितदुत्तरेणाहवनी
यमुपसादयंतीति॥ ॥अयंनइति जुहोत्यस्मिन्। अस्मिन्नाग्नीध्रीये
ग्नौ अयंनइतिमंत्रेण सकृद्गृहीतमाज्यंपरिस्तरणसमिदाधानपूर्वकं
जुहोति। इदमग्नयइत्येतावानेवत्यागः। ततोग्रावादीनांनिधानंसोमा
संघाश्वतत्स्थापनं। तदेवनिदधातिग्रावेत्यादि इति बहुवचनाद्गृहीतारए
वनिदध्युः॥ ॥उत्तरेणपरिक्रम्याहवनीयस्योत्तरतोनिदधात्यन्यदाज्य
सोमवर्जं। तन्निहितमाग्नीध्रीयमुत्तरेणपरिक्रम्येध्माहीसादयाहवनी
यंप्रतिगत्वा आहवनीयस्योत्तरतोन्यदिध्मादि सर्वंनिदधातिस्थापयंति
आज्यानिसोमंचवर्जयित्वा अतश्चाज्यसोमानांधारणमेवासादनपर्यंतं ५८

अत एव वचनाद्दाक्ष्यानो सोमस्य चानयनं प्रतीयते। सोमस्य चान
यनयनं यजमानकर्तृकं ब्रह्मकर्तृकं वा भवतीत्यग्रे वक्ष्यतीति यजमानो
वा सोम ॥ हरेदिति। हुते च सोममाहाय्याग्निमन्वेतीति चान्यथेत्तरमाहा
यायं तितद्दुत्तरेणाहवनीयमुपसादयंतीति अग्नेरा ऽहवनीयस्योत्तरतो
निदधातीत्युक्तं ॥ ॥धिष्ण्याश्चवायो अंतरागमनं नकार्यमध्वर्युणे
त्यर्थः। तस्मादध्वर्युः समयाधिष्ण्यान्नातीयाद्ध्वर्युर्हि सोमसित्या
दितस्माद्गृहाध्वर्योः शालायामर्थः। स्यादुत्तरेणो वाग्नीध्रीयं ॥ संचरेदि
ति च श्रुतत्वात्। समयाशब्दो त्र मध्यवाची। धिष्ण्या समया धिष्ण्यानां म
ध्येनांतरालेनेत्यर्थः। अभितः परितः समया निकषेति समयायोगे धि
ष्ण्यानिति द्वितीया यो यपदविभक्तिः। नातीयान्। मा निक्रामेत्। किं कारण
मध्वर्युर्हि सोमं बिभर्तीति तत्र श्रुतं भावित्त सोमसंबंधं प्रत्येतत्स्यात्। तानेधि
ष्ण्याख्यान्नेन विहृते नास्येनास्मते सोमरक्षयाः तत्र श्रुतसो ध्वर्युरितेषां व्यन्त
मापद्यते तत्र श्रवनमग्निर्वाभिद्दहेद्धिष्ण्यानामग्नित्वात्। योवायं पशुपतिः
स वा एनं मक्षयेत्। रौद्रेणानीकेनेति धिष्ण्यानामुखस्य रौद्रत्वात्। तत्र श्रु

यद्विनामाध्वर्योः पत्नीशालायामर्थः स्यात्। तद्योजनविं। विधिस्क्वेत्सु तस्तेषु
भवेत्तत्र आग्नीध्रीसमुत्तरे सौवर्षं चरेत्। आग्नीध्रीयग्रहणमुपलक्षणं अ
न्यानपि विधिस्क्यानुत्तरे सौवेसमर्थः॥ तथा च मानवेन। अर्थमंतरेण चाला॰लमा
ग्नीध्रं वन विस्कयान्त्याव यावदध्वर्युश्चेत्सस मुद्भिः स्कयानेन्निक्रामेदेंद्री निगदे
द्विति॥ काठके च नमस्यद्भिः स्कयानतिसर्पेदध्वर्युरिति॥ तेन हविर्ह्याग्नीध्र
योरंतराले नैव सदसि गमनागमने सर्वेषां। पत्नीशालायां साग्नीध्रीयमुत्त
रे सौवेति॥ ॥इध्माप्रोक्षणादिकरोति॥ स्माहवनीयसमीपमागत्याहव
नीयस्योत्तरतः पशुसाधनानीध्मादीनि धायेध्मा प्रोक्षणादिपात्रसुवंक
र्मनिह्नुत्येव करोति। प्रोक्षणीरध्वर्युरादत्तेसद् ध्ममेवाग्रे प्रोक्षस्य यथेति
मथास्मै बर्हिः प्रयच्छति तत्सुरत्नाहूथ्यासादयति तत्प्रोक्ष्योपनीनीय
विस्त्रस्पग्रंथिमाश्ववालः प्रस्तरउपसंनद्धो भवति तेग ह्यति गृहीत्वा
प्रास्तरमेकदहुर्हिस्तृणाति तस्तीत्वा बर्हिः कार्ष्मर्यमयान्परिधीन्परिद
धाति परिधायपरिधीन्समिधावभ्यादधात्यभ्याधायसमिधावजुहो
तीतिग्रन्थः तत्वात। अत्राग्नीषोमीयार्थानां प्रोक्षणादीनां तत्रमार्थत्वपु

नः पाठः॥ ॥खरोत्तरार्द्धे एकस्य स्तरणं। बर्हिःस्तरणकाले खरोत्तरार्द्धे
हविर्द्धानमध्ये उपरवाणां पुरस्तात् तस्मात्तरार्द्धे उपरभागे अग्नित्या
बर्हिषएकस्य देकाद्दतिसहद्देवस्तरणं करोति। एकस्य द्वा हि स्तृणाती ति
श्रुतेः। अत्राहमीमांसाचार्याः। प्रस्तरं द्वयंगृहीत्वा बर्हिरेकाद्दस्ये चस्त
णीयादितिस्थानांतरमप्याह। पश्चाद्धोत्तरवेदेः। अथवोत्तरवेदेः पश्चा
देकस्य स्तरणमिति नखरोत्तरार्द्धे तु भयमेव च्छाखांतरात्॥ ॥आहवनीयस्य
ण अग्नौ वा रुद्र विष्णु विति जुहोति। सर्वस्वे ति आहवनीये क्षमणांते कर्मकृ
त्वा ततः आहवनीये क्षमणः कृत्वा ग्नौ सहहृहीतमाज्यं प्रचरण्यां जुहो
ति। रुद्र विष्णु विति मंत्रेणा अनेक यजमानके यज्ञपत्नीनिरोयज्ञपत्नी
रिति रेति वा होय यास्वं नवति सर्वाणि चैतानि विसर्जनानि हव नाति
। अभ्याधाय समिधाव यजुहोती तिश्रूयते। नचैवं समिदाधानानंतरं
होमः स्यात्। नाहवनीये क्षमणांते। नैवं उत्तरवाक्ये होमानंतरं स्कन्नसादम
श्रवणात्। ततस्मात् हेम्नस्म र्वा जुहोत्यथा साघस्कंबइति। अत्राप्यशब्देनहो
मानंतर्यमुच्यते। लब्धतद्देवोपपद्यते यदा आहवनीये क्षमणांते होमः कि

यमाणो होमानंतरमाहवनीयेक्षणं कृतं स्यात्तत्त्वास्रगासादनं। तद्वाचा
यशब्दविरोधः। समाभूदित्येवमर्थमाहवनीयेक्षणं कृतं तस्मान्न। ननूक्ता
र्थविरोधोऽस्मिन्पक्षे नाविरोधः पूर्वकालतायां हि क्त्वासमर्थनेनानंतर्यो
न चाहवनीयेक्षणं तेहोमे क्रियमाणे पूर्वकालता विरुध्यते॥ ॥पुरस्ता
द्वासमिधावादधायेति श्रुतेः। वाशब्दोऽप्यपक्षस्यावधारणो पुरस्तादेव
प्रागेवाहवनीयेक्षणाद्दूरं विघ्नविरूपे यहोमः कार्यः। उक्तं समिधावा
धायेति श्रुतेः। अभ्याधायसमिधावथं जुहोतीति हि श्रूयते। यद्द्विसम
मिदाधानादनंतरं होमः क्रियते तर्हि श्रुतेः शब्दार्थो भवति। आहवनी
येक्षणं तेवलक्षणं स्यात्। अभ्याधायसमिधौ समिदाधानादिक्त्वे
ति श्रुतिलक्षणयोः श्रुतिरेव न्याय्या न लक्षणा। यदुक्तं पूर्वकालताया
मेव क्त्वासमर्थ्यात्तनानंतर्ये इति। नात्र क्त्वाप्रत्यय एवानंतर्यसाधकः। किं
त्वथशब्दोऽपि अभ्याधायसमिधावथ जुहोतीति। यदपि वोक्तमुत्त
रवाक्ये यशब्दो विरुध्यत इति। न विरुध्यते। एवं हि वर्णयिष्यामः। स्रु
च आसाद्यापउयस्य श्याथ्याजानं प्रयाद्दं यजतीति। व्यवहितकल्पना

८१

दोपद्वन्ति चेत्। वरेलक्षणोयाव्यवहितं नकस्यनेति ॥ ॥ आसाद्याज्या
नि दक्षिणेनाग्नि कृष्णाजिनमास्तीर्य तस्मिं सोमं निदधाति देवसवित
रित। आज्यान्यासाद्य जुह्वादीनामाज्यस्थाल्यन्तानामासादनं कृत्वान
दनंतरं तेषामालंभमालम्भो लंभो दकालंभो ब्रह्मत्वा ब्रह्मणः सकाशा
त् यजमानस्य काशाद्वा सोममादाय हविर्धाने प्रविश्य पत्नंतो दक्षि
णेऽनसि दारक्षिणोदविर्द्धानेनीडे कृष्णाजिनं प्राग्ग्रीवमुत्तरलोम चा
स्तीर्य तत्र कृष्णाजिने देवसवितरेषतेसोमस्तं रक्षस्वेति नमन्त्रेण सोमं निद
धाति। अथास्याध्वर्युः स्वबोपतु पवस्य श्यणनं प्रपादयति। तथा सदक्षिणे
स्य हविर्द्धानस्य नीडे कृष्णाजिनमास्तृणाति नैतेनसादयति देवसवि
तरिलोंस्यादिति श्रुतेः। नीडेरथोपरेर यस्य पश्चाभागे इत्यर्थः। अत्रय
घपिसूत्रकारेणासायाज्यानीत्याज्यासादनानंतरमेव कृष्णाजिना
स्तरणा घृतकत आपिप्रातनंवविकृताविस्पनेन न्यायेज्यानालंभा स्यालं
भो दवोपस्पर्शनानिनतः पूर्वमेवक्षेवानयाचशास्त्रांतरे। अत्रासाद्य
वीढः विसमस्याप उपस्थश्यराज्ञानमाहायमप्रयधनदूति। न्यग्नो घश्व

न स्याप्यायि सोमेन सहैव प्रणयनमासादनं चाजहृष्टमंत्रो देवसवितरेभो
ते सोमन्य ग्रो धौतो रक्षस्व मा त्वा दभन्नमिति स्य नयोः स्थापनं॥ ॥एतन
न्वमिति विसृज्योपतिष्ठते। यजमानः सोमं विसृज्यैतन्त्वमित्यनेन मंत्रे
णसोममुपतिष्ठते। अत एव विसर्गोपदेशाद्धुं कृत्स्नाक्षिनेनिधानका
ले यजमानः सोमम न्वारभते इ[illegible]प्रतीयते। अथातः सृज्योपतिष्ठते
।एतत्त्वं देव सोमिति श्रुतत्वात्। अनुसृज्य सोमं मुक्त्वा यजमानः सोममुप
तिष्ठते। ऊनएनेतत्। अग्नीषोमो वाए तमंत्रजेन आदधानेयो दीक्षत
इति वचनानात्। सर्वमेव चात न्नहृष्टं निष्क्रमणादि याजमानकर्म मंत्रलिं
गवाक्यशेषेभ्य आम्नायप्रणोसमाधेः। तत्र चाध्वर्युणानुसृष्टो यजमा
न उपतिष्ठत इत्यस समानकर्तृकयोः पूर्वकालेऽनुसृज्येति ल्यप्प्राप्नो
ति। नैष दोषः। अध्वर्यवोपि ह्यनुसर्गो यजमानेन क्रियत एवा हेतुकर्तृ
त्वात्। यथा वा वं विसृज्य समिधमादधाति समिधमाधाय भस्मापोभ्य
वहरतीति। न नु च यथा प्रतिप्रेक्ष्यतापश्रुना प्रस्तुपविति ष्ठेत एवमाहृशो
वाक्यशेषो न वर्तितत्स्य सत्संबन्धपाशाद ग्नेश्च निर्मुच्यन इति तीन था

मंत्रे लिंगान्यपि यां विकांव यज्ञत्वात्विज आशिषमाशासते यज
मानस्यैव सैस्यैवं नाविधास्यंतानेन देवांनतेनो हि प्रतिप्रस्थातृ ष्टुवणो
यु नं यद्यजमानो न प्रस्यपतिष्ठते इह तु समारब्धा न प्रमाणेको ध्वर्युर्ने
श नो तित्लिगवावचशेषगम्यं यजमानं बाधिरुं ॥ तस्माद्यजमाना एवो
पस्थानां हृयः । अन्ये त्ववांतरदीक्षाविसर्गार्थे समिदाधाने न यजमा
नेम न्यं ते नोपस्थानं निष्क्रमणे इति हरिस्वामिनः । न्यग्रोधे चास्य मंत्र
स्योहः । एतं न घृच्च । देवो सोमान्यग्रोधो देवो देवांउपागा इति । अनेक
यजमानके वस्वर्वे गृहपतिमन्वारं मंते । विसज्योपस्थानं कुर्वाणां न
नं मंत्रेउपागाइहं वयं मनुष्यानिति बहुषु । इह मावां मनुष्यानिति द्वि
यजमानके विशेषः ॥ ॥ स्वाहानिरितिनिष्क्रम्याग्ने व्रतपाइत्याहव
नीये समिधमाधाय मदंतीरुपस्पृश्यांगुलीर्विसृजते । ततो यजमा
न एव स्वाहा । निर्वरुणस्येत्यनेन मंत्रेणाहविर्हीना निष्क्रम्यान्ति सृजस
न्ते व्रतयात्से व्रतयाइत्यनेन मंत्रेणाहवनीयेग्नौ समिधमाधाय स्वम
दंतीरुपस्पृश्य अंगुलीर्विसृजते विमुंचति । अथापनिष्क्रामति स्वा

हानिर्वरुणस्येति अथेत्याहवनीयसमिधमभ्यादधात्यग्नेव्रतपा इ
त्यादिनर्था अयाम्नांगुलिविसर्जनमिति श्रुतत्वात्। अनेकयजमान
के निष्क्रमणाद्यंगुलिविसर्गान्तं सर्वेषां भवति॥ ॥पत्नी चेद्गार्हपत्ये
नु संमीमहंतीरूपस्थाप्य पत्नी च गार्हपत्येनु संमीसमिधमाधाय स्वम
हं सीरूपस्थं शंगुल्लीविसर्जनं। नाना गार्हपत्यपक्षेनुस्वस्वगार्हपत्येस
र्वीसांसमिद्धानाद्यंगुलिविसर्गान्तं। एकगार्हपत्यपक्षे तस्मिन्नेव स
र्वाः पत्न्यः समिध आदध्युः। वाचा के महंतीः कृत्वा। महंती श्चात्वाले
कृत्वा अवसिच्य प्रतिपाद्य वक्ष्यमाणो कर्मक रोति। वरितार्थत्वात्स्त्र
तिपक्ति रिपं महंतीनां॥ ॥नामग्रहणं भोजने अस्यां तः कुर्व
ति। अतऊर्ध्वमस्य दीक्षितस्य नामग्रहणं भोजने कुर्वीत। अर्वाक्तः
पूर्वं न ऊर्ध्वं नीतिनिषेधो वसीयानि पुरुमात्र धर्मो यं। तस्मादस्यात्रा ५
श्नंतिमानुबोहि भवति तस्माद्यत्र नामग्रहं तिमानुषोहि भवतीति
श्रुतिः॥ वत्सनिवृत्तिः। व्रतमर्हंतीति व्रतस्य पयोमुखा ग्वाहिय घस्म
यजमानस्य वर्णविशेषेणोपदिष्टं तस्यात्तः परं निवृत्तिर्भवति॥ ॥

63

हविःशेषभक्षः। अतः परं यजमानो हविःशेषभक्षो भवेत्। हविषां पु
रोडाशधानादध्यादीनां शेषस्यैव भक्षो यस्मात्सो हविःशेषभक्षः स
च प्रातरेवानाद्यात्तस्मादुपवसथे नाश्नीयाद्दिनेति निषेधात्। प्रातः
सोमाद्धविःशेषांश्च भक्षांश्च भक्षयन्तीति श्रुतेः। सवनीयसवनीयशेषो
न हविर्मात्रस्यास्त्रेपि यजमानानां भक्षणोयसवनीयपुरोडाशा
नामेव हव्यपदेशात्। अथयन्नानां पुरोडाशाभक्ष्यो हविरुच्छिष्टम
सन्नमात्स्यादिति। अत्र मानवे विशेषः। हविष्यं पत्नी प्राश्नीयाद्धविरु
च्छिष्टं यजमानोग्नेणा हविर्द्धाने परेणास्य गृहं डान्दक्षिणेनास्यापरेण ब्र
स्नमेतु पद्विशल्येषसंचरइति॥ अग्नीषोमीयोतः पशुः। अनडु
हमग्नीषोमीयः पशुर्भवति। तस्माज्ज्यासादनां तं कर्म प्रागुक्तमेवौ
पशोर्द्देवताविधानार्थं तत्सूत्रं। अवधानज्ञापनार्थं वा। अतः
परं सौमिकैः पदार्थैर्व्यवहितं पाशुकमेव कर्म कर्तव्यमिति। उपांशुव
रं ति प्रागग्नीषोमीयाद्धिरस्यायमवधिरिति ज्ञापनार्थं। सा च घृतं च
पुरोडाशो वाग्नीषोमीयस्थाने स्यन्तं सोप्यस्मिन्नवसरे यथास्था

दि येव मर्थमन्वनी बोमी योतः पशुरि सत्र सत्रं ततं॥ ॥ तद्देवतः प
शुपरोडाशः। यद्देवत्यः पशुः तद्देवत्य एव पशुपुरोडाशो भवति यद्देव
त्यः पशुर्भवति तद्देवत्यं पुरोडाशमनुनिर्वपन्तीति श्रुतेः। पशुदेवता
ये पुरोडाशा इत्यस्यैवायं प्रपंचः॥ ७ ॥ अभ्यादधिकरोति। अंगुलिवि
सर्गानंतरमभ्यादानादि पाशुकं कर्म भवति। आज्यासादनांतस्य
पूर्वं कृतत्वाद् अभ्यादानादेरेवायमवसर इति॥ ॥ दक्षिणेन हविर्धानं
पश्विडां हरति पश्विडां सदसि होतुरर्थं एनायन यहविर्धानं दक्षिणेन
हरति। तथा वसति प्रादक्षिण्येन हरणेन मलस्यानुग्रहः कृतो भवतीति
॥ ॥ गुदहरती यव। गुदहरता यमपि तु पयप्रैमार्थे होतृधिष्ण्यं प्रतिसद
सि नेयं तदपि दक्षिणेन हविर्धानं हरति ॥ मार्जालीयं दक्षिणेन जाघ
नी। पत्नीसंयाजार्थे पत्नीशालायां जाघनी नेतव्या। सा च मार्जालीयं धि
ष्ण्यं दक्षिणेन हरति प्रादक्षिण्यानुग्रहायैव॥ ॥ प्रत्याहृत्य वासोमाह
वनीय यो रवकाशात्। अग्रवायेन मार्गेण पूर्वमाहृतानि अंतरायू
पाग्निं तेन वमार्गेण प्रत्याहृत्य एतानि इडादीनि उत्तरेण हविर्धानं ह

वनीयपोरवमवापानात्। यद्येतानिह विहृतानि दक्षिणेन वा प्रत्याहृत्य वा नानी
यंते। तदानीं सोमाहवनीययोरंतरालेन हरणं तयोरेभिर्व्वा यः। इतो
नवेतिन्वैतद्युज्यते। तस्माद्दक्षिणेन वा प्रत्याहृत्य वा नानि हरती
ति। तत्र दक्षिणेन हरणे प्राग्दक्षिणयोपचारास्य त्वनुग्रहः। प्रत्याहृ
त्य हरणे चोत्तरतउपचारत्वाश्वत्वनुग्रहो भवति। तस्मात् प्रत्याहृत्यै
वेत्ययमेव पक्षोऽवधार्यतेऽवाऽवधारणो॥ अथ यूपैकादशिन्यां वि
शेषमाह॥ यूपैकादशिनी वैरथाक्षमात्राण्यंतराणि। ज्योतिष्टोमेहि
विकल्पेन आग्नेयो ग्निष्टोमे सवनीयः पशुरिष्यते। यः स्तोमायन सं
स्था: पशवो भवंति। विकल्पेनाग्नेः॥ यसारस्वतादयो वारुणपर्यंताए
कादश सवनीया भवंति। तेषां नियोजनार्थमेकादशयूपः प्रतिपशुए
कैकोदूपो वा भवतीत्येतद्दनेनोच्यते। यूपैकादशिनीयेदिति वैवच्छेो
यद्यर्थीयदि यूपैकादशिनी भवति। एकादशानां वर्ग एकादशिनी। यू
पानामेकादशिनी यूपैकादशिनी। यदि पश्वैकादशिन्यां यूपैकादशिनी
भवति। एकादशयूपा भवंति। तदायं विशेषः। रथाक्षमात्राणि रथाक्ष

देश्वभाअ
६५

।चतुरश्ररत्नमस्त्रइति प्रमुखान्नोक्तत्वान्चतुर्भिरधिकैः सप्तांगुलैरनोन
वतिर्द्वादशांगुलश्च यूपावटः अत्रवेदिमानेविशेषः प्रमुखत्तनोक्तः।प
थायूपवेदिवर्हिनमित्येतद्वक्ष्यामो यावज्जुरेकादशोपरवा संक्षिप्यंतिद
शचरथाक्षांतस्यापश्चार्द्धुर्धिशोभागः सप्तक्रमसेनवेदिमिमीयादिति
षट्विंशत्यांगुले रेकोरत्निः।एवंविधे र्हशांतरथाक्षैरेकादशापरवे
श्यावत्वारः ६ शादरत्नयो विंशत्यंगुलैरधिका भवंचतुर्विंशतिनमो
भागो द्वावरत्नीएकमर्द्धांगुलतृतीयभागसहितं एतावन्मद्वतित्या तयूपे
कादशिन्याप्रक्रमस्यपरिमाणं।एतेनपरिमाणेनपंचदशमध्येकविंश
मित्यादिनोपायेनवेदिंमानकुर्यात्।यंक्षांतरमाह॥ ॥पूर्वार्द्धवासम
विभक्त्या ॥ अयवाप्राकृतप्रमाणमेववेदः दाक्ष्पूर्वार्द्धे समंमेकादशधा
विभक्ष्यैकादशयूपानिखनेत्। अस्मिन्पक्षे वेदिर्द्विर्नभवति॥ ॥
पक्षे संमितावाग्नेयपहि साग्निचित्येड्योतिष्टोमेयूपैकादशिनी भव
तितदायक्षसंमितायूपैकादशिनी भवति।पक्षसंमितवेदिपूर्वार्द्धेसमं
विज्ञेयैकादशयूपान्निखनेत्।अयथासाग्निचित्येपिसकलस्यवेदिपूर्वा

हूस्य समविभागेन वा ॥ रथाक्षमात्रांतराणि वा । एवं त्रयोपि
पक्षा अग्नावपि भवंति । तत्रेति कर्तव्यतारूपविशेषमाह यूपाहुत्य
भ्यादानपर्यावपनानि सकृत् । तत्र यूपैकादशिन्यां यूपाहुतिः अभ्या
दानं पर्यावपनं चैतानि सकृद्भवंति । कुतः । यूपाहुतिस्तावदारादुप
कारं करोति । अत एव सर्वयूपच्छेदनार्था क्रियमाणा अगृह्यमाणवि
शेषत्वात्तंत्रं भवंति । स च दानं पैवाभ्यासर्वयूपावटपरिलेखवादिसि
द्धः सकृदेव भवति । एकवारमेव संस्कृताभिर्यवमतीभिः प्रोक्षणीभिः
सर्वयूपानां प्रोक्षणसिद्धेः सकृदेव पर्यावापः अतः २ आरादुपकार
कत्वाद्धेतानि तंत्रं भवति ॥ एकादशानां यूपानां जोषणं द्वादशोस्या
पत्र्यापस्य वा त्रयोदशस्य वा स्वार्थे यूपस्य नाभिमात्रस्य च ॥ ॥ नैतेना
न्य सांनिपातित्वात् । यूपाहुत्यभ्यादानपर्यावपनेभ्योयदन्यत् यू
पांगं यूपावटांगं वा तद्भेदेन भवति । प्रतियूपं प्रस्तावटं वा तस्याहृत्तिर्भ
वतीत्यर्थः । कुतः । सांनिपातित्वात् । संनिपत्योपकारकत्वात् । संनिपत्यो
पकारकं हि गृह्यमाणविशेषत्वाद्भिद्यते । तस्मात्परिलेषणादि अव

दे॰ब॰मा॰अ॰
६६

वहोमांते मत्स्यवदं भिद्यते। अंजनादि च परि ध्यपरणां न मति पूर्वभि
द्यते इति। उदहकं स्थे यूपावटपरिलेखने प्राम्भतु प्यानेम ध्यमपरिलि
खमोत्तरं। प्रथमं मध्यमयूपावटं वेदेः पूर्वार्द्धे शंकुस्थाने परिलिख्य
तस्मोत्तरं परिलिखेत॥ ॥दक्षिणां वा। वाऽत्राह्मो विकल्पार्थः। अथवा
मध्यमं परिलिख्य तस्माद्दक्षिणं परिलिखेत॥ ॥व्यत्यासमितरान्
इतरान् यूपावटान् व्यत्यासं परिलिखति। व्यत्यस्य व्यत्यस्य व्यत्यासं।ण
मुलयमानी ह्येतपाद्धि उत्तरं वेदिपक्षे प्रथमं मध्यमं परिलिख्य त
स्मादुत्तरं द्वितीयं। मध्यमाद्दक्षिणं तृतीयं। द्वितीयादुत्तरं चतुर्थं। तृ
तीयाद्दक्षिणं पंचमं। चतुर्थादुत्तरं षष्ठं। पंचमाद्दक्षिणां सप्तमं। षष्ठा
दुत्तरमष्टमं। सप्तमाद्दक्षिणं नवमं। अष्टमादुत्तरं दशमं। नवमाद्दक्षि
णमेकादशमिति॥ ॥अथ दक्षिणं वेदिपक्षे। मध्यमं परिलिख्य त
स्माद्दक्षिणं द्वितीयां मध्यमादुत्तरं तृतीयं। द्वितीयाद्दक्षिणं चतुर्थं। तृ
तीयादुत्तरं पंचमं। चतुर्थाद्दक्षिणं षष्ठं। पंचमादुत्तरं सप्तमं। षष्ठाद्दक्षिण
मष्टमं। सप्तमादुत्तरं नवमं। अष्टमाद्दक्षिणं दशमं। नवमादुत्तरमेकादशं ६६

66

मिति। उच्छ्रयणे अस्यान्तमस्य श्रूतवान्। सयदुत्तरोऽग्निष्ठा स्यात्तेमे वाग्र
उच्छ्रयेद्यद्दक्षिणो मध्यो नतरं दक्षिणोर्ध्वमुत्तमं तथोऽही चामवत्य थोऽत्र
र थाऽहुर्दक्षिणमेवाग्नेऽग्निष्ठा उच्छ्रयेद्यथोत्तरमयद्दक्षिणमुत्तराद्धमुत्तमं
तथोऽहास्योद्विगेव कर्मानुसंतिष्ठतइति। तत्रस्य चकारोऽव क्ष्यतियथाश्वान
मुच्छ्रयतीति। यथोच्छ्रितमेव चपश्चालमेनं क्ष्यतियथोच्छ्रितं[illegible] सवनीया
नालभतइति।। तेन यूपोच्छ्रयणस्य पशुनियोजनार्थत्वाद्यूपार्थत्वाच्चा
वटपरिलेखनस्योच्छ्रयणेक्रमेणावपरिलेखनमिति।। ।।आवटहोमाक
रोति। परिलेखनावटहोमांतं निर्विशेषपदार्थानुसमयेन करोति। प्रासमेवे
तदुत्तरविवक्ष्यते।। ।।अंजनाद्यावखाले क्षणं [illegible]केकस्य। अ
ग्निष्ठादेः एकैकस्य यूपस्यांजनादिवपालेक्षणांतं कर्मकाण्डानुसमयेन
कृत्वा यत्र उत्तरं कर्तव्यं अग्निष्ठस्य मध्यमयूपस्य परिव्ययणादिकरो
ती। तस्मिन्काले मध्यमस्य स्वर्वं वगूहनांतं परिव्ययणं श्वो वा दक्षिणो
त्तराणामवगूहनांतं मालेननासंमवाप्स्परिवीयमध्यमवगूहनांतं। वा
विकल्पार्थः। अथवाम्ब्रः सोत्येह निपयमम मध्यमं यूपमवगूहनांतंप

रिवी यष्टुवगो यं कृत्वा परिव्ययणादि करोतीति। यस्मिन्काले मध्यम
स्य स्वर्वावगूहनं न परिव्ययणं कृत्वा तदनंतरं दक्षिणोत्तरयोर्यूपा
नामंजनावघवगूहनं तत्स्वर्वगूहनं नैकांडानुसमयेन कर्तव्यं। नाद्य॥
ऊतः आलंभनासंभवात्। नन्वद्य दक्षिणोत्तरेषु यूपेषु पश्चालंभः सं
भवति। पश्चालंभार्थमेव च यूपोच्छ्रयणं। स चेदद्य न भवति तर्हि किमर्थ
मद्योच्छ्रीयंते। उच्यः क्रियमाणो वांगानां प्रधानकालत्वानुग्रहः कृतो भवति
अथवा आलंभनासंभवादित्यस्यायमर्थः। अद्य दक्षिणोत्तरयोर्यू
पानां चषालेष्वर्पणांते क्रियमाणो आलंभोऽनवसर्जनेन संभवती विहितं
च तत्तत्परिव्ययणे हे शरवः समंतं परिमृश्याध्वर्युर्नावसृजेदा परिव्यय
णादिति। अथवा एवं योजना। ऊनतरोपविकल्पः। दक्षिणोत्तरयूपानां पू
र्वेद्युरुच्छ्रयणं उत्तरे द्युर्वेति। पश्चालंभकाल एवोच्छ्रयणं प्राप्नोति। अंगा
नां प्रधानकालत्वस्य न्याय्यत्वादित्येवं मा शंकि न आह। आलंभनासंभ
वादिति। सूत्रं यद्विकल्पः ऊनः॥ आलंभनासंभवादित्यनेन वाक्यं लक्ष्यते।
यस्मिन्वाक्ये आलंभनासंभवेन दोषत ऊक्तस्तस्माद्वाक्यादेषविकल्प इति।

त्विरेस्याकां। तद्धयं यूपैकादशिन्ये समयनमाहुः श्वः सुत्या येह लोवके सं
मिन्वंति। प्रकृहूनाये चेव श्वःसुत्यायै यूपमिन्वंती त्यच्चेत्येन तदौपवसथ्येह
न्सुछ्रयणस्य विधायकं। तदुक्तं थानकुर्यादग्निष्ठमेवोछ्रये दितरं वियूपमु
छ्रि त्याध्वर्युणपरिव्ययणान्तान्वजेत्य परिवीतावा एतान् रात्रिं वसंति
सन्नेव परिवक्षापशवैवि यूप मुछ्रयंति प्रातावेंपश्चान्तालभंते तेन स्मात्तुप्रा
तरेवोछ्रयेदितसुतरेषुः सुत्याहस्यच्छ्रयणमुपदिशति। तस्मात्पूर्वनिक
ए अविकल्पो ऽन्याय्यत्वाच्च श्च नेहेतुत्वेनोपादानमिति पितृभूतिः। हरि
स्वामिन सुतरेषु रे वदक्षिणोत्तराणां यूपानामुच्छ्रयणं सिद्धांतित वचनः
॥ तथाहि। तद्धयमिति तत्स्यांप्रकृतायां यूपैकादशिन्यां यं द्वयं द्विभागं
द्विखंडं यूपैकादशिन्यं समयनमवटप्रक्षेपणमाह वेदिवादाः॥ कथं
द्विभागं कालभेदात्। अग्निष्टस्योपवसथे समयनमितरेषां सुत्याया
मिति सिद्धांतोपन्यासः। अधुना ऽपूर्वपक्षमाह। श्वः सुत्या येह चेव
एके सं मिन्वंति। एके नावच्छारिकन श्वसुत्यार्थमग्नेवसकत्सां यूपैकादशि
नीं संपूर्णां मिन्वंति यथा समवटेषु। अन्ये त्वग्नीषोमीयमेव मिन्वांत्येते

सुत्यायामेवमिन्वंतीति शेषः। उत्तरत्र एक इतिवचनात्। अग्निष्ठ
मेवोच्छ्रयेदिति चेद् दशस्य पक्षान्तरस्य परतो दर्शनात्। किमर्थं पुनस्तेष्वः
सुत्यार्थमग्रेवसकलामेकादशिनीमिन्वंतीत्यत आह यऊच्छ्रिताये। चे
वाऊपिच्छेदनो प्राच्छि द्रताये सुत्यायाः। सहि सोमिकपाशुकयोरेकादशिकैः
कर्मभिरतिघनात्स्यां प्रग्रेकादशिन्यापरामीयेत। ततः कर्तुमिव न संभा
व्यते। तत्र अग्रपुनस्तस्यां मीयमानायांसा प्रविरला भविष्यत्येनावतः पू
र्वेद्युस्तत्वादित्यभिप्रायः। न केवलं प्रच्छिद्रताये श्वः सुत्याया अग्रसमिन्वंति
किंतर्हि तेनैव चकारेणानाश्वः सुत्यायै यूपं मिन्वंतीत्यक चेति प्रकृतिवद
तिदेशाच्चेत्यर्थः। तथाहि। एते चैकादशिनाः सवनीयविकाराः। सव
नीयाय च श्वः सुत्याया उपवसथे यूपं मिन्वंति न सुत्यायां विकारत्वा
देकादशिनीयूपा उपवसथ एव मातव्या इत्यर्थः। तद्दूनयानजुर्यादि
त्यादि। अग्निष्ठमेवमध्यमं यूपमुपवसथ उच्छ्रयेन्न तरान्। विकार
णामिदमिति प्रसिद्धमनुसंगं दर्शयति यूपमुच्छ्रित्य साध्वर्युस्तावन्ना
न्वर्जति नो सृजति यावत्परिवीतः। ततः किं। अपरिवीतान्येवैतेयूपाएता

णाग्निं वसंति सुत्यायामेवैषां परिव्ययणस्याम्नानात्। ततः किं। सा एव
तावदेकापरिवक्ष्यानिदाना न हि पूर्वयूपमनुसृत्येतरः शक्यस्तूच्छ्रयितु
। अपरस्य यस्य परिव्ययणं पशावेव पश्वर्थे यूपमुच्छ्रयंति। इतरे तु यूपे
पुरस्तादेव सुत्यायामेव पश्वालंभनं तेनोपपद्यते। तस्मादेव च वा
क्यशेषात्पश्वेकादशिनी सुत्यायां भवतीति गम्यते। इतरथा त्वग्नी
षोमीयस्य पुरस्तात् चितेस्युपवसथ एव स्यात्। तस्मात्स्थानेनैव या
श्वयूपानुच्छ्रये हि स्युपसंहारः। तदा च श्वो वा दक्षिणोत्तरामिति वा श्रु
तेः पूर्वपक्षे निरासार्थः। स्व एव दक्षिणोत्तराणामवगूहनं तं कर्तव्यं
नान्यस्यार्थः॥ अग्निष्ठं त्रिवृता रशनाः परिवेष्ट्य वासयति। उभयोर
पि पक्षयोरेषां दक्षिणोत्तरयूपानां रशनाः परिव्ययणार्थास्त्रिगुणा
रशना अग्निष्ठे परिवेष्ट्य वासयति। स चायं शेषयूपार्थो रशनासंस्का
रेणाग्निष्ठार्थः। एवं हि श्रूयते। अग्निष्ठा हि देवेर शनेस्माद्दायेतरान्यपरि
व्ययतीति तेनैतानग्निष्ठान्करोति। अत स्थाप्यमेधेवसत्स्यर्थाः संभवे पि
अग्निष्ठे रशनाः कृत्वा परिव्ययणं कर्तव्यमिति। ननु यदि प्रधानका

लानुरोधेनोत्तरे यूपरूद्ध्यीयंतेतत्राकिमकटपरिव्लेषणाद्यपि मध्य एव
कर्त्तव्यमित्याशंक्याह ॥ ॥ अभ्यंजनप्रभृतिकरोति यद्यप्युत्तरे यूपरूप
छ्यीयंतेतथापि पूर्वं यूपरेवावटहोमांतं कृत्वोत्तरे यूपरभ्यंजनप्रभृत्येवकु
रोति। अत्र विकल्पः सर्वभाष्यकृतामभिमतः। हरिस्वामिमतेषोत्तरे यू
रेव सर्वेषामुच्छ्रयणमिति अतश्चात्र मते अपार्श्वयूपानामवटहो
मांतमेवाग्न्यातश्चध्रुवगो याज्ञं तरमध्यममवगूहनांतं परिवीयेत
रेषामभ्यंजनादि अवगूहनांतं कांडानुसमयेन कुर्यात्। इतरेषां
मतेविकल्पः। अथवा मध्यमयूपस्यांजनाद्यवगूहनांतं कृत्वा पार्श्व
यूपानामंजनादि चषालेक्षणांतमेकैकस्य कर्त्तव्यं। अथवा मध्य एव
मध्यमस्यावगूहनांतं कृत्वान्येषामंजनाद्यवगूहनांतमिति। तदपि
नातिसमीचीनं। यतो वा दक्षिणोत्तराणयामित्यस्मिन्नेव पक्षे मध्य
स्य पूर्वमवगूहनांतं कृत्वा पश्चादन्येषामवगूहनांतमेकैकस्य क
र्त्तव्यमित्युक्तत्वात्। तेनायं पक्षे सर्वेषामंजनादि चषालेक्षणांतं कृत्वा
मध्यमस्य परिव्ययणादि कर्त्तव्यं। एवं सति मध्यमांसर्वेषां कृतं भवति

॥ यथाखातमुच्छ्रयनियेन क्रमेण खननं कृतं नैव क्रमेण यूपानामुच्छ्रय
णं करोति। स यदुत्तरेग्निष्ठास्यात्तमेवाग्नतउच्छ्रयेद् यद्दक्षिणमथोत्तरं द
क्षिणोर्द्धमुत्तमं तथोदीची भवतीति। तथा अथो इतरथोर्हृद्दक्षिणमे
वाग्नेग्निष्ठादुच्छ्रयेद् यो तरम यद्दक्षिणमुत्तरार्द्धमुत्तमं तथोह्यास्योद
गेव क्रमानुसंतिष्ठतइति च श्रुतत्वात्। अत्र च नद्दिमामेवित [illegible] थवी
मेतेर्व ज्ञेस्य एतइति वाक्यशेषाद्देः पूर्वार्द्धं समं विभज्य यूपा मातव्या
इति स्थिते सामर्थ्याद्देवार्द्धो अग्निष्ठस्यो त्तरतोर्द्धो दक्षिणतः प्राक्रवं
ति तत्र क्रमार्थमेतद्वचनं। तत्रापि त्रयाणामेवोच्छ्रयणक्रममुक्त्वा द
क्षिणार्द्धमुत्तमम् भिस्याहतेनतेषामेव चतुर्णामुच्छ्रयणस्य क्रमो नि
यम्यते नेतरेषां षण्णां येषामागंत्वात्तेषामयित थो [illegible] वी एकद शि
नी भवतीत्यतो वाक्यशेषात् क्रमो नियम्यते। एवमेवाथो इतरथा
हृद्दक्षिणमेवाग्नेग्निष्ठादित्यत्रापि पूर्ववद्वाक्यशेषाद्देव सर्वेषां क्रम
सिद्धिः। अधुना यूपानां प्रमाणमाह॥ ॥वर्षिष्ठो दक्षिणः॥ दक्षिणो
यूपो वर्षिष्ठः स्यात्। यूपानां मध्ये [illegible] निर्देशेन हृद्दोर्दी। घंतमो दक्षि

दे·व भा अ
७०

70

क्षिणतो यूपः स्यादित्यर्थः ॥ अनुपूर्वा इतरे अनुगताः पूर्वमनुपूर्वाः
प्रादयो गताद्यर्थे प्रथमयेति समासः। अनुगमनं चाहीनतया भव
ति। उच्छ्रयेणाल्पत्वेनागच्छन्ति निकृष्टाः स्युरनुगच्छन्ति। अत्र च प्रमाणेन नि
कृष्टत्वं। अत्र च दक्षिणस्य वर्षिष्ठत्वमुक्तं। तत उत्तरस्य तदपेक्षया ही
नप्रमाणत्वं। तदपेक्षया तत उत्तरस्य तदपेक्षया ततोऽप्युत्तरस्यैवमेव
मेकादशो यूपः सर्वतो निकृष्टो यथा भवति तथा कर्त्तव्यं। कुतः। एवं यो
वर्षिष्ठः सद्दक्षिणार्द्ध्यः सद्राघहसीयान्द्राघहसीयानुत्तरार्द्ध्यो ह्रसिष्ठस्त
थोदीची भवतीति श्रुतत्वात्। अत्र हरिस्वामिनः। परिमाणनियमो
यं यूपानां। योतिशयेन ह्रस्वोदीर्घतमः स एकादशारत्निरधिकारत्निर्वा
सद्दक्षिणार्द्धे सर्वेषामुच्छ्रयणीय इत्यर्थः। अथ द्रहसीयान्ह्रस्वतनः
षोडशारत्निरधिकाधिकान्निर्वा सदक्षिणार्द्धस्थानां तत्र देश एव मा
नव्यः। अथ द्रह्रसीयान्ह्रस्वतरः पूर्वस्मात्सं चदशारत्न्यादिः अथ द्रहसी
यानिति चीण्व्यां वा कस्माद्द्विर्वचनं। तेनांतराणिकानां त्रयोदशाद्यर
त्नित्वसिद्धिः। ननु वर्षिष्ठादिवचनात्संचारत्न्यादीनां परिमाणानां

७०

प्रत्याम्नायः स्यान्नैवं तेषामेव बहिर्विकल्पेन व्यवस्थार्थमिन्दुच-
क्रांना ऽप्यासपरिमाणां तरमायणार्थो गोरवप्रसंगात् तथोदीचीउद-
गवनता दक्षिणोन्नता च भवति । तथा च महाचार्य प्रशस्तेत्यभिप्रायः
। अत्राहुः केचिदाचार्याः द्विसीयस्तागारत्निवशेनैव कर्तव्या । नानिय-
मेनतिं यांत्र्यत्रश्चावर्णां पंचारात्निपरिवासयेत्यादि एवं च कृत्वायं
चारत्निः पंचदशपर्यंतः सोमदूर्त्यस्य पक्षस्यैक द्वे शिन्याम प्रसंग
एवाकिंतु अपरिमितपक्ष एव भवति । तथा चास्य षोडशारत्निः स-
र्वेषामुत्तरतो भवति । अत्र चैतेषां छेदनकाल एव मध्यमे परिलिखो
त्तरदक्षिणांचेत्यनयोः पक्षयोरन्यतरं पक्षं निर्दूर्ये क्रमेणायूपानां
छेदनं कर्तव्यं । तत्र यद्युत्तरं चेति पक्षो ऽवधारितस्तदायं छेदनक्रमः
। प्रथममेकविंशत्यरत्नेरग्निष्ठस्य मध्यच्छेदनं कर्तव्यं । तु छयणक्र-
मेण छेदनादेव कर्तव्यत्वात् । ततो विंशत्यरत्नेर्दक्षिणीयस्य ततो द्वाविं-
शत्यरत्नेरुत्तरीयस्यानंतरं एकोनविंशत्यरत्नेश्चतुर्थस्यानंतरं त्रयो-
विंशत्यरत्नेः पंचमस्य । ततो ष्टादशारत्नेः षष्ठस्यानंतरं चतुर्विंशत्यर

त्नेर्नवमस्या ततः षोडशारत्नेर्दशमस्या ततः षाड्विंशारत्नेरेकादशा
स्येति ततः पचारत्नेरुपशयस्या ततः पत्नीयूपस्य नाभिमात्रस्येति ।
यद्वा चमध्यमो छ्रयणानंतरं दक्षिणां वेति पक्षस्तदा अयं क्रमः । प्र
थमप्रथममेकविंशत्यरत्नेरग्निष्ठस्य मध्यमस्यच्छेदनं ततो द्वाविंशत्य
रत्नेर्द्वितीयस्या ततो विंशत्यरत्नेस्तृतीयस्या ततस्त्रयोविंशत्यरत्नेश्च
तुर्थस्या ततः एकोनविंशत्यरत्नेः पंचमस्या । ततश्चतुर्विंशत्यरत्नेः ष
ष्ठस्या ततो ष्टादशारत्नेः सप्तमस्या । ततः पंचविंशत्यरत्नेरष्टमस्या
ततः सप्तदशारत्नेर्नवमस्या ततः षड्विंशत्यरत्नेर्दशमस्या ततः षो
डशारत्नेरेकादशस्येति । ततः पंचारत्नेरुपशयस्या ततो नाभिमात्र
स्य त्वाष्ट्रार्थस्य पत्नीयूपस्येति तत्र एकैकस्य यूपस्यात्पन्यानित्यभि
मर्शनादि स्वरुनिष्पत्त्यंतं कांडानुसमयेन कार्यं । सर्वे च पदार्था अ
नेनैव क्रमेणा कर्तव्याः । प्रसंगाद्दाह ॥ ॥ तीव्रसुत्यग्निष्ठः प्राचीन
। वक्ष्यति । सोमातिपूतस्य तीव्रसुदस्य इति तत्र यूपे एकादशिन्यां
विशेषो वर्षिष्ठो भवति । अथाहिन रेयूपा अन्तुःपूर्वा भवंति । तत्र

चयूपपंक्तिः प्राची भवति। अत एव वचनात् तत्र यूपे एकादशिनी
भवतीति प्रतीयते॥ ॥यथायूपं वेदिवर्द्धनं॥ रथाक्षमात्राणि यूपां
तरालानि भवंति। तस्मिन्पक्षे यथायूप यथायूपांतरालवृद्धिरेवं वे
देरपि वर्द्धनं कर्त्तव्यं। अन्यथांतर्वेदि मिनोतीत्यंतर्वेद्यभावेन वैगु
ण्यं स्यात्। ननु नैवात्र वेदिर्यूपांगत्वेन विधीयते। किं तर्हि बर्हिः। वेद्यं
तर्वेदिलक्षितो देशः। मैवं। एवं सति लक्षणा स्यात्। वेदिशब्देन श्रु
त्या वेदिरुच्यते अतो न वेद्यास्यते न वेदिरंगत्वेन विधीयते। बर्हिः
वेदीत्ययमर्थः प्राप्तत्वादनुवाद इति। अतः साधूक्तं यथायूपं वेदि
वर्द्धनमिति। तच्च व्याख्यातं सुलभसूत्रे। यथायूपं वेदिवर्द्धनमि
से तद्व्याख्यामरस्वत्राए तथास्माभिर्वर्द्धनं भाष्यं रथाक्षमात्रांतरा
णी तस्मिन्नेव सत्रे पूर्वार्द्धे वासमं विभज्य पक्ष्ययोमिता वा गत्वा विस्तृत
योः पक्षयोर्वेदिवर्द्धनं न भवति॥ ॥वर्षिष्ठाद्दक्षिणां वितस्त्यं द्वादशं
निदध्यात्स्येष्ठत इति। द्वादशं यूपं वितस्त्यं। वर्षिष्ठादिति शयेन महतो द
क्षिणा यूपाद्दक्षिणं निदध्यादिति नमोच्छापयति। एषते पृथिव्यां लोके

72

आरण्यस्तेयप्युरित्येनावृश्चमाणेनानेन मंत्रेणाष्टादशत्वउपशाये
नवतिविनष्टसंदक्षिणानि दृष्टानि तेनिदधात्येषनेदथिव्यांलोक
इतिश्कृतत्वात्।विनष्टमनष्टाश्रीकृतमितिपिरमृतिः।ष्टादशानां
पूरणोष्टादशः प्रकृतत्वात्यूपः।यूपत्वाभिव्यंजकसंस्कारसंस्कृतो
दारुविशेषः।उपसमीपेइतरेषांयूपानांशेतेपतितउपशयइत्युप
शयः।विनष्टः।विविधमाम्नानाम्नष्टोनेतरयूपवदुपवर्जनचायं
निखातव्यः।तत्रश्रुतिः येषएवतक्षणोयइत्यनिप्रायः।अन्येता
हुः।विविधमवस्थितं तक्ष्णानाष्टाश्रितिरिति क्रियया संबध्यते।
ननक्षतिना।तस्मात्सकलाएवतष्टोविनष्टः तमेवंतेषांसमीपेनि
वैदृध्यातिनिधानयातिसचोपशयपवचनात्रैवोपशयानआ
समापेरास्तेउपशयनप्रयुक्तःएवायंयूपोनेतरवत्पशुनियोज
नार्थः।अन्येतत्वानियोजनांगत्वायूपधर्मान्न निच्छंतोर्थप्राप्तच्छे
दनार्थसामर्थ्यात्।यूपशब्दंगौणमनुवादंमन्यंते।तदयुक्तं।विधि
वाक्यगतस्ययूपशब्दस्यनिःप्रयोजनंगौणत्वाभ्युपगमस्यायुक्तत्वा

त्। तस्माद्यथैव निःप्रयोजनाद्यूपच्छेदनादिभिरुत्पाद्यत एवमुद्दश
यनाथोपीत्य यथलीछेदनादयश्चात्मद्धिक्रयाणां तात एव यूपाकार
मभिव्यंजयंतीति न एवातो वचनात्प्रकृतं तन्त्राधिकाराइत्यत आह
॥ ॥प्रोक्षणाद्यावगूहनात्करोत्यनर्थलुप्तं। अस्योपशयस्य प्रोक्ष
णादि प्रोक्षणादारभ्यावगूहनान्तं सर्ववगूहनपर्यंतान्संस्कारान्करो
ति। अनर्थलुप्तं न विद्यते अर्थः प्रयोजनं यस्यासावनर्थः। अनर्थो
लुप्तो यत्र तदनर्थलुप्तमिति क्रियाविशेषणं। अथवा अनर्थलुप्त
मंग यस्मात्करोतीति तेन निखनना भावात्तदर्थानामवटपरिलेखना
दीनामभावः इतराण्यवनि। प्रोक्षणं। अंजनं। चषालप्रतिमोकः पुन
रग्निष्ठादेशांजनं परिव्ययणं सर्ववगूहनमिति ॥ ॥ अपराव्याख्या
॥ प्रोक्षणाद्यावगूहनात्करोति। यूपशब्देन संस्कारवाचिना सर्वसंस्का
राणां प्रापितत्वात्। एवं प्राप्ते आह॥ ॥ अनर्थलुप्तं। उपशयप्रोक्षणा
दि संस्कारकर्म तस्मात्। यतस्तदर्थलुप्तं न ह्युपशये ननियोजनार्थः सा
ध्यते पुष्पनियोजनद्वारेणाव यूपसंस्कारा अप्रयुज्यं सर्वस्योपकुर्वंतीति नचो

पशयेनियुक्तेनपशु[illegible]नायागःसाध्यते[illegible]तस्मान्निरूपमाणा अपि
तत्रसंस्कारायागस्यानुपकारकाइतिलुप्येरन्॥ ॥ अनुच्छ्रितयूपान
रं। अथवाउत्तरयूपमनुच्छ्रितोपशयस्यदक्षिणतोनिधानंकरो
त्यनुच्छ्रितयूपा। शाखान्तरात्॥ ॥ यथोच्छ्रित ८ः सवनीयानालभन्तएका
दशिनोपकल्प्यानाग्नेयसारस्वतसौम्यपौष्णबार्हस्पत्यवैश्वदेवैन्द्रमा
रुतैन्द्राग्नसावित्रवारुणान्। यथोच्छ्रितमुच्छ्रयणंक्रमेणतेषुयूपे
षुएवंनैवदक्षिणोयाहृत्साग्नेयादीन्वारुणपर्यन्तान्सवनीयान्पशू
नालभन्ते। मध्यमेयूपेआग्नेयंद्वितीयेयोच्छ्रितेसारस्वतंतृतीयेयोच्छ्रिते
सौम्यं। चतुर्थेपौष्णं। पंचमेबार्हस्पत्यं। षष्ठेविश्वदेवं। सप्तमेऐन्द्रं। अष्ट
मेमारुतं। नवमेऐन्द्राग्नं। दशमेसावित्रं। एकादशेवारुणमिति। स आ
ग्नेयंप्रथमंपशुमालभेत। अथसारस्वतं। अथसौम्यं। अथपौष्णं। अथ
बार्हस्पत्यं। अथवैश्वदेवं। अथैन्द्रं। अथमारुतं। अथैन्द्राग्नं। अथसा
वित्रं। अथवारुणमन्ततआलभतेइतिश्रुतत्वात्। अपनयेयत्तस्मा
यदियूपैकादशिनीस्यादाग्नेयमेवाग्निष्ठेनियुंज्यादथेतरानपनये

येत्थं यूपस्य यथापूर्वमिति। तत्वानां यूपानां ये यूः एकं दक्षिणतः अपरमु
त्तरतः पुनरप्येवं पुनरप्येवमित्येवमानादुपनयेयुर्यूपानिति। यथापू
र्वीयः पूर्वः पशुस्तं पूर्वस्मिन्नेव यूपे। यो द्वितीयस्तं द्वितीय इत्येवमिति। अ
ग्नीषोमीयपशोः कर्मणो वनियोजनस्य अतत्वाद्यथोक्तमित्यर्थः। एके नाभि
तृणेन सर्वेषामुपाकरणस्य कर्तुं कथत्वादेकतृणेनेत्यर्थः। सवनीयानि
त्येतेषां सवनीयत्वज्ञानार्थं॥ ॥एकयूपे पश्वेकादशिन्यामाग्नेयं नियुज्य
तस्मिंस्तस्मिन्नितरान्नुदीचः। एकादशानां वर्ग एकादशिनी। पश्वनामेका
दशिनी पश्वेकादशिनी। सा च द्विविधा। प्रतिपशुयूपा एकयूपा च। तत्र प्र
तिपशुयूपायां नियोजनप्रकार उक्तः। इदानीमेकयूपायामुच्यते। पश्वेका
दशिन्यां यदा एक एव यूपो भवति। तदा तस्मिन्नेकस्मिन्यूपे आग्नेयं नि
युज्य ततः सारस्वतादीं स्तस्मिंस्तस्मिन्नाग्नेयाद्यो पूर्वपूर्वं नियुङ्क्ते उदीचोरी
त्यानि युनक्ति। यूपे आग्नेयः। तस्य गले तस्मादुत्तरं सारस्वतः। तस्य गले सो
म्यः। सौम्यस्य गले पौष्णः। पौष्णस्य गले बार्हस्पत्यः। बार्हस्पत्यस्य गले
वैश्वदेवः। तस्य गले ऐन्द्रः। ऐन्द्रस्य गले मारुतः। तस्य गले ऐन्द्राग्नः। तस्य गले

श। ५

दे॰ व भा अ॰ सावित्रः तस्य गले उत्तरतो वारुण इति। यद्यपश्चैकादशिनी स्यात् आग्नेय
मेव यूप आलभेरन्नथेतरान्यथापूर्वमिति श्रुतत्वात्। यदि पश्वैकादशि
न्येव स्यात् यूपैकादशिनी। इतरथा तु यूपैकादशिन्यामेव पश्वैकादशिन्या
भवितव्यं। तत्र यदि पश्वैकादशिनी स्यादिति पूर्वस्मात्स्वशिष्टमेतत्। आ
ग्नेयमेव यूपे नियोज्य। अथेतरान्यथापूर्वं यो यः पूर्वः पशुरस्मिंस्तस्मिं
न्नुत्तरं उत्तरमालभेरन्निव तिवर्तते। एतदेव चात्र विधेयं। आग्नेयस्य
तु यूप आलम्भः प्राप्त एवानूद्यते। अन्यप्रनाडिकया यूपेनैवानयक्रमेण
स्यक्रियमाणत्वान्नपशूनां यूपस्थानापत्तिः। तेन यूपधर्मा न भवन्ति।
केचित्स्थानापत्तिमन्यमाना अनर्थकत्वात् यूपधर्माः पशोर्भवन्तीत्याहुः
। अत्र पशुपुरोडाशो वैश्वदेवमारुतैन्द्राग्नो द्वादशकपालः। शेषा अष्टौ
अष्टाकपाला इति आग्नेयः प्रथमो गच्छत्यन्वारब्धो तु पूर्वा इतरे। अ
तः प्रभृति यूपैकादशिनीपश्वैकादशिन्योः साधारणमेवोच्यते। आ
ग्नेयः पशुः प्रतिप्रस्थात्रान्वारब्धः प्रथमो गच्छति। इतरे द्वापद्वावः
सारस्वतादयो वारुणपर्यन्ता अनन्वारब्धा एव आनुपूर्व्या अनुगामि

नाभवेयुः। अनुगताः पूर्वमनुपूर्व्यां॰। हरिस्वामिनः पश्चाद्धामिनइत्य
र्थः। तान्यत्रोद्दीचोनयंस्त्वाग्नेयमेवप्रथमंनयंस्यथेतराण्यथापूर्वमिति
अ॰। तत्वा त। आग्नेयमेवप्रथमंनयत्यन्वाहार्यमित्यभिप्रायः। अथेत
राननन्वाहार्यानेवदशमितारोनयेयुरित्येतच्छ्रुत्यस्वांतरास्पष्टीकरणीयं।
इतरथा त्वेषनयनक्रमः। प्रासङ्ग एवेत्यवचनीयः स्यादिति हरिस्वामिनः
॥ ॥दक्षिणं चनिघ्नंत्येनमुत्तरमुत्तरमितरान्। नियोजनच संज्ञपने
पि दक्षिणोत्तरदेशयोरिदमुच्यते। एनमाग्नेयं दक्षिणं निघ्नंतिमार
यंति शमितारः। इतरान्दशपश्चन्तु उत्तरमुत्तरं घ्नंति। आग्नेयादुत्तरं हि ना
यं। ततोप्युत्तरं तृतीयमेवमानातन्। तान्यत्र निविद्धंस्याग्नेयमेवप्रथ
मं दक्षिणार्द्धे निविध्यंत्यथेतराननुदीचोतिनीययथापूर्वमिति। अ॰। तत्वा
ता। सौत्रामायनपशूनां उयूपएकालंभोनगलमविकया। सर्वेषामन्वारंभो
युगेपद्ममनां सर्वेषां चात्वालस्य पश्चादेव संज्ञपनमिति। तेषां पश्चैकाद
शिनीधर्माग्रहणात्। पशुगणोडपप्रैषादीनां प्रतिपन्वाहत्तोप्रासमाह
समानमुपप्रैष्यपरिपशव्यं संज्ञपयान्वगन्मा क्षएण मुकासिशामित्रां

तद्धीनप्रश्चे दृत्तोक संप्रेषस्त्रामित्रनुशासनसंवादवन स्यातिस्थिरष्टकादि
द्वा:। पशुगणे उपप्रैषादिद्धं। पशुगणे तु उपप्रैषादि इद्धं तत्समानं भवतीति नै
मित्तिकं भवति न प्रतिपश्वावर्तनं तदुक्तमर्थः। कुतः। उपप्रैषेणैतावदध्रिगो
रर्थे होता प्रेष्यते। स चैकोऽध्रिगुः समानकालोऽनुष्ठीयमानो विशेषत्वाद्देव
ते नैव संज्ञपयानुगच्छति। तच्च शमितृः संबोधने। तदपि संज्ञपयानुगम
न्तिसेवमुक्ते समाने। सर्वपशूनां संज्ञपनस्यैककालत्वात्। स च संस्कृ
ताभिरेव प्रोक्षणीभिः सर्वपशूनां प्रोक्षणं हि सिद्धं स्यात्। अपि न प्रतिपशु
भिद्यते। अस्य मेधे उपपुनः संस्कारो वचनात् न तर्पयित्वा अपि पुनः संस्कृत्य
प्रोक्षणीरितरेतरस्य पशुप्रोक्षणीनिरपेक्षे [illegible] नाप्यनुके। न सर्वपशूनां
पर्यग्निकरणस्य सिद्धेर्न प्रतिपशुत्समुक्तभेदः। अग्निनाप्येकेनैव
सर्वपशूनामवदानसिद्धेः सोऽप्येक एव भवति शामित्रेणाप्येकेनैव स
र्वपशूनां श्रपणसिद्धेर्न भेदः। अन्तर्हीनत्रणानां यो पक्षे दीप्ततमगंच
नत्वाद्यर्थमपि समानमेव भवति सर्वमूलानां सहैवोल्कारे निरसनमभिधा
ने चाऽसर्वत्रणाप्राणां च सहैवाहवनीयप्रासनं भावयत्वात्। अज्ञानतद्धी

न पृच्छेद शब्दे न न च्चायल्लक्ष्यते। अत्र प्रतिपशुहेतुहृदयोः स्नाणांस्व
वेदेर्गासो ऽएवैकसंज्ञयनस्थानेप्रतिपशुपासनी। यांएवैकं च वया
प्रच्छेदनकालेनन्तर्हितिविनियोऽङ्गःस्तोकसंप्रेषः स्तोकेभ्योनुब्रूहीत्ययं प्रे
षः सोपिकाले एकत्वात्सकृदेव भवति। एवं शमित्रानुयाजसनमपि सकृदे
व भवति त्रिः प्रत्याश्रावणादिकं। त्रिः प्रच्युतानां पशोर्हृदयान्युन्नमानि
उत्कृतादि सूक्तिनेन सर्वपशूनां कार्यसिद्धेः। अथ तं हविरित्ययं संवादोपि
सकृदेव भवति एककालत्वात्। वनस्पतियागोपि सकृदेव। प्रयाजादिवद
दुपकारकत्वात्। अगृह्यमाणविशेषत्वाच्च। स्विष्टकृदिडयोस्तु नद्रव्य
भेदेगुणयोगादित्यनेनैव समानत्वासिद्धेर्वरदाना चंपुनर्ग्रहणं। पशुगणे
स्विष्टकृतद्रव्याश्रावदानमपि सर्वपशुप्रचारान्ते अन्त्यपशुप्रचारान्ते
अन्त्यपश्ववदानोन्तरकालं तत्प्रदानात्स्वाकृ सर्वपशूनां सहव कर्तव्यं। न
नुप्रतिपशुप्रधानावदानग्रहणानन्तरमेवतत्सो विष्टकृन्नानामेडानां
चावदानमितिकर्त्तादिदमः। तं नर नेषुविशेषः। तत्रसंप्रतिपन्नदेवता
केषु पशुषु दैवतेनैरवानुसमयः। ननु दैवतेनैडान्तकाण्डेनेति। विप्रतिपन्नदे

वतावेष्टैकादशिनेष्वैवैकस्य पशोर्हैवत।सोविष्टकृतेडान्यवदा
यहोमं चदैवतस्य कृत्वाततः पश्वंतरस्यापितथैव कुर्यादितियंचम
स्याहुतीये।तथाचकात्यायने॥यदि बहवः पशवः पुरोडाशावास्यजुहू
पभृतोरःपत्नीयं जुह्वामवदायाभिघार्योपभृत्यवदायानभिघार्योतर
स्याभिघारणमनुस्मैविष्टकृतमभिघारये अत्रैकचनसहोपभृदेवमे
वकुर्यादितितेनेयमेवंप्यवस्था युक्तावद्दैवत्ये पुद्दैवतेरे वानुसमयः
।नत्वैडांतकांडेनानानाद्दैवतेषु ऐकादशिनादिषुपशुषु एवैकस्य पशो
र्दैवतसौविष्टकृतैडान्यवदाय दैवतव्यतिरिक्तान्यनभिघार्यदैवतानि
हुत्वापश्वंतराणामप्येवं कुर्यात्।अंसपपश्ववदानानंतरं सौविष्टकृतादी
नामभिघारइतिरहस्यं।पशुपुरोडाशयागेष्वपिबहुष्वेवमेवजुहूपभृ
पत्नीयप्रतियागमुपभृत्यवदानं अंसहविषोविदानानंतरमुपभृत्यव
दानं अंस हविषोविदानानंतरमुपभृत्यभिघारः॥ ॥इतिपशुयागः॥
ऊँ समासिच्यावसाहोमस्तु दत्तिपशुष्ठयागभवतीतिवक्ष्यति।।सवोन्व
साहोमशेषान्वकचित्यात्रांतरे स्थापितान्तु होसमासिच्याएकस्यांजुहूं

र्यान्वसाशेषान्तिनीयस्यहेवादिग्व्याघारणं करोति। कालेवत्वादेव॥

।प्रभूतत्वाद्धुता। सर्वपशूनां समानी। एकैव सर्वपशुसाधारणी तु स्वान

वति। उ.तः। प्रभूतत्वात्॥ प्रनवति ह्येकैव महती बहूनां पशूनामवदाना

नि श्रपयितुं॥ ॥स्वल्पवपाश्रपणेऽपि च। अनेकपशुषु पृथगेकमेकमेवावमह

न्द्रवति। वपाश्रपणेऽपि च समान्यावैव भवेत्। उ.तः प्रभूतत्वादेवाचका

रेण प्रभूतत्वादिति हेतुरनुकृष्यते। समानपदं चाशक्यं तेवैकेनापि

महता मूलेन सर्वपशुहृदयानि श्रपयितुं। एवं वपाश्रपणी स्यान्मध्य

त्ति दीर्घा स्यां सर्वपशुवपाः श्रपयितुं शक्यं तत्र वा। तस्माद्वपाश्रपणी

मूलेऽग्राणां भेदो न भवतीति सिद्धान्तः। अथ पूर्वपक्षमाह॥ ॥नव

सासंदेहान्न्याय्यं तत्प्रभूतत्वादुत्सर्गएवैवेति। जनत्वा। उ.तः। वसासंदेहा

नां संदिह्यते त्यु वैकल्पे वसा। द्रवद्रव्यत्वात्। न ज्ञायते कस्येयं वसेयमिति

। अवदानानि तु वल्लादिनाबद्धानि हृत्तचिह्नान्यपि विविवेकं न ज्ञायं

ते। वसा तु संसृष्टा न ज्ञायते कस्येयमिति। भेदेन च वसाहोमं वक्ष्यति

स्वस्वाहंचीत्वरेषु स्थिता वसासंदेहात्पशुगणेऽप्येका न भवति। अ

मुमेवपक्षं हृष्टांतेन दृढं करोति सौत्रामणीदर्शनाच्चासौत्रामण्यांस्थूले श्यामासरेणचा बनयममभ्यवयंती ति। स्थूलमेदस्यदर्शनादयोवं ज्ञायते यत्पशुगणो वपाश्रपणी स्थूले शायानां मेदइति। एवं पूर्वपक्षे हेतं नं दूषयति॥ ॥नाविरोधात्॥ तुशब्दः स्थूलवपाश्रपणीनां मेदोन भवति। तुनहेतो: प्रमत्वादेवेत्यर्थः। यत्तु नं वसासंदेहाद्विरोधोन भवतीति। तत्राह। नाविरोधात्। नेषविरोधः स्वसंबंधस्या श्रुतत्वात्। नैवं श्रूयते स्ववसाहोतव्येति। किं तु प्रकृतायाः प्रतियादनार्थत्वात्मकृताहूयते। अत्रापि प्रकृतायाएव होमं करिष्यामो ऽतो विरोधो नास्ति। अथ यदुक्तं सौत्रामणीदर्शनाच्चाखादेमेद इति तत्राह॥ ॥पाकविषम्यात्सौत्रामण्यां॥ सौत्रामण्यां यत्स्थूलमेदोदर्शनं तत्पाकवैषम्यात्। विषमो हि तत्रपाकः पशूनां नानाजातीयत्वात्। छागमेषमेषाहि तत्र पशवो विषमपाकाः श्रताः। तत्र कस्यचिद्दवदानानि शीघ्रं पच्यंते कस्यचिच्चिरेण। तत्र सह श्रपणे केषांचिदपक्वत्वं विलयो वा स्यात्तस्मात्सौत्रामण्यां मेदो युक्तः। अन्यत्रापि यत्र पाकवैषम्यं नानाजातीयपशुविधानो

त्रोरवादीनां भेदत्वाद्यत्र पुनः समानजातीया एव पशवस्तत्रोख्या
मूलवपाश्रपणीनां भेदो न भवत्येव॥ ॥मनोतावसाहोमौ पश्वेक
काल भेदात्। मनोतावसाहोमौ प्रतिपशु पृथग्भवतः। कुतः कालभे
दात् भिन्नो हि पशूनामवदानकालः। याज्यायाज्ञ ईंषोन्तरं च। तेन
गृह्यमाणविशेषत्वात् मनोताप्रैषवसाहोमयोः प्रतिपशु भेदः। अव
नस्य तेनुकालेकत्वात् भेद एव प्रागुक्तः॥ ॥यूपैकादशिन्यां वशाव
पामार्जनान्तं कृत्वा शालाद्वार्ये पत्नी यूपोच्छ्रयणं नाभिमात्रस्या यू
पैकादशिन्यामेष विशेषो भवति। वशाया अनूबंध्याया वपामा
र्जनान्तं कर्म कृत्वा शालाद्वार्ये शालाद्वार्यसमीपे तस्य पुरस्तात् नाभि
मात्रस्य पत्नी यूपस्योच्छ्रयणं करोति। वशामुपस्थिताद्वृक्षात्। मैत्राव
रुणी वशानूबंध्येति वपामार्जनान्तं कृतेऽस्मिन् पिवशापां गर्भसम्भावे
गर्भे निरूहणं तत्र एव कर्तव्यः। तस्माद्यूपैकादशिनी भवति सयोर्विषिष्टः
सदक्षिणाः स्यादित्यादिना यूपैकादशिनीमेव प्रकृत्याथ पत्नीभ्यः प
त्नी यूपमुच्छ्रयतीति श्रुतत्वाद्यूपैकादशिन्यामित्युक्तं। तत्तत्र श्वयश्च

हे॰ब॰भा॰अ॰ कुंदशिन्यामयं न भवति। शालाद्वार्यइत्यत्र सोऽत्राहवनीयः। पत्नीयूपइत्यस्य संज्ञा। सर्वत्रापचेवपत्नीयूपउच्छ्रयणीयइति हरिस्वामिनः। तेन पत्नीवांस्त्वष्टाइहदेवनेति शालाद्वार्येउच्छ्रयणं नाभिमात्रस्य यूपइत्येतच्छास्त्रांतरात्तात्रेतिक्नेव्यतामाह॥ ॥परिस्तरणपात्रस(?)ादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि कृत्वा स्फ्यादि करोति। पशोहि पूर्वं स्फ्यादितत: परिस्तरणादीत्येवंक्रमेण पदार्थाउक्ताः। इहापिपशुधर्मप्राप्तोसएवक्रमः प्राप्नोतीतिक्रमांतरविधानार्थमाह पूर्वं परिस्तरणादिन्याज्याधिश्रयणांतानि कृत्वा ततः स्फ्यादानादिकर्म करोतीति। तत्र मध्येविधानिविपदेशनेदात्तंत्रनेदेयुक्तएव॥ ॥चात्वालवत्॰। आज्यासादनोतेएनेयूपंमित्वातस्मिन्यूपेत्वाष्ट्रः त्वष्टृदेवत्यः पशुरालब्धव्यः। कीदृशः बस्तः मुष्करः। प्रजननयिनामुष्कावीर्येतोविद्येतेयस्यसमुष्करः ऊषपशुषिमुष्कमधोरष्टृनिमन्वर्थीयाः। प्रकृद्रमुष्कोवस्तइत्यर्थः। येमामधीयो॰जितश्रा

येद्रष्टव्यः। सर्वस्यहि मन्तस्य पुंपशोर्मुख्यो विधेनेरेवान्तत्रासत्यपि शाये
वचनमनर्थकं स्यात्। मुख्यो नवस्येषवै प्रजनायितायनमुपद्रइतिश्रु
तेः। तत्वाष्ट्रपश्रुमालभतेइतिश्रुतेश्च त्वाष्ट्रोवशाइत्यर्थः॥ ॥पर्यग्नि
कृतमुत्सृजंति। पर्यग्निकृतं पर्यग्निकरणांतं कर्मकृत्वोत्सर्गत्वाष्ट्रस्यप
शोः कुर्वंति इदं त्वष्ट्रे पत्नीवतेइति त्यागं कृत्वा तन्नसदुः स्थापयेत्पर्यग्नि
कृतमेवोत्सृजेदिति श्रुतेः। शाखांतरे हित्वाष्ट्रं पात्नीवतमालभेतेति
विधायोच्यते। पर्यग्निकृतं पात्नीवतमुत्सृजंतीति। अत्रैतत्संदिह्यते कि
मेषद्रव्योत्सर्गः प्रतिनिधिभूतेनाज्येन संस्थानस्यैव कर्मणः। उत क
र्मोत्सर्गः तत्रे तोगरीति विधाने। कर्मांतरमाज्यसंस्थेति। किंतावत्प्राप्तं
सत्रेणेवपक्षः आज्येन सादुः स्थापयंतीति श्रुतेः। द्रव्योत्सर्गोयं। नक
र्मोत्सर्गः। कुतः। आज्येन सदुः स्थापयंतीति श्रुतेः। तस्य च द्रव्येतस्यै
व कर्मणः प्रतिनिधिभूतेनाज्येन संस्थापनमुद्दिश्यते। नाज्यद्रव्यकं
कर्मांतरं विधीयतेदेवतामावात्। इति। संस्था चारब्धस्यैव भवति
।न्यारब्धस्य त्वाष्ट्रइति। यदि चद्रव्यमात्रस्यायमुत्सर्गस्ततोस्तिपाशुकं क

मीसं स्थितं तेन तस्याऽद्येन संस्थापनमुपदिश्यत इति गम्यते । किंच
॥ ॥ पशुपर्यग्निकरणे त्वाष्ट्रे तत्र यद्रव्ये उत्सर्गेण कर्मोत्सर्गः । पशोरेव
पर्यग्निकृतस्य चोत्सर्गविधानात् । तेन संस्थापयेत् पर्यग्निकृतमे
वोत्सृजेदिति । अतो पित्रे यो उत्सर्गो न कर्मोत्सर्गः । एवं पूर्वपक्षे कृते सि
द्धांतमाह ॥ ॥ तदन्तं वा कर्मनामधेयात् । वाशब्दः पक्षव्यावृत्तौ । तदंते
वा पर्यग्निकरणांतमेव पशुकर्म भवति तदंतमेवोत्सृजेत् । उत्सृ
त्वा त्वष्ट्रकर्मणः आज्यसंस्था कर्मांतरविधानमिति । कुतः । कर्मनाम
धेयात् । यतस्तदित्यनेन सर्वनाम्ना कर्माभिधीयते । तत्कर्म न संस्था
पयेत् पर्यग्निकृतमेवोत्सृजेदिति । किंच न प्रतिनिधिः संभवति । त
था हि यदि पशोस्त्यागमात्रं क्रियेत तत्र तत्र उत्पत्तिवाक्यविहितमेव
तासंबंधो नानुष्ठितः स्यात् । तत्रैव देवतासंबंधाविधिप्रमाणं स्यात्
। असति देवतासंबंधे यागविधित्वं न स्यात् । प्रत्यक्षयज्यश्रवणाद
सति यागे अग्नीषोमीयवद्विध्यंतस्याप्राप्तेः पर्यग्निकृतोत्सर्गः शेषसं
स्थापनं चोभयमप्यनुपपन्नं । अथ देवतामुद्दिश्योत्सृज्येत तत्र पशु

साध्यनके यागे पशुनैव मुख्येन साधिते किमर्थः प्रतिनिधिः। देवतो
द्देशेन चोत्सर्गदुत्पत्तिवाक्यसिद्धत्वात्। पर्यग्निकरणवाक्ये। न विधा
तव्यः। तस्मात्पर्यग्निकरणांतो गरीति विधानान्तेयेव निराकांक्षस्य पू
र्वकर्मणः समाप्तत्वात् न शेषमस्ति यस्यान्येन संस्थापनमुच्यते। तस्मा
त्कर्मांतरविधिरेवायं। न च देवताभावः। प्रकृतपात्नीवतपश्वनुषं
गादिह संस्थापयतीति प्रत्ययार्थः। न भावनयान्यप्रातिपदिकार्थो
नुपपन्नदेवतापदसंयुक्तः संबध्यते। तदयमर्थः। पात्नीवतमाज्यं तु
र्यो दितिशेषसंस्थाशब्दो वसाहश्यात्। पूर्वो हि यागः पात्नीवद्देवत्यः
पर्यग्निकरणमात्रेण संस्थापितः स शेषत्वात्तदनंतरं वाज्ययागः पा
त्नीवद्देवत्य एव क्रियमाणस्तद्वशेषसमापनमिव भवति। अतः
संस्थापयतीत्यनेनाख्यातेन निर्दिष्टो यं कर्मप्रकृतपात्नीवतद्देव
त्यमेव सहोपक्रममाज्यसाधनकं विधीयत इति। यज्ञपशुपर्य
ग्निकरणः द्विस्तु तं पर्यग्निकृतमुत्सृजंतीति तत्कार्यमर्थं पर्यग्निकर
णं तेक्रमोत्सर्गस्य मिति॥ तद्वद्वनस्पतिसोमप्रयाजेषु स्याद्दर्शना

नात्व ष्टृवनस्यास्योः प्रयाजे षिडन्या संपद्यतिर्ई श्वसनोय स्य स्वारं वनस्पा
ति वावाहयस्य यज्ञे नो यजाने। तित्वा ष्टूीनवमी प्रयाज्यावानस्पास्ता
हृ शम्प त्रे ना विष्ठो विघादिति। वानस्प त्याद्दशमीन त्रे नो भागिनीव
रे नीतिद्वचित्याठः। एत च्च दर्शनेक मो-सर्गरावो पपद्यते। द्र व्यो-सर्गे
हि द्र व्यां तरेण त्व ष्टूव नस्पती अभी स्रेते एवेति। तस्माद्दयिनर्द
तागरीति विधान मिति। प्र तु संस्थापपद्यतीति कर्मांतर विधाने नोप
पद्यते। इति प्रवृत्तस्या संस्थितस्य कर्मणो भावात्। नानुपपन्नं क
र्मांतर विधानेनानुपपन्ना संस्थापना पंचविधी यमानायामपि
चांतरेणारं भेनैव संस्था भवतीति संस्था विधानेनेवारं न श्चोदित एव
अपि च त्वाष्ट्रकर्मणि पर्यग्निकरणांते तु-स-ष्टे त्वा ष्ट्रं एव वा उत्सर्गंद्रव्य
वे कर्मांतर विधाने समानदेवत्वा-संस्थापपद्यते। सुपयपद्यत एव।
विं नायाः प्रयोजनं। यदि प्रतिनिधिभूतमाज्यं पशुधर्मोः संस्थाप
ना। ज्ञात्वे वापि प्रति पत्ति श्चागस्पह विषोनुप्रभुही त्यनुवाचनादि भवति
। कर्मांतरे द्रव्य सामान्या दुधर्मैः संस्थायन मिति। अत्र केचिद्दयप

80

त्नीभ्याः पत्नीयूपमुच्छ्रयंतीतिपत्नीसंबंधविधानाच्छाखांतरेण सहै
कवाक्यतां वर्णयंति। विहितो हि केषांचित्त्वाष्ट्रः यात्नीवतः पशुरि
ति। तदाचार्येणापि सूत्रितं शालाद्वार्ये पत्नीयूपोच्छ्रयणमिति। अ
परे बाहुः। न त्वाष्ट्रं पशुमालभतइति सापेक्षात्वेन ताभ्यां नानुपपत्तेः शा
खान्तरेण सह विकल्पः। पत्नीसंबंधश्च यूपस्य पत्नीरज्जानयोगास्य तौ
शालवदुपपद्यते नादृश्यस्याविद्यमानत्वात्। आचार्येणापि वाक्या
र्थ एव संबंधो यूपस्यात्र यत्ने पत्नीयूपोच्छ्रयणमिति। अतश्च केषां
चिन्मते स्वप्रादेवेनाकेवला। केषांचित्पत्नीवांस्त्वक्षेति। अन्यायप
यसाम्यं चामस्य चउरासने। शालाद्वार्ये दक्षिणेन ब्रह्मयजमान
योरुपवेशनं। पत्नीनां प्रणयनं। मार्जहिनस्येव परिस्तरणं। इतर
योरनुबंध्यादौहूतत्वात्। पात्रासादनं। आग्निहोत्रहवणी। वज्रः
। शास्पाहषदुपलं। पवित्रछेदनानि पवित्रे। आज्यं वेदश्चाउदन्मणं
मन्त्रिः। इध्मो बर्हिः स्नुष्पकार्षयमयाइत्यादिकं। स्रुवो जुहूरु
पभृद्ध्रुवा। यूनतुशाः। होतृषदनं। यूपाहुत्यं। नानिमात्रोपयः। त्रिगुण

ष्टानादिद्गुणरज्ज्वाना। मैत्रावरुणदंडः। असिः। मंथनचतुष्टयं वा
। अंतर्हीनवकृः दारुणानान्यासामप्यपवित्रकरणं। प्रोक्षणीसंस्कारः या
त्राणां प्रोक्षणं। असचरे प्रोक्षणीनां निधानं। उ॰ नु॰ दाहननं। आ
ज्यनिर्वापः वेदब्धः। अग्नौ पर्यग्न्याज्याधिश्रयणं। अध्वर्यो
पर्यग्निकरणं। उदकोपस्पर्शनं। ततः शालाद्वार्ये परेण दर्शपूर्णमा
सवद्वेदिमानादि संमार्जनायासनान्ते असेः संमार्गाभावः। पत्नीसंन
उहनमेव। आज्यो द्वासनादि ऐष्टिकमेवाज्यग्रहणं। न पृष्ठशाखा
वसाहोमहवन्यौ। आज्यासादनान्तालंभोदकान्तं भांते प्रकृतिवत्
। अन्यादानादि शालाद्वार्ये पूर्वेण नाभिमात्रस्य यूपस्य निखननं
खर्वकारहनान्ते। उपाकरणमंथनयोर्विकल्पः। त्वष्टुं जुष्टं नियुनज्मी
ति पशोर्नियोगः त्वष्टृपत्नीवतेइति वा। त्वष्टुस्त्वा जुष्टमिति प्रोक्ष
णं त्वष्टृपत्नीवते त्वेति वा इध्मा। प्रेषादि पर्यग्निकरणान्ते विशेषः।
समित्रे असिप्रदानाभावः। शामित्रसंस्कारो न भवति। मैत्रावरु
णदंडस्य ग्रहीतृत्वाभावात्। ततः पर्यग्निकरणान्ते इदं त्वष्टुरिति इदं पत्नी

वत्तेत्वष्टुरितिवास्यागंकृत्वायशोरुत्सर्गः। ततस्त्वाष्ट्रोणपशुनासहैवा
स्त्रंखस्वकर्मस्याऽस्यहविषःस्वपरिसमाप्तिः। ततउत्तमःप्रयाजोयजपै
षःप्रकृतिवत्तःप्रयाजशेषेणाभिघारणं। ततस्त्वाऽस्यभागोयजपै
षोधृत्वायास्त्रदुर्गेहीतेनत्वाष्ट्रोयागः। त्वष्टुर्नुबूहीत्वष्टारंयजेतिअ
नुवाचनप्रैषौ।इदंत्वष्टुरितिस्यागः।पत्नीवतेत्वष्टुर्वास्यागः। नस्विष्ट
कृत्।स्कृग्निधानं।पवित्रप्रतिपत्तिः।उत्सुकसमासः।समिधमादा
पञ्चस्त्रस्त्रस्त्वास्यामीत्यादिःप्राकृतएवप्रैषः। त्रयोनुयाजाउपनते
नाज्येन।धारानुयाजांतेश्रुवहोमः।सूहनं।त्वष्टुरुजितःत्वष्टात्वम
पनुदंत्विति।सक्तवाकप्रैषेब्रूहीत्येवप्रैषः।इदमग्नयेसोमायत्व
ष्टुर्देवेभ्यस्त्वाऽस्यपेभ्यइतिप्रस्तारस्यागः।पत्नीसंयाजाःदक्षिणाग्नि
होमाश्रुएकमेवसमिष्टयजुः।बर्हिर्होमः।प्रणीताविमोकः।पूर्णपा
त्रादिकर्मापवर्गांतसर्वंप्रमेष्टिवत्।अनूबंध्यांतएवसमापनंभवतिने
हातो।नेदिदंदीक्षितवत्तनमिमितिनिषेधात्।ततोनूबंध्यायाःपशुपु
रोडाशनिर्वपणादिकर्मापवर्गांतं॥ ॥अथप्राकृतमग्नीषोमीयकर्मो

वायदिशति॥ ॥अग्नीषोमीयस्य वपामार्जनान्ते वसतीवरीग्रहणं॥ स्यं
दमानानामनस्तमिते। अग्नीषोमीयस्य पशोर्वपामार्जनान्ते कर्मणि
कृते अनस्तमिते सूर्ये स्यंदमानानां नद्यादीनां वहंतीनामपां वसतीवरीणां
ग्रहणं करोति। वसतीवरीणां ग्रहणं करोति। वसतीवरीरिति वक्ष्यमाणा
नामपां संज्ञा होतृचमसे वसतीवरीः कृत्वेत्येवमादौ संव्यवहारार्था। स यदि
सतीवरीरर्छेति तावेस वैषुासवनेषु विनजाति तावैस्यंदमानानां गृह्णीया
दिति श्रुतत्वात्। अर्छेति आनुयाति अभिगच्छति वा। अर्छाभेरानुमिति
शाकपूणिरिति यास्को नैः। स्यंदमानानामपामेकदेशं नताइत्यर्थः। अतश्च सो
मार्था आपो वसतीवरी इत्युच्यंते। कठसत्रे मार्जयित्वा वसतीवरीर्गृ
ह्णातिवहंतीनां चुमेनप्रती यजिष्ठं श्छायायां दमैर नह्यीयहविष्मतीरिति
पूरयित्वा न्येई भैरपिधायसंचरेण प्रविश्य। परेणगार्हपत्यमग्नेर्वइति नि
धायेति। प्रतीयं कलङ्गामुपमारयति छायान यपोः संधायापिधाय दर्भैः प
णिनावेति मनुः। न यादि वा गृह्णीयादिति श्रुतेरनस्तमिते स्पकं॥ ॥ अ
स्तमितं श्वेतिनास्वा सुरेजानश्च ते। चेन यदि आदित्यः स्यात्तदा। अस्तमितः

स्यात्तदा स गृह एव निर्मन्थ्यो ऽमणिको वा गृह्णीयात्। यदि यजमानः पुरा
पूर्वं सोमेनेष्टवान्स्यात्। स पश्चाद्गृहीता अभ्युक्तमियात्तत्र प्रायश्चि
त्तिः क्रियते यदि पुरे जातः निर्मन्थ्याद्गृह्णीयाद्द्विवाहितस्य तातः पुरा
गृहीता भवन्तीति श्रुतत्वात्। अस्यार्थः। यदि पूर्वं यजमान ईजान
इष्टवान्स्यात्। ततः आत्मीयान्निर्मन्थ्याद्वसतीवरीं गृह्णीयात्। नो चे
न्नैहतीयो निखननीयो भूमौ निर्मन्थ्यो सामणिकः। द्विवाहितस्य ईजानस्य
तातः पुरा पूर्वस्मिन्यज्ञे गृहीता भवन्ति॥ ॥ अनीजानोऽन्यस्यापि समी
पावसितस्य पुरेजानस्य। यदि स्वयं यजमानोऽनीजानः स्यात्। पुराइ
ष्टवान्नस्यात्। तदा अन्यस्यापीष्टवतः समीपावसितस्यापावसित
स्य प्रतिवेशस्य समीपवासिनो यजकर्तुर्निर्मन्थ्यान्गृह्णीयात्। य
द्यु अ[illegible]नीजानः स्यात् एनमीजान उपावसितो वा पर्यवसितो वा स्या
त्तस्य निर्मन्थ्या गृह्णीयादिति श्रुतत्वात्। यदि पुत्रयमनीजानः स्यात्त
तो य एनं यजमानमुपावसितोऽस्य प्रतिवेशः स्यात्। पर्यवसितो वा समं
ततो वसिष्ठो ग्रामस्यैव स्वामी ईजानस्तस्य मणिका गृह्णीयादिति श्रुत्य

दे०ब्रमाअ०
८३

र्थः॥ ॥ उभयाभाव उल्कुषीं हिरण्यं वोपर्युपरि धारयन् हविष्मती
रिति। उभयाभावे स्वयमपि नेष्टवान् अन्योपि समीपवासी नेष्टवा
न्न तदा उल्कुषीमुल्कां हिरण्यं वास्वं दमानानामयामुपरि समीपए
व धारयन् वसती वराग्नं हृत्वा निहविष्मतीरित्यनेन मंत्रेण। यघूणनदु
नयं न विंदेदुल्कुषीमेवाहायोपपरेयान्नामुपर्युपरि धारयन्नाहृ
याद्धिरण्यं वोपर्युपरि धारयन्नाहृ या — नेस्वरूपं त्रियते यएपत
यस्य यानो गृहान् स्वेव हविष्मतीरिमा आपइति श्रुतत्वात्। अग्नीषो
मीयस्य वपामार्जनान्त इत्यत आरभ्य हविष्मतीरित्येव मंत्रमेके स्तत्र
मेवेकमन्यंते। अग्नेरयमर्थः। यदि तु स्वयं यजमानेनापि प्रतिवेशमा
जानं विंदेत्ततोध्वर्युरुल्कुषीमुल्कां गृहीत्वा स्वदमानानामयामुपरि
समीपे धारयन्नाहृ याद्धिरण्यं वेति। उपर्युपरीति उपर्यध्वर्यवः सा
मीप्यस्वत इति द्विर्वचने। मानवोपथ्यतमितः स्या सोमयाजिनः तुंभाद्हृ
या सोमयाजिनं चेन्न विंदे [illegible]ण्यं ह स्तोस्याद्ग्निमुपरि सान्ह्रारयेपु
रयगृहा यावद्दक्षिणाग्नेर्दासं स्यान्तस्याध्वर्युपरिवरं दद्यादिति। कठ

सत्रो। चापघ्रग्रहीतायुसुर्वोमिर्योनिम्लो चेह्व सतीवरीः सोमयाज्ञिनोग्र
हानग्रहीयाघ्रद्विनत्रनभिर्देद्दगिंचहिरण्यंचादायपरेस्याग्निमुपरिष्टा
द्वारपिस्वाहस्तोहिरण्यंहत्वाग्रहीयाद्दरंदधातिति॥ ॥अग्नेर्वद्द्गतिनि
दधातिशालाद्वार्यमपरेणतावसतीवरीयंशनीयवाल्वालोकरणवंतरे
णप्रविश्यामनीधमुत्तरेणहृत्वापूर्वद्वारेणशालांप्रविश्याग्नेर्वोपन्नद्
तिमंत्रेणशालाद्वार्यमपरेणनिदधाति। आसादयति। ता आदृत्यजघ
नेनगार्हपत्यं साद्यस्यग्नेर्वोपन्नगृहस्येतिमन्त्रेणत्वा तः॥ ॥सुब्रह्म
ण्यांचप्रेष्यतियेतापुत्रीयां। चकाराद्द्वसतीवरीणांनिधानकालएवये
तापुत्रीयांसुब्रह्मण्यांप्रेष्यति। पितापुत्राद्देनीमाकीर्तेनसंबंधिनाये
तापुत्रीयातां। अयवाचकारेणवपामार्जनांतइत्येतदेवानुकृष्यते
। वपामार्जनान्तएवसुब्रह्मण्यांप्रेष्यति। येतापुत्रीयामिति सुब्रह्मण्या
याविशेषणं। सुब्रह्मण्येसुब्रह्मण्यामाह्वयपेतापुत्रीयामितिसेव। शा
त्वांतरेवपामार्जनान्तएवसुब्रह्मण्यामाः पेतापुत्रीयायाविहितत्वात्।
[illegible]कारप्रत्याख्यानाचातयाचसाधछ्लेस त्रिनंवपान्तेसुब्रह्मण्यानिहृत्तिरिति

एककालत्वेपिसूत्रपाठक्रमात्पूर्वं वसतीवरीग्रहणं ततः सुब्रह्मण्या
प्रैष इति। एवं चेदहुतायां वसतीवरीग्रहणे वा यामार्जनानंतरं सुब्रह्म
ण्याप्रैषो वसतीवरीभिः संबंधात्॥ ॥इति पितृभक्तिः॥ मानवे॥ हुता
यां वपायां चात्वाले मार्जयित्वा सुब्रह्मण्ये सुब्रह्मण्या माह्वयति प्रैष्यति पि
तापुत्रीयां सुब्रह्मण्यामाह्वयति नाग्नीध्रो मीये हृदयशूलं करोति नसव
नीयेन सरूमनुप्रहरति नांतरायो देवयजनं च पंथा ... वेयात्स्यागन्तम
यान्निग्रन्थ्य वसतीवरीग्रहणं ति वहतीनां पतीनां पत्नीयाप्ति घन्त्राती
पंकलशमुपमारयति इति। कठसत्रेप्ययमेव क्रमः मनुक्तोस्ति॥ ॥आदि
त्याभ्यये हुतायामपि वपाहोमात्पूर्वं आदित्याभ्यस्तमये आहुतायां
मपि वपायां वसतीवरीग्रहणं यादेवमपि श्रुतत्वात्॥ ॥दक्षिणाग्निहो
मांतमग्नीषोमीयमस्तमिते सह ... त्यापव्यक्त्मा मंते साहविः॥ अत्र सर्व
पशुपुरोडाशनिर्वापः। नत्र वाचस्पति प्रैषः। प्रणीताप्रणयनं। पात्रा
साहनादि मार्जनांतं। पशुपुरोडाशयागः। ततः पशुविशसनं नैवात्र
भागावदानानि केमाहि निग्रस्यंते। ततः स्विष्टकृदिडावधानादि

क्षिणाग्निहोमांतमग्नीषोमीयं पशुमस्तमिते सर्वं संस्थाप्यमुक्तं मते
ति प्रैषं त्रिर्ब्रूयात्। अथ यदाग्नीषोमीयः पशुः संतिष्ठते अथ परिहरति
पशुं कृमतेत्याहेति श्रुतत्वात्। त्रिविस्पेतच्छाखांतरात्। ननु अग्नीषोमी
यः प्रकृत एव किमर्थं पुनस्तद्ग्रहणं। उच्यते अस्तमिते संस्थापनमग्
नीषोमीय एव यथा स्यान्न तद्विकारेषु निरूढादिष्वित्येवमर्थं पुनरग्
नीषोमीयग्रहणं। अस्तमिते संस्थापनमपि शाखांतरात्। दक्षिणा
ग्निहोमांतमित्युक्तत्वात्तत्रत्यमर्थकर्म्मणां निवृत्तिः। तेन पूर्णपात्रा
दिकर्म्मापवर्गांतस्यात्रानवः। तस्मात्तस्य पशोः समिष्टयजूंषि न जु
हुतीत्युक्तं चास्समिष्टयजुषामपि निषेधः। इतरेषु पशुषु त्रीणि समिष्टय
जूंषि भवंति। पशौ भवंति प्रायुक्तत्वात्। प्रतियन्त्यपसु प्रवर्त्तं। तेनेहिदं
दीक्षितवसनं परिधाय पुरा पर्जन्यस्य संस्थाया अंतं गच्छातीति प्र
तिषेधात्पशुपुरोडाशसंबंधित्वेनापि समिष्टयजुः पूर्णपात्राद्यपवर्गा
तेन भवति। दक्षिणाग्निहोमस्याप्यस्तमित एव भवति। तेनवेदयोक्त विमो
कः। योक्त्रस्य तु संप्रक्षेपः। एकहद्दिहोमः। प्रणीताविमोकः। राक्ष

भागः ॥ भागावेक्षणो भागप्राशनं चकर्वं मन्त्रानान्येषां ततोध्व-
र्यामन्तेस्यादि ॥ ॥ शालाद्वार्यमपरेणास्तेपत्नी । मेजाननंतरं पत्नी
शालाद्वार्यमपरेणास्तेउपविशति । अनेकामुलेवैवात्रोपविशति
॥ ॥ उत्तरवेदिमपरेणयजमानउपस्थेसोमंकृत्वा ॥ यजमानउपस्थे
उत्संगेसोमंकृत्वोत्तरवेदिमपरेणास्तेउपविशति । अग्नेणहविर्धाने
यजमानआस्तेइतिश्रुतेः । उपस्थेसोमंकृत्वेतिश्राव्वांतरात्म अनेकेषु
लेकएवात्रास्ते ॥ ॥ शालाद्वार्यमपरेणवसतीवरीः परिहरति । अध्वर्यु
शालाद्वार्यमपरेणवसतीवरीपरिहरेत् । कलशं हस्ताभ्यां यत्तेनादाय
शालाद्वार्यस्यपश्चाद्देवनीत्वागच्छेदित्यर्थः ॥ ॥ दक्षिणेननिहृत्यद-
क्षिणस्यामुत्तरवेदिश्रोणौनिदधातीन्द्राग्न्योरिति । वसतीवरीप्रादाय
दक्षिणेनशालाद्वारेणनिहृत्यपश्चाल्लायाभिः घ्राश्यमार्जालीयं दक्षि-
णेननीत्वादक्षिणस्यामुत्तरवेदिश्रोणौनिदधाति आसादयति इन्द्रा-
ग्न्योर्भागधेयीस्थेत्यनेनमंत्रेणतांआदत्तेसदक्षिणेनमिनिश्चामति
नादक्षिणायांश्रोणौसादयतीन्द्राग्न्योर्भागधेयीस्थेतिश्रुतत्वात् । तान

तथाचमानवे। पूर्वया द्वारा प्रविश्य वसतीवरीर्गृहीत्वा परेण विहारं द-
क्षिणेनातिक्रम्य पूर्वया द्वारा निःसृत्य दक्षिणेन सदो मार्जालीयहविर्द्धानं
च गत्वेंद्राग्न्योर्भागधेयीस्थेति दक्षिणस्यामुत्तरवेदिश्रोण्यां सादयति
यथेतं प्रत्येत्य पूर्वया द्वारा निःसृत्योत्तरेण सद आग्नीध्रीयं हविर्द्धानं
च गत्वा मित्रावरुणयोरित्युत्तरस्यामुत्तरवेदिश्रोण्यां सादयति विश्वेषा-
मित्याग्नीध्रीयदति। काठके च। संस्थिते वसतीवरीः परिहरति प्रक्रा-
मते स्रुक्का परेण विहारं परिक्रम्य दक्षिणेन वेद्यंतेन गत्वा दक्षिणस्यामु-
त्तरस्यां श्रोण्यां सादयतीन्द्राग्न्योरिति यथेतं प्रत्येत्योत्तरेण वेद्यंतेन गत्वो-
त्तरस्यामुत्तरवेदिश्रोण्यां सादयति मित्रावरुणयोरिति यथेतं परे-
त्य परेणाग्नीध्रीयमग्निं विश्वेषां देवानामिति सादयतीति॥ आहस-
स्थाने निदधाति। तावसतीवरीरुत्तरवेदेः सकाशात्तेनैव मार्गेणाहृत्य य-
थाहाहस्थाने शालाद्वार्यमपरेणैव निदधाति। ताः पुनराहृत्याग्रेण
पत्नीं सादयतीति श्रुतेः॥ ॥कलशाय पत्न्यालभमेतत्र पत्न्या अग्रे
सादितं वसतीवरीकलशं पत्न्यालभते। केचित्कलशमध्यस्थास्योदक

स्यालं नभिछंतिनयासनिलक्षणोस्यात्॥ ॥उत्तरेण परिक्रम्योत्तरस्यां
पूर्ववत्। उत्तरेण विहारं परिक्रम्य तत्रोपविष्टां पत्नीमपरेण गत्वा तं शा
लाद्वार्ये उत्तरेण परिक्रम्य कलशमादाया पूर्वद्वारेण शालातो निष्क्र
म्याग्नीध्रीयमुत्तरेण गत्वा तत्रस्थामुत्तरवेदिश्रोणौ निदधाति पूर्ववदि
ती द्राग्न्योर्भागधेयीस्थेत्यनेनैव मंत्रेण॥ मित्रावरुणयोरिति वा। अ
थवोत्तरवेदिश्रोणौ मित्रावरुणयोर्भागधेयास्थेत्यनेन वा मंत्रेण वसती
वरीरासादयति। स जघनेन पत्नीं पर्येत्य ता आदत्ते स उत्तरेणाग्निं क्रा
मति ता उत्तरायां वेदिश्रोणौ सादयति मित्रावरुणयोर्भागधेयीस्थेति ने
व ऽ सादयेदिति रिक्तमेनमन्ते वऽ संयन्नसपद्यत इंद्राग्न्योर्भागधेयीस्थे
त्येव ब्रूयाद्दिष्टु न योर्मंत्रयोर्विकल्पो न समवशनात्॥ ॥विश्वेषां देवाना
मित्याग्नीध्रे ततः पुनरुत्तरवेदिश्रोणेः सकाशाद्वसतीवरीरादायाद्
याग्नीध्रस्य मध्ये विश्वेषां देवानामित्यनेन मंत्रेणाग्नीध्रीयस्य पश्चा
न्निदधात्या सादयेत्। आग्नीध्रे सादयति विश्वेषां देवानां भागधेयीस्थे
ति श्रुतत्वात् तथा च काठके॥ ॥ अपरेणाग्नीध्रीयमग्निं विश्वेषां देवा

नामितिसादयती । इति सोमं चासंद्यां । सोमं चाग्नी । ध्रुवावासांद्यां निदधा
ति आसादयति । अनया वा संदी पूर्वमेवा त्रस्थापितास्तीति गम्यते ॥
दीक्षितश्च तत्रानाढ्ढ रात्रिं ढ सोमं रक्षति । दीक्षितो यजमान स्तत्राग्नी
ध्रेनाराचिन्हहु स्तायां रात्रौ सोमं रक्षति अतश्च यीजागर्ती सुतं नव
ति अन्यथा रक्षणा स्यासिद्धेः । तस्माद्दीक्षितो राजानं गोपायतीति
श्रवणात् । तथा च मानवे ॥ ॥ आग्नीध्रे यज्ञपात्राणि वासयन्ति तस्मि
न्यजमानो जागरदुपवसति प्राग्वंशे पत्नीति सुब्रह्मण्यां च प्रेष्यतीति च
कारात्पत्नी पुत्री यां सुब्रह्मण्यां प्रेष्यति आग्नीध्रे सोमनिधानानंतर
मेव ॥ ॥ परिवाप्या ये दोहनं परिवापशब्देनात्र दध्युच्यते । परिवापं
दधि अर्हतीति परिवाप्या सरस्वती । तस्यै दोहनं दधि निष्पत्तये दध्य
र्थं । न दोहानग्नौ न करोति । प्रतिसवनं सवनीये पु सरस्वत्यै दधि विहि
तमस्ति । तद्धि द्वाभ्यां महोभ्यां निष्पद्यते । अतश्च तदर्थं दोहनमपकृष्य
तदर्थं च वसायाकरणं प्रोक्षणमेव उत्तरपरिग्राहीतेवोदि प्रोक्ष
णात्प्राक् । अत्रोपसत्त्वादिपरिक्षानां तान्त्रो दोहानग्नौ कुर्यात्

दृ॰ व॰ भा॰ अ॰
८७

सप्रवर्ग्ये चदधिघर्मार्थ एवको दोहः कार्यः। स च प्रातःसवनिके सरस्व
तदोहानंतरकार्यः। लौकिके न भावदुग्धमिष्यते वनोऽइन्द्राय सरस्वति
वतेरस्व भागमिति मंत्रे ऊहः। इन्द्रस्यत्वा भागमिति दधिघर्मस्यानंत
रन्दोहान्सुगुप्ते देशे निधायामैत्रावरुण्याय पयस्यायास्त्वर्थं वत्सा
पाकरणं कुर्त्तव्यं। अत्रैन्द्राय मित्रावरुणेव ते भागमिति गोरुपस्पर्श
नेविशेषस्तन्तःशाखोद्दहनमिति। एतत्सर्व दोहनं पयस्यार्थाव त्सापा
करणं चाग्नीध्रे कर्त्तव्यं। तस्यैव सवनीयपकर्त्त्वविधानात्। शाखांतरे
त्वस्य न्यायस्येह प्रत्याख्या। अत्रमानवे॥ सर्वास्त्वचः संप्रगृह्णाति त
तं पत्नीसंयाजांतः संतिष्ठते पात्रस्य बंधिकमिध्माबर्हिः संनयति या
यजमानस्य व्रतधुक्सामाशिरे दुहंति। पयस्याशायमैत्रावरुणैये पय
स्यायै यां प्रवर्ग्यस्यतां दधिघर्मायेति। अतो यजमानव्रतदुघां दो
हयित्वाशिरे दधि कर्त्तव्यं॥ ॥काठके च॥ ऐन्द्रं दोहयति वत्सानपाकृ
पाग्नीध्रीयेयजमानो वसती पयस्यायै वत्सापाकरणं पूर्वेद्युरुक्तं
॥ ॥ आवसथ्योऽन्यदीजालंकरणादंतमक्षालनान्त्यष्टयोरहो क्षि

तस्याध्वर्योरदीक्षितस्य। आवसथो वसत्यर्थं गृहं। उअर्हं नैतैलाभ्यं
गादिनाशरीरोअर्हं न शरीरसंवाहनेमलापकर्षणार्थं स्निग्धस्ना
नादि। अलंकरणं चंदनस्रग्मालाकर्णवेष्टकमुद्रिकावस्त्रादिभिः
।दंतप्रक्षालनं दंतधावनं। ताम्बूलमिति केचित्। एतानि वस्तून्यदी
क्षितस्याध्वर्योर्हाणि। अदीक्षितग्रहणाद्दीक्षितेषां गदक्षिणासंस्का
रमात्रमेतदिति। अत आवसथस्याहानेवसतिमात्रार्थत्वात्। एवमा
लंकरणादेरपि। अतएवात्राध्वर्योरिति षष्ठ्यानिर्देशोनसंप्रदान
चतुर्थ्या। हिरण्यासोध्यायपरिसमाप्तिसूचनार्थः ॥ ॥ इति श्रीत्रि
रग्निचित्सम्राट्स्थपतिमहायाज्ञिक श्रीश्रीप्रजापतिसुतेन या
ज्ञिकश्रीदेवेनकृते कात्यायनसूत्रव्याख्याने अष्टमोध्यायः समाप्तः